**DIPLOMA IN SANSKRIT**
**Paper - II (Part - A)**

# SAMKSHEPARAMAYANAM

**Directorate of Distance Education**

Rashtriya Sanskrit Vidyapeetha
Tirupati - 517 501(A.P.)

# अंशः-I; सङ्क्षेपरामायणम्-

१.०.परिचयः
१.१.लक्ष्याणि
१.२ःपाठ्यांशपरिचयः सङ्क्षेपरामायणम्
    १.२.१ः वाल्मीकिः
    १.२.२ः वाल्मीकिः-जीवनदेशः
    १.२.३ः वाल्मीकिः-जीवनकालः
    १.२.४ः वाल्मीकिः श्रीमद्रामायणम्
    १.२.५ः वाल्मीकिः श्रीमद्रामायणवैशिष्टयम्
    १.२.६ः वाल्मीकिः कवितावैशिष्टयम्
१.३ः सङ्क्षेपरामायणम्
    १.३.१ः सङ्क्षेपरामायणम्-व्यवहाराः
    १.३.२ः सङ्क्षेपरामायणम्-सङ्क्षिप्तकथा
    १.३.३ः सङ्क्षेपरामायणम्-वैशिष्ट्यम्
१.४ः उपसंहारः
१.५ः अभ्यासः

## १.०:परिचयः

भारतभूमिः पुण्यभूमिः कर्मभूमिः ज्ञानभूमिः च भवति। अत एव इयं आर्षभूमिः इति प्रसिद्धिं प्राप्नोति । ऋषीणां सम्प्रदायानुसारिणी। ऋषयश्च मानवश्रेयस्साधनाय तपश्चरितवन्तः। मानवानाम् अभ्युदयमार्गं सूचितवन्तः। मानवाभ्युदयाय कृतां कृषिम् आलक्ष्यैव ते महर्षयः जाताः । तपश्चरणे बहवो विषयाः तेषाम्  आलोचनापथम् आगताः। ते च विषयाः ऋषिभिः शोधिताः। शास्त्रसम्पन्नाः कृताः। मानवानाम् उद्धरणाय तादृशाश्च विषयाः ग्रन्थस्थाः अपि विहिताः। तस्यैव आर्षसाहित्यम् इति व्यवहारः। एतच्च आर्षसाहित्यं, विषयाणाम् अध्ययने पाठकानां बुद्धिं आलोचनां च शास्त्रसम्पन्नं करोति। शास्त्रीयता च मानवमनस्सु सृजनात्मकतां वर्धयति। सृजनात्मकता च समस्यानां परिष्कारान् दर्शयति। शक्तीः उत्पादयति। बाध्यतायुतजीवनं बोधयति। अतः सर्वः अपि भारतीयः अवश्यं आर्षसाहित्यस्य अध्येता भवेत्। मानवश्रेयस्साधनाय प्रयत्नशीली च  च भवेत्।

## १.१:लक्ष्याणि

वेदाः न केवलं संस्कृते, किन्तु प्रपञ्चभाषासु एव प्रथमं गण्याः भवन्ति। ते च भारतीयसंस्कतेः मूलभूताः। वैदिकम् संस्कृतं ; अतिप्राचीनम्,स्वरप्रधानं, प्रभुसम्मितम्,शब्दप्रधानम् , अनुल्लङ्घनीयता स्वभावश्च तस्य। पण्डितानामेव सुलभसाध्यम् तत्। सामान्यानां तु वेदानां वा वेदानाम् अर्थस्य वा ग्रहणं कृष्टसाध्यम् एव। एवं क्रमेण सामान्यानां  दुर्लभा सती वेदभाषा  पणडितपरिमितिं गता।

सामान्याः वेदार्थस्य अनभिज्ञाः एव जाताः। अतः सामान्यजनाः अपि वेदविषयान् जानन्तु , ते च कल्याणं साधयन्तु इति अस्माकं ऋषयः महनीयम् आदर्शजीवनं जनभाषामाध्यमेन ग्रन्थरूपेण उपनिबन्धितवन्तः। तादृशेषु वाल्मीकिमहर्षिः अन्यतमः। श्रीमद्रामायणम् अन्यतमम्। एवम् अयं रामायणस्य परिचयप्रदानात्मकः पाठ्यांशः भवति। एतत् पाठ्यांशस्य अध्ययनेन-

- वाल्मीकिमहर्षिम् उद्धिश्य ज्ञातुं प्रभवति।
- श्रीमद्रामायणम् उद्दिश्य पठितुं समर्थो भवति।
- आदर्शकुटुम्बजीवनविधानं लिखितुं प्रभवति।
- आदर्शसामाजिकजीवनविधानम् अवगन्तुं प्रभवति।
- आदर्शराज्यपालनविधानं लिखितुं प्रभवति।
- आदर्शसख्यजीवनं सम्पादयितुं प्रभवति।
- आदर्शमानवताम् उद्दिश्य वक्तुं प्रभवति।
- मानवतायाः श्रेष्ठताम् उद्दिश्य पठितुं प्रभवति।
- भारतीयादर्शसंस्कृतिम् अवगन्तुम् समर्थो भवति।
- आर्षसंस्कृतिं पठितुम् प्रभवति।
- धर्मपालनं प्रति वक्तुं समर्थो भवति।
- मानवस्य व्यक्तित्वविकासगुणान् अवगन्तुं प्रभवति।
- श्रीमद्रामायणस्य सङ्क्षिप्तकथां लिखितुं प्रभवति।
- सीता-राम- लक्ष्मण- भरत-हनुमदादीनाम् प्रमुखानां चरितं वक्तुं प्रभवति।
- रामराज्यवैभवं ज्ञातुं प्रभवति।

## १.२:पाठ्यांशपरिचयः - सङ्क्षेपरामायणम्।

Diploma In Sanskrit Examinations मध्ये इदं द्वितीयं पत्रं भवति। तत् च अङ्कानां शतस्य कृते आयोजितम्। तत्र पाठ्यांशद्वयं वर्तते। तत्र एकैकस्य पृथक् पृथक् पञ्चाशत् अङ्काः। तत्र ' सङ्क्षेपरामायणम् ' इति अन्यतरं भवति। प्रकृते अस्य रचयिता कः ? अस्य जीवनं कीदृशम् ? अस्य कविता कीदृशी ? संस्कृतसाहित्ये ग्रन्थस्य, ग्रन्थकर्तुश्च प्रभावः कः ? स्थानं च किम्? इत्येवमादिपरिचयः अत्र दीयते।

### १.२.१: वाल्मीकिः

' सङ्क्षेपरामायणम् 'इति अयं पाठ्यांशः पद्यात्मकः। श्रीमद्रामायणे अन्तर्गतः एकः सर्गः। श्रीमद्रामायणस्य कर्ता वाल्मीकिः। अतः 'सङ्क्षेपरामायणम्' इत्यस्यापि रचयिता वाल्मीकिः एव। वल्मीकात् जातः इति तस्य वाल्मीकिः इति नाम जातं स्यात्। वल्मीकः कश्चन ऋषिः स्यात्, तस्य पुम् अपत्यं वा स्यात् अयं वाल्मीकिः। किं च अस्यैव रत्नाकरः, ऋक्षः, प्राचेतसः, भार्गवः, इत्यादीनि नामान्तराण्यपि

सन्दर्भवशात् समापन्नानि। अयं जन्मना किरातः। अयं पूर्वार्धे क्रूरः परुषप्रवर्तनः च भवति। अनन्तरं सप्तर्षीणां मन्त्रोपदेशबलात् विनयसम्पन्नः, तपश्चरणशीलश्च भवति।

### १.२.२: वाल्मीकिः - जीवनदेशः

अयम् उत्तरभारतदेशीयः। तमसातीरवासी। अन्यैः ऋषिभिः शिष्यैश्च सह स्नानार्थं तमसां गच्छति। तत्पर्यन्तभूमिषु अस्य जीवनं प्रचलितम्। अतः अयम् उत्तरभारतदेशीयः, तमसायाः परीवाहकप्रान्तीयः इति वक्तुं शक्यते।

### १.२.३: वाल्मीकिः - जीवनकालः

श्रीमद्रामायणस्य अन्तिमः उत्तरकाण्डः । तत्र सीता वाल्मीकेः आश्रमे एव लव-कुशयोः जन्म ददाति इति, आश्रमे एव लव-कुशयोः वाल्मीकिः श्रीमद्रामाकथाम् शिक्षयति इति च वर्तते। तदनुसारेण च अयं श्रीमद्रामायणस्य कथायाः प्रचलनकालीनः इति च वक्तुं शक्यते। श्रीमद्रामायणस्य कथा च क्री.पू. ७.८ सहस्राब्दे प्रचलिता। अतः वाल्मीकेः अपि समयः क्री.पू. ७.८सहस्राब्दे एव आसीत् इति निश्चेतुं शक्यते।

### १.२.४:वाल्मीकिः - श्रीमद्रामायणस्य स्वरूपम्, वैशिष्टयम् च

श्रीरामस्य महनीयं जीवनचरितम् अत्र वर्णितम्। अस्मिन् षट् काण्डाः सन्ति। उत्तरकाण्डेन सह सप्त काण्डाः भवन्ति। ते च क्रमेण; १).बालकाण्डः २).अयोध्यकाण्डः ३).अरण्यकाण्डः ४).किष्किन्धकाण्डः ५).सुन्दरकाण्डः ६.)युद्धकाण्डः ७)उत्तरकाण्डः इति। पञ्चशतं(५००) अध्यायाः ,चतुर्विंशतिसहस्रं (२४०००) श्लोकाश्च सन्ति। श्रीमद्रामायणस्य भाषा सरला,शक्तिमयी च। प्रभावपूर्णा। विवरणात्मिका। मनवस्य अभ्युदयकराः क्रियाशीलकता, प्रयत्नशीलता,सहसिकता, कार्यदक्षता इत्येते गुणाः पदे पदे बोधिताः सन्ति।

श्रीमद्रामायणे भारतीयं गृहजीवनं समग्रं सुन्दरं च वर्णितम् अस्ति। मातापित्रोः, जायापत्योः, सुत-स्नुषयोः, अग्रज-अनुजयोः,गुरु-शिष्ययोः, शत्रु-मित्रयोश्च आदर्शप्रायः सम्बन्धः अत्र वर्णितः। कथाकथनम्, पात्रचित्रणम्, रसपोषणम्, धर्मोपदेशनम्, नीतिबोधनम्, एते च विषयाः समुचितरीत्या समुपकल्पिताः अस्मिन् काव्ये। पात्रचित्रणे च अस्य नैपुण्यं अद्वितीयम्। सीतारामौ लोकस्य आदर्शभूतौ दम्पती। रामो विग्रहवान् धर्मः, सीता च महासाध्वी, पतिसेवापरायणा। दशरथस्य पुत्रवात्सल्यम्,रामस्य पितृभक्तिम्, भरतादीनां भ्रातृभक्तिम्, हनूमतः स्वामिभक्तिम्, सुग्रीवस्य मैत्रीम्, वालि,रावणयोः बलपराक्रमादिकम्, मण्डोदर्याः पातिव्रत्यम्, विभीषणस्य सात्विकताम्, राक्षसानां दुष्कृत्यम्, शबरी-गुहादीनां रामभक्तिम्, परशुरामस्य राजसम्, विश्वामित्रस्य शिष्यवात्सल्यम्, जटायुषः कृतज्ञताम्, इन्द्रजितः पराक्रमम्, अक्ष्णां सक्षात्कृतवान्। अत्र च प्रकृतिवर्णनानि रम्याणि सुन्दराणि च सन्ति। भावाश्च ललिताः, गम्भीराः, हृद्याश्च भवन्ति।

श्रीमद्रामायणस्यैव शरणागतिशास्त्रम् इत्यपि प्रसिद्धिः वर्तते। सीतायाः चरितम्, पौलस्त्यवधः इत्यादीनि च नामान्तराणि सन्ति। श्रीमद्रामायणं न केवलं भारतीयभाषास्वेव, अपि तु बह्वीषु प्रपञ्चभाषास्वपि अनूदितं वर्तते। श्रीमद्रामायणम् अनुसृत्यैव महाकाव्यानि, चम्पूकाव्यानि, गद्यकाव्यानि, पद्यकाव्यानि, गेयकाव्यानि, रूपकाणि, बहूनि रचितानि सन्ति। प्रख्यातानि च सन्ति।

## १.३ः सङ्क्षेपरामायणम्

### १.३.१ः सङ्क्षेपरामायणम् - व्यवहाराः

श्रीमद्रामायणम्- बालकाण्डः- प्रथमसर्गः एव सङ्क्षेपरामायणम् इति नाम्ना प्रसिद्धिं प्राप्तः अस्ति। सम्पूर्णरामायणकथायाः इदं सङ्क्षेपरूपं वा सङ्क्षिप्तरूपं वा भवति। अतः इदं पुस्तकं सङ्क्षेपरामायणं ् वा सङ्क्षिप्तरामायणं वा भवति। अस्यैव मूलरामायणं बालरामायणम् इति च नामान्तराणि सन्ति। विस्तृतायाः रामकथायाः इदं मूलभूतम् इति कृत्वा मूलरामायणम् इति नाम जातम् अस्ति।बाल =अल्पपरिमाणम् रामायणम्, इति च कृत्वा बालरामायणम् इत्यपि च नाम आगतम्। एवं परिमाणगतां अल्पतां वा, कथागतां सङ्क्षिप्ततां वा पुरस्कृत्य अस्य एते व्यवहाराः जाताः।

### १.३.२ः सङ्क्षेपरामायणम् - कथासङ्ग्रहः

वाल्मीकिः मावानाम् अभ्युदयस्य आकङ्क्षी। मनवानाम् आदर्शचरितं बोधयितुं सङ्कल्पते। कदाचित् नारदं आदर्शगुणसम्पन्नं ज्ञापयितुं पृच्छति। नारदश्च लोककल्यणार्थी। स च अनुपदमेव स्पन्दितः भवति। श्रीरामचरितं ज्ञापयति। मानवानाम् आदर्शभूतः श्रीरामः सः इक्ष्वाकुवंशप्रभवः। नियतात्मा ,महाबलः, द्युतिमान्,श्रुतिमान् वशी। सर्वलक्षणसम्पन्नम् एनं राज्ये अभिषेक्तुं दशरथः अभिलषति।पूर्वं दत्तवरा कैकेयी अभिषेकसंरम्भान् पश्यति। श्रीरामस्य वनवासम्, भरतस्य अभिषेचनं च दशरथं वृणोति। कैकेय्याः प्रियकारणात्, पितुः वचननिर्देशाच्च श्रीरामः वनं प्रस्थितः भवति। लक्ष्मणः भ्रातरम् अनुगच्छति। सीता च भर्तारम् अनुसरति । ते गुहसहायेन गङ्गां तरन्ति। चित्रकूटं प्राप्नुवन्ति। भरद्वाजस्य आदेशानुसारं रम्यं कुटीरं निर्मान्ति । तत्र सुखं वसन्ति।

अयोध्यायां दशरथः श्रीरामस्य विवासनं न सहते। भृशं विलपति । श्रीरामस्य वियोगम् असहमानः विलपन् एव मृतः भवति। वसिष्ठप्रमुखाः मातुलगृहात् भरतम् आनयन्ति। राज्ये च अधिकुर्वन्ति। परं सः न अङ्गीकरोति । भरतः पितुः अन्तिमसंस्कारान् च निर्वर्तते। श्रीराममेव आनीय राज्यं दातुं भरतः अरण्यं प्रस्थितः भवति। श्रीरामः राज्यं नेच्छति।पादुके तस्मै ददाति। तं च निवर्तयति। भरतः नन्दिग्रामे पादुके अभिषेचयति। तौ उपस्पृशन् राज्यं करोति। श्रीरामः चित्रकूटे गतेभ्यः आगतेभ्यः च असौकर्यम् अनुभवति। अतः तस्मात् दण्डकारण्यं प्रविशति।

तत्र रामः विराधं हन्ति । शरभङ्गम्, अगस्त्यं च सम्पश्यति। दिव्यन्यस्त्राणि प्राप्नोति।एकदा ऋषयश्च रामं समेत्य रक्षसाम् वधाय पृच्छन्ति।रामेण च संयति रक्षसां वधं प्रतिज्ञास्यति। शूर्पणखां

विरूपितां करोति। खर-त्रिशिरस-दूषणप्रमुखानां रक्षसां चतुर्दशसहस्त्रं तत्र रामेण निहतं भवति। ज्ञातीनां वधेन रावणः क्रोधेन मूर्छितः भवति । मारीचस्य सहायं पृच्छति।मारीचश्च रावणं वारयति।तथापि कालचोदितः सः न शृणोति।मारीचः श्रीरामस्य आश्रमपदं प्राप्नोति। स्वर्णमृगस्य रूपं धरति।सीतायाः इच्छाविषयः भवति। रामं दूरं नयति।रावणश्च सीताम् अपहरति । अवरुद्धं जटायुषं छिनत्ति। श्रीरामश्च सीतायाः अपहरणं शृणोति।बहुधा विलपति।सीतां मार्गमाणः कबन्धं पश्यति।शबरीम् अनुगृह्णाति। राम-लक्ष्मणौ पम्पातीरम् अधिगच्छतः। तत्र हनूमान् तौ समागच्छति। स च श्रीरामं सुग्रीवेण समावेशयति।श्रीरामः स्वीयं वृत्तान्तं सर्वं, विशिष्य सीतायाः अपहरणम् सुग्रीवाय निवेदयति। राम-सुग्रीवयोः अग्निसाक्षिकं सख्यं जायते। राम-सुग्रीवौ परस्परं स्वीयबलपराक्रमादिकं जानीतः। परस्परं विश्वाससम्पन्नौ भवतः।

श्रीरामः वालिनं हन्ति। सुग्रीवं वानरराज्ये प्रतिष्ठापयति। सुग्रीवः सीतान्वेषणायअङ्गदप्रमुखान् प्रेषयति। सम्पाति वचनात् हनूमान् समुद्रं तरति। लङ्कां प्राप्नोति। तत्र सीतां पश्यति। हनूमान् राममुद्रिकां सीतायै ददाति। ब्रह्मास्त्रेण रावणसभां प्रविशति। रावणं सन्दिशति।लङ्कां दहति। पुनः अङ्गदान् मिलति। श्रीरामाय सीतायाः दर्शनं निवेदयति। श्रीरामः सुग्रीवेण सह समुद्रतीरं प्राप्नोति। नलः समुद्रे सेतुं निर्मितः। तेन समुद्रं तीर्णाः। श्रीरामश्च रावणं हन्ति।सीतां प्राप्नोति। परं व्रीडां गच्छति। सीतां परुषं भाषते। सीता अग्निं प्रविशति। अग्निश्च सीतां विगतकल्मषां प्रकटयति। तस्य च सर्वे देवगणाः, ऋषिगणाश्च तृप्तिम् उपयान्ति। श्रीरामः विभीषणं राज्ये प्रतिष्ठापयति । सर्वे पुष्पकम् आरोहन्ति, अयोध्याम् प्रस्थास्यन्ति।

### १.३.३: सङ्क्षेपरामायणम्-वैशिष्ट्यम्

श्रीमद्रामायणे बालकाण्डस्य प्रथमः सर्गः सङ्क्षेपरामायणं भवति। अत्र च शतं श्लोकाः सन्ति। काण्ड विभागः नैव भवति। विस्तृतायाः रामायणकथायाः सङ्क्षिप्तकथा एव अत्र उपलभ्यते। अत्र वर्णनानि न भवन्ति। पात्रचित्रणं न भवति। रसपोषणं न विद्यते। उपदेशादिकं न भवति।सम्पूर्णकथायाः केवलं स्थूलरूपं (Sketch) अत्र लभ्यते।पवित्रचरितस्य मननाय,पठनाय च सौकर्यकारि इदं सङ्क्षेपरामायणम्। प्रतिभारतीयस्य श्रीमद्रामायणकथायाः परिचयसम्पादनाय बहु उत्तमं भवति। सङ्क्षेपरामायणम्।

## १.४: उपसंहारः

एवम् अत्र वाल्मीकेः-जीवनदेशः,जीवनकालः,श्रीमद्रामायणस्य स्वरूपम्, वैशिष्टयम्, कविता-वैशिष्टयम् सङ्क्षेपरामायणस्य स्वरूपम्,सङ्क्षिप्तकथा, वैशिष्ट्यम् इत्येते विषयाः प्रस्तुताः भवन्ति।एवम् अयं पाठ्यांशः श्रीमद्रामायणस्य ,वाल्मीकेश्च संक्षिप्तं परिचयं प्राप्तुम् उद्दिष्टः भवति ।

## १.५: अभ्यासः

अ) श्रीमद्रामायणस्य वैशिष्ट्यं लिखत?

इ) सङ्क्षेपरामायणस्य नामान्तराणि, प्रामुख्यं च विवृणुत ?

# अंशः-II; श्रीरामस्य गुणवैभवम्

२.० परिचयः
२.१.लक्ष्याणि
२.२.श्रीरामस्य गुणवैभवम्
२.२.१.वाल्मीकेः प्रश्नकरणम्
२.२.१.१ व्यक्तित्वविकासात्मकाः गुणाः
२.२.१.२ सदाचारसम्पादकाः गुणाः
२..२.१.३ आत्मगुणाः-साहसगुणाः
.२.२.१.४.वाल्मीकेः जिज्ञासाप्रकटनम्
२.२.२ नारदस्य समाधानम्
२.२.२.१.समाधानाय नारदस्य उपक्रमणम्
२.२.२.२.आदर्शगुणानां दुर्लभत्वम्
२.२.२.३.आदर्शपुरुषत्वेन श्रीरामस्य प्रख्यापनम् तस्य वैयक्तिकगुणानां वर्णनम्
२.२.२.४ .श्रीरामस्य शारीरकगुणानां वर्णनम्
२.२.२.५ .श्ररीमस्य पालनगुणानां वर्णनम्
२.२.२.६ .श्रीरामस्य विद्वद्गुणानां वर्णनम्
२.२.२.७ .श्रीरामस्य उदात्तगुणानां वर्णनम्
२.२.२.८ .श्रीरामस्य आत्मोत्कर्षदायकगुणानां वर्णनम्
२.३ उपसंहारः
२.४ अभ्यासः

## २.० परिचयः

श्रीमद्रामायणम् आदिकाव्यम्। अस्य रचयिता वाल्मीकिः आदिकविः। आदर्शपुरुषस्य श्रीरामस्य महनीयं जीवनचरितम् अत्र वर्णितम्। अस्मिन् षट् काण्डाः, चतर्विंशतिसहस्रं श्लोकाश्च सन्ति। रामायणस्य काण्डेषु प्रथमः बालकाण्डः। तत्र च प्रथमः सर्गः सङ्क्षेपरामायणम्। इदं च रामायणस्य विषयसूचकं भवति। सम्पूर्णा रामकथा सङ्क्षिप्तरूपेण अत्र लभ्यते।

प्रकृतः, श्रीरामगुणवैभवम् इति पाठ्यांशः, सङ्क्षिप्तरामायणे प्रथमश्लोकतः प्रारभ्य एकोनविंशतिश्लोकपर्यन्तम् अस्ति। आदर्शपुरुषं ज्ञातुं वाल्मीकेः प्रश्नकरणं, नारदस्य समाधानं च अत्र वर्णितं विद्यते। नारदः समाधाने श्रीरामम् आदर्शपुरुषत्वेन संसूचयति। तस्य गुणगणान् ज्ञापयति।। अयं च पाठ्यांशः रामायाणे बालकाण्डकथायाः संग्रहो भवति।

## २.१. लक्ष्याणि

'जन्तूनां नरजन्म दुर्लभम्' इति वचनं मानवजन्मनः उत्तमत्त्वम् उन्नतत्त्वं च प्रकटयति। मानवस्य सौकर्यसम्पन्नं शरीरं, दर्शन - श्रवण - आस्वादनादीनाम् उपभोगाय इन्द्रियाणि, सुख - दुःखादीनाम् अनुभवाय मनः, विवेचनाय बुद्धिः, एवं एषा सामग्री मानवाभ्युदयाय सङ्कलिता अस्ति। मानवश्च एतया सामग्र्या प्रयत्नपूर्वकं महनीयः भवेत्। महनीयतायाः साधने, मनसः प्रभावः पात्रं च अधिकं विद्यते। मनः यदि उत्तमं चिन्तयति मानवः उदात्तजनः भवति। मनः यदि उत्तमं पश्यति तदा उत्तमस्सन् दूरदर्शी भवति। मनः यदि उत्तमं खादति सः शुद्धस्सन् आरोग्यवान् भवति। अतः मनसः उत्तमत्त्वम् अभ्यसनीयम्। आदर्शपुरुषस्य दर्शनेन श्रवणेन सेवनेन , तस्य चरिताध्ययनेन मननेन तद्गुणकथनेन च भ्रमरकीटकवत् मानवेन आदर्शत्वं सम्पाद्यते। एवं मानवानां मनस्सु आदर्शत्वस्य पूरणाय,अभ्यसनाय च आदर्शनीयताम्प्रति आलोचनासम्पादनं एतत्पाठ्यांशस्य प्रमुखं लक्ष्यम् अस्ति। एततपाठ्यांशस्य अध्ययनेन —

- आदर्शपुरुषस्य गुणानां परिचयः सम्पादितो भवति।
- आदर्शपुरुषस्य शारीरकगुणानां लेखनाय समर्थो भवति।
- आदर्शपुरुषस्य व्यक्तित्वाधायकगुणान् वक्तुं प्रभवति।
- आदर्शपुरुषस्य परिपालनागुणान् अवगन्तुं शक्तो भवति।
- आदर्शपुरुषस्य विद्वद् गुणान् लिखितुं शक्तो भवति।
- आदर्शपुरुषस्य आत्मोत्कर्षाधायकगुणेषु जिज्ञासितो भवति।

## २.२ श्रीरामस्य गुणवैभवम्

### २.२.१वाल्मीकेः प्रश्नकरणम्

तपस्स्वाध्यायनिरतम् तपस्वी वाग्विदां वरम् ।
नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम् ।। १ ।।

पद्यपरिचयः; अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः; 'वाल्मीकिः कदाचित् मानवानाम् अभ्यदयस्य सम्पादनाय आदर्शगुणसम्पन्नं ज्ञापयितुं नारदं पृच्छति' इत्येतदंशं निरूपयन् अयं श्लोकः 'श्रीरामस्य गुणवैभवम्' इत्येतत् नामके बालकाण्डकथाभागे वर्तते।

पदविभागः; तपस्स्वाध्यायनिरतम्, तपस्वी, वाग्विदाम्, वरम् ।
नारदम् ,परिपप्रच्छ, वाल्मीकिः, मुनिपुङ्गवम् ।।

अन्वयक्रमः; तपस्वी,वाल्मीकिः,तपस्स्वाध्यायनिरतम्,वाग्विदाम्,वरम्,मुनिपुङ्गवम्,नारदम्,परिपप्रच्छ।

प्रतिपदार्थः; तपस्वी= मानवाभ्युदयाय तपश्चरणशीलः; वाल्मीकिः= वाल्मीकि नाम मुनिः; तपस्स्वाध्यायनिरतम्, तपस्= तपसि; स्वाध्याय= वेदाध्ययने च, निरतम्= तत्परम्, वाग्विदाम्= पदशक्तितत्त्वज्ञानाम्; वरम्=कुशलम्; मुनिपुङ्गवम् = मुनिश्रेष्ठम्; नारदम् = नारदनामानं देवर्षिम्; परिपप्रच्छ = सोत्कण्ठं प्रश्नं चकार।

श्लोकभाव; तप्यते इति तपः, चिन्तनम्, तद्वान्, तपस्वी।प्रकृते सः तपस्वी वाल्मीकिः मानवाभ्युदयचिन्तनशीलः। नारदः मानवानाम् अभ्युदयस्य सम्पादनाय, वेदोक्तमार्गान्वेषणे तत्परः भवति। तेनैव कारणेन नारदः मुनिपुंगवः जातः। किञ्च पारान् बोधयितुं आवश्यकम् अभिप्रायाविष्करणसामर्थ्यम् अपि नारदस्य अस्ति। अतः अयं पदप्रयोगेषु कुशलः सम्पन्नः।भाषणकुशलः तथा च - मानवाभ्युदयचिन्तनशीलः वाल्मीकिः, मानवाभ्युदयसाधने वेदोक्तमार्गान्वेषणे तत्परं नारदं अभिप्रायाविष्करणसामथ्यर्स्य सत्त्वात् कदाचित् एवं पृच्छति।

समासाः; तपस्स्वाध्यायनिरतम्;तपःस्वाध्याययोः निरतः,तम् = सप्तमीतत्पुरुषसमासः।

मुनिपुङ्गवम्; मुनिषु पुङ्गवः ,तम् = सप्तमीतत्पुरुषसमासः।

कोशः क) स्वाध्यायः; स्वाध्यायः वेद-तपसोः (वैजयन्तीकोशः)

ख) पुङ्गवः; बुधे च पुङ्गवः श्रेष्ठे वृषभे भिषजां वरे (विश्वकोशः)

**स्वावलोकनप्रश्नाः**

१. तपः नाम किम् ?

२. अभिप्रायाविष्करणसामर्थ्यं किमर्थम् आवश्यकम् ?

**२.२.१.१ व्यक्तित्वविकासात्मकाः गुणाः**

कोन्वस्मिन् साम्प्रतं लोके गुणवान् कश्च वीर्यवान् ।
धर्मज्ञश्च कृतज्ञश्च सत्यवाक्यो दृढव्रतः ।। २ ।।

पद्यपरिचयः; अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः; 'वाल्मीकिः व्यक्तित्वपूर्णम् आदर्शपुरुषं ज्ञापयितुं नारदं पृच्छति'इत्येतदंशं निरूपयन् अयं श्लोकः 'श्रीरामस्य गुणवैभवम्' इत्येतत् नामके बालकाण्ड-कथाभागे वर्तते।

पदविभागः; कः, नु, अस्मिन्, साम्प्रतम् ,लोके, गुणवान्, कः, च, वीर्यवान् ।
धर्मज्ञः, च, कृतज्ञः, च, सत्यवाक्यः, दृढव्रतः ।।

अन्वयक्रमः; साम्प्रतम्, अस्मिन्, लोके, गुणवान् कः,नु ? च, वीर्यवान् कः? धर्मज्ञः? कृतज्ञः, सत्यवाक्यः, दृढव्रतः, च ,कः(अस्ति) ?

प्रतिपदार्थः; साम्प्रतम् = इदानीम्; अस्मिन् = एतस्मिन्, लोके = मर्त्यलोके; गुणवान् = आदर्शगुणसम्पन्नः; कः नु = कः भवति, वीर्यवान् =सततोत्साहशीली पराक्रमसम्पन्नः; कः = कः

अस्ति ; धर्मज्ञः =स्वविधिनिर्वहणानुष्ठानपरः,कृतज्ञः=कृतस्य उपकारस्य स्मरणशीलः, सत्यवाक्यः = सत्यवचनः; दृढव्रतः = दृढसङ्कल्पः; च= अपि , कः = कः पुरुषः अस्ति?

श्लोकभावः; ' हे महर्षे ! इदानीम् अस्मिन् जगति कः खलु विशिष्टगुणसम्पन्नः वर्तते? पराक्रमोपेतश्च कः अस्ति? को नु धर्मतत्त्ववेत्ता भवति? परैः कृतस्य उपकारस्य स्मर्ता , स्मनणशीलः कः? सततं कः सत्यं वदति ? कष्टानि अनुभूय अपि कः प्रतिज्ञां पालयति ? तादृशं व्यक्तित्वाधायकं आदर्शपुरुषं कथयतु' इति वाल्मीकिः नारदं पृच्छति ।

व्याकरणांशः; सन्धयः; कोन्वस्मिन् ;कोनु+अस्मिन् (उ + अ = व् ) यणादेशसन्धिः।

समासाः; सत्यवाक्यः ; सत्यं वाक्यं यस्य सः =बहुव्रीहिसमासः।

दृढव्रतः ; दृढ व्रतं यस्य सः= बहुव्रीहिसमासः।

सर्वभूतेषु ;सर्वाणि च तानि भूतानि,सर्वभूतानि,तेषु = कर्मधारयसमासः ।

कोशः- नु = नु पृच्छायां , विकल्पे च (अमरकोशः)

**स्वावलोकनप्रश्नाः**

१.वीर्यवान् नाम कः?

२ 'धर्मज्ञः'इत्यस्य अर्थः कः ?

**२.२.१.२ सदाचारसम्पादकाः गुणाः**

चारित्रेण च को युक्तः सर्वभूतेषु को हितः ।
विद्वान् कः कः समर्थश्च कश्चैकप्रियदर्शनः ।। ३ ।।

पद्यपरिचयः; अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः; 'सदाचारसम्पन्नम् आदर्शपुरुषं सूचयितुं वाल्मीकिः नारदं पृच्छति' इत्येतदंशं निरूपयन् अयं श्लोकः 'श्रीरामस्य गुणवैभवम्' इत्येतत् नाामके बालकाण्ड-कथाभागे वर्तते।

पदविभागः; चारित्रेण, च, कः ,युक्तः, सर्वभूतेषु, कः, हितः ।
विद्वान्, कः, कः,समर्थः ,च ,कः,च, एकप्रियदर्शनः ।।

अन्वयक्रमः; चारित्रेण च युक्तः कः ? सर्वभूतेषु हितः कः? विद्वान् कः? समर्थः च कः ? एकप्रियदर्शनः च कः (अस्ति) ?

प्रतिपदार्थः; चारित्रेण=सदाचारेण ,सत्प्रवर्तनेन च, युक्तः = सम्पन्नः; कः=कः अस्ति, सर्वभूतेषु, सर्व=सर्वेषु, भूतेषु = प्राणिषु; हितः=श्रेयोभिलाषी, कः=कः भवति, विद्वान् =शास्त्रज्ञः; कः=कः विद्यते , समर्थः = दक्षः; कः=कः वर्तते, एकप्रियदर्शनः = सर्वेषां नित्यं प्रियम् आदधानः;च =अपि , कः= कः अस्ति।

श्लोकभावः; -हे महर्षे ! कस्य जीवनचरितं महत्वपूर्णम् अस्ति? कस्य प्रवर्तनं आदर्शभूतं वर्तते?

सर्वेषां प्राणिनां हितं कः चिन्तयति? निखिलशास्त्रनिष्णातः को नु वर्तते वा? सर्वेषां कार्याणां सम्पादने समर्थः कः? सर्वेषां प्रियश्च कः भवति ? इति सदाचारसम्पन्नम् आदर्शपुरुषं सूचयितुं वाल्मीकिः नारदं पृच्छति ।

सन्धयः; कश्चैक..;कश्च+एक....(अ + ए = ऐ) वृद्धिसन्धिः।

समासाः; एकप्रियदर्शनः;एकं (केवलम्) प्रियं दर्शनम् यस्य सः= बहुव्रीहिसमासः।

कोशः; असूया; असूया तु दोषारोपो गुणेष्वपि (अमरकोशः)

**स्वावलोकनप्रश्नाः**

१ विद्वान् नाम कः ?

२ सर्वभूतेषु हितः 'इत्यस्य अर्थः कः

**२.२.१.३ आत्मगुणाः - साहसगुणाः**

आत्मवान् को जितक्रोधो द्युतिमान् कोऽनसूयकः ।
कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे ।।४ ।।

पद्यपरिचयः; अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः; 'आत्मगुणसम्पन्नम् आदर्शपुरुषं सूचयितुं वाल्मीकिः नारदं पृच्छति' इत्येतदंशं निरूपयन् अयं श्लोकः 'श्रीरामस्य गुणवैभवम्' इत्येतत्-नामके बालकाण्डकथाभागे वर्तते।

पदविभागः; - आत्मवान् ,कः, जितक्रोधः, द्युतिमान्, कः, अनसूयकः ।
कस्य, बिभ्यति, देवाः, च, जातरोषस्य, संयुगे ।।

अन्वयक्रमः; - आत्मवान् कः ? जितक्रोधः कः ? द्युतिमान् कः ? अनसूयकः कः (च अस्ति)? संयुगे जातरोषस्य कस्य देवाः च बिभ्यति ?

प्रतिपदार्थः ; आत्मवान् = आत्मगौरवसम्पन्नः; कः = कः विद्यते? जितक्रोधः = वशीकृतक्रोधः; कः = कः अस्ति? द्युतिमान् = कान्तिसम्पन्नः; कः = कः विद्यते? अनसूयकः = असूयारहितः , कः = कः अस्ति? संयुगे= समरे; जातरोषस्य कस्य= सञ्जातकोपस्य कस्य; देवाः = अमराः; च = अपि; बिभ्यति = भीताः भवन्ति ?

श्लोकभावः;'हे महर्षे! सर्वःअपि आत्मानं गौरवास्पदं कर्तुं प्रयतेत। तादृशः आत्मगौरवसम्पन्नः(Self-respected) वा,आत्मशक्तिसम्पन्नः(Self-Possessed) वा कः अपि वर्तते वा ? पुनश्च स्वाधीनान्तःकरणः (जितेन्द्रियः) को नु वर्तते वा ? क्रोधरहितः कोऽपि विद्यते वा ? तेजस्वी (कान्तिसम्पन्नः) असूयाशून्यश्च पुरुषः कः अस्ति ? युद्धभूमौ संजातक्रोधात् कस्मात् देवाः अपि भीताः भवन्ति? तादृशम् आत्मगुणसम्पन्नं व्यक्तिविशेषं कृपया सूचयतु' इति वाल्मीकिः नारदं पृच्छति।

सन्धिः ;कोऽनसूयकः;कः + अनसूयकः (अः + अ =ओऽ) विसर्गसन्धिः।
समासः; - जितक्रोधः = जितः क्रोधः येन सः =बहुव्रीहिसमासः।
जातरोषस्य = जातः रोषः यस्य सः,तस्य =बहुव्रीहिसमासः।
अनसूयकः = न असूयकः= नञ्तत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः**

१). आत्मवान् नाम कः ?
२).द्युतिमान् इत्यस्य अर्थः कः ?

**२.२.१.४.वाल्मीकेः जिज्ञासाप्रकटनम्**

एतदिच्छाम्यहं श्रोतुं परं कौतूहलं हि मे ।
महर्षे त्वं समर्थोऽसि ज्ञातुम् एवंविधं नरम् ।। ५ ।।

पद्यपरिचयः; अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः; वाल्मीकिः आदर्शगुणसम्पन्नं व्यक्तिविशेषं ज्ञातुं स्वस्य इच्छां नारदाय विज्ञापयति इत्येतदंशं निरूपयन् अयं श्लोकः 'श्रीरामस्य गुणवैभवम्' इत्येतत्-नामके बालकाण्डकथाभागे वर्तते।

पदविभागः - एतद्, इच्छामि, अहम्, श्रोतुम्, परम्, कौतूहलम्, हि, मे ।
महर्षे ,त्वम्, समर्थः,असि, ज्ञातुम्, एवंविधम्, नरम् ।।

अन्वयक्रमः - महर्षे ! अहम् एतत् श्रोतुम् इच्छामि। हि मे परं कौतूहलम् (अस्ति) । त्वं (च) एवंविधं नरं ज्ञातुं समर्थः असि ।

प्रतिपदार्थः -महर्षे ! = नारदमुने !; अहम् = वाल्मीकिः अहम्; एतत् = इदम्; श्रोतुम् = आकर्णितुम्; इच्छामि = वाञ्छामि; हि =यस्मात् कारणात्, मे = वाल्मीकेः मम, परं=प्रकामम्, कौतूहलम्=कौतुकम्, अस्ति = विद्यते, त्वम् च = भवान् नारदः च; एवं विधम् = एतादृशं गुणसम्पन्नम्; नरम् = पुरुषविशेषम् ; ज्ञातुम्= अवगन्तुम्; समर्थः = दक्षः ; असि = भवसि;

श्लोकभावः - हे महर्षे नारद! एतत् सर्वं ज्ञातुं मे मनसि महती उत्कण्ठा विद्यते, त्वं च मम जिज्ञासितं गुणसम्पन्नं तं पुरुषं ज्ञातुं सर्वथा समर्थः असि (अतः त्वत्तः)इमं श्रातुम् इच्छामि।

सन्धयः -इच्छाम्यहं =इच्छामि + अहं (इ +अ =य् ) यणादेशसन्धिः।
समर्थोऽसि =समर्थः + असि (विसर्गः +अ =ओ)विसर्गसन्धिः।

स्वावलोकनप्रश्नाः १). एतद् इच्छामि अहम्'अत्र 'अहम्' नाम कः ?
२). 'महर्षे त्वम् समर्थः असि'अत्र 'त्वम्' नाम कः ?

## २.२.२ नारदस्य समाधानम्

### २.२.२.१समाधानाय नारदस्य उपक्रमणम्

श्रुत्वा चैतत् त्रिलोकज्ञो वाल्मीकेर्नारदो वचः ।
श्रूयतामिति चामन्त्र्य प्रहृष्टो वाक्यमब्रवीत् ।। ६ ।।

पद्यपरिचयः;अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः; 'वाल्मीकेः प्रश्नस्य नारदः समाधानं दातुम् उपक्रमते 'इत्येतदंशं निरूपयन् अयं श्लोकः 'श्रीरामस्य गुणवैभवम्' इत्येतत् नामके बालकाण्डकथाभागे वर्तते।

पदविभागः; श्रुत्वा, च,एतत्, त्रिलोकज्ञः, वाल्मीकेः, नारदः, वचः ।
श्रूयताम्, इति, च, आमन्त्र्य, प्रहृष्टः, वाक्यम्, अब्रवीत् ।।

अन्वयक्रमः ;- त्रिलोकज्ञः, नारदः, वाल्मीकेः, वचः, श्रुत्वा, प्रहृष्टः (सन्) आमन्त्र्य, च, 'श्रूयताम्' इति,एतद्, वाक्यम्, अब्रवीत्।

प्रतिपदार्थः;- त्रिलोकज्ञः = लोकत्रयसमाचारज्ञः; नारदः = देवर्षिः नारदः; वाल्मीकेः = वाल्मीकिमहर्षेः; वचः = वचनम्; श्रुत्वा = आकर्ण्य; प्रहृष्टः = प्रसन्नः;(सन्) आमन्त्र्य = आहूय /सम्बोध्य; च = अपि ,श्रूयताम् इति = आकर्ण्यताम् इति; एतत् = इदम् (वक्ष्यमाणं) वाक्यम् = वचनम्; अब्रवीत् = अवदत्;

श्लोकभावः;नारदः देवानां ऋषीणां च स्वभावम् अधिगच्छति। अत एव नारदः देवर्षिः भवति। किञ्च अयं त्रिलोकज्ञः,त्रयाणां लोकानां समाचारं जानाति।सद्गुणविशिष्टस्य आदर्शपुरुषस्य सूचनाय वाल्मीकेः जिज्ञासां शृणोति। सन्तुष्टः भवति। अनन्तरं सम्बोध्य 'श्रूयताम्' इति वक्ष्यमाणं वाक्यं वदति।

सन्धयः; चैतत्; च + एतत् ( अ + ए = ऐ )वृद्धिसन्धिः।
नारदो वचः; नारदः + वचः (विसर्गः +व् = ओ ) विसर्गसन्धिः।
प्रहृष्टो वाक्यम्; प्रहृष्टः + वाक्यम् (विसर्गः + व्= ओ )विसर्गसन्धिः।
चामन्त्र्य; च + आमन्त्र्य (अ + आ = आ )सवर्णदीर्घसन्धिः।

समासाः; त्रिलोकज्ञः त्रयाणां लोकानां समाहारः त्रिलोकम् = समाहारद्वन्द्वः।
त्रिलोकज्ञः; त्रिलोकं जानाति इति = उपपदसमासः।

**स्वावलोकनप्रश्नाः**

१). त्रिलोकज्ञः' इत्यस्य अर्थः कः ?

२). श्रूयताम्' इति कं सम्बोधयति ?

**२.२.२.२.आदर्शगुणानां दुर्लभत्वम्**

बहवो दुर्लभाश्चैव ये, त्वया कीर्तिता गुणाः ।
मुने वक्ष्याम्यहं बुद्ध्वा, तैर्युक्तः श्रूयतां नरः ।। ७ ।।

पद्यपरिचयः; अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः; नारदः वाल्मीकेः वचसः स्पन्दते इत्येतदंशं निरूपयन् अयं श्लोकः 'श्रीरामस्य गुणवैभवम्' इत्येतत्-नामके बालकाण्डकथाभागे वर्तते।

पदविभागः - बहवः, दुर्लभाः, च, एव, ये, त्वया, कीर्तिताः, गुणाः ।
मुने , वक्ष्यामि, अहम्, बुद्ध्वा, तैः,युक्तः, श्रूयताम्, नरः ।।

अन्वयक्रमः - मुने ! त्वया बहवः दुर्लभाः गुणाः ये कीर्तिताः तैः युक्तः नरः श्रूयताम् । अहं बुद्ध्वा वक्ष्यामि ।

प्रतिपदार्थः - मुने ! = हे महर्षे ! हे वाल्मीके! ; त्वया = भवता; बहवः = अनेके; दुर्लभाः = दुखेनापि लब्धुम् अयोग्याः; गुणाः = आदर्शगुणाः;ये = यादृशाः, कीर्तिताः = पृष्टाः; तैः = उक्तैः तादृशैः गुणैः; युक्तः = सम्पन्नः; नरः = व्यक्तिविशेषः; श्रूयताम् = आकर्ण्यताम्; अहम् = नारदः अहम्; बुद्ध्वा = अवगत्य; वक्ष्यामि = कथयिष्यामि।

श्लोकभावः; महर्षिः नारदः वाल्मीकिम् — हे वाल्मीके ! भवता बहवः गुणाः उक्ताः।तेषु अनेके गुणाः दुःखेनापि लब्धुम् अशक्याः। तथापि स्मारिताः अस्मारिताः ये च गुणाः सन्ति,तैः गुणैः सम्पन्नं व्यक्तिविशेषम् अहं ब्रवीमि (त्वया) श्रूयताम् 'इति उन्मुखीकरोति।

सन्धिः - बहवो दुर्लभाः; बहवः + दुर्लभाः (विसर्गः + द्=ओ)विसर्गसन्धिः।
चैव; च + एव (अ + ए =ऐ) वृद्धिसन्धिः।
वक्ष्याम्यहम्; वक्ष्यामि + अहम् (इ + अ =य्) यणादेशसन्धिः।

कोशः -नरः -पुरुषाः पूरुषाः नराः (निघण्टुः)

**स्वावलोकनप्रश्नाः**

१). 'ये त्वया कीर्तिताः गुणाः' अत्र 'त्वया' इति पदं कं सम्बन्धयति?
२). 'दुर्लभाः' इत्यस्य अर्थः कः ?

**२.२.२.३.आदर्शपुरुषत्वेन श्रीरामस्य प्रख्यापनम्**
**तस्य वैयक्तिकगुणानां वर्णनम्**

इक्ष्वाकुवंशप्रभवो रामो नाम जनैः श्रुतः ।
नियतात्मा महावीर्यो द्युतिमान् धृतिमान् वशी ।। ८ ।।
बुद्धिमान् नीतिमान् वाग्मी श्रीमाञ्छत्रुनिबर्हणः ।

## सङ्क्षेपरामायणम्

पद्यपरिचयः; अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः; श्रीरामः आदशगुणसम्पन्नः, इत्येतदंशं निरूपयन् अयं श्लोकः 'श्रीरामस्य गुणवैभवम्' इत्येतत्-नामके बालकाण्डकथाभागे वर्तते। अस्मिन् पद्ये नारदः महर्षये श्रीरामस्य प्रख्यातान् गुणान् कथयति।

पदविभागः; - इक्ष्वाकुवंशप्रभवः, रामः, नाम, जनैः, श्रुतः ।
नियतात्मा, महावीर्यः, द्युतिमान्, धृतिमान्, वशी ।।
बुद्धिमान्, नीतिमान्, वाग्मी, श्रीमान्, शत्रुनिबर्हणः ।

अन्वयक्रमः; - (मुने ! मया ख्याप्यमानः आदर्शः पुरुषः )इक्ष्वाकुवंशप्रभवः ।(सः)रामः नाम जनैः श्रुतः (अस्ति)(सः) नियतात्मा; महावीर्यः; द्युतिमान्; धृतिमान् ;वशी; बुद्धिमान्; नीतिमान्; वाग्मी. श्रीमान्; शत्रुनिबर्हणः(अस्ति)

प्रतिपदार्थः; मुने! = हे महर्षे ! हे वाल्मीके! (मया=नारदेन; ख्याप्यमानः=निवेद्यमानः;आदर्शः= अनुसर्तुं योग्यः; पुरुषः= पुमान्;)इक्ष्वाकुवंशप्रभवः, इक्ष्वाकु= इक्ष्वाकोः; वंश = कुले;प्रभवः= जातः; (सः=इक्ष्वाकुवंशे जातः सः) जनैः = प्रजाभिः; रामः इति = श्रीरामः इति; नाम = नाम्ना ; श्रुतः =प्रसिद्धः; (अस्ति = भवति) (सः=श्रीरामः) नियतात्मा =स्वाधीनान्तःकरणः (SELF- CONT ROLLED); महावीर्यः = सततं उत्साहशीलः(SPORTIVE) प्रतापवान् पराक्रमशाली; द्युतिमान् = कान्तियुक्तः; वशी = जितेन्द्रियः; बुद्धिमान् = बुद्ध्या विवेचनपरः; नीतिमान् = प्रवर्तननियमावल्या (CODE OF CON-DUCT) कार्यकरणशीलः; वाग्मी= मृदुभाषी; श्रीमान्= सम्पद्युक्तः (DESCENT); शत्रुनिर्बहणः= रिपुसूदनः; श्लोकभावः;इक्ष्वाकुः सूर्यवंशीयेषु प्रसिद्धः। तत्र इक्ष्वाकुवंशे समुत्पन्नः अयं, जनेषु राम इति नाम्ना प्रसिद्धः भवति । असौ (पुरुषः) स्वाधीनमनाः, महापराक्रमशाली, कान्तिमान्, धैर्यवान्, जितेन्द्रियः सः रामः प्रशस्तबुद्धिसम्पन्नः (INTELLIGENT) नीतिनिष्णातः,शोभावान् शत्रुसंहारकः च अस्ति।

सन्धयः; नियतात्मा; नियत + आत्मा ( अ + आ =आ )सवर्णदीर्घसन्धिः।
महावीर्यो द्युतिमान् ; महावीर्यः + द्युतिमान्(विसर्गः + म्(हश्) =ओ )विसर्गसन्धिः
श्रीमाञ् शत्रुनिबर्हणः;श्रीमान् + शत्रुनिबर्हणः(न् + श् = ञ्) श्चुत्वसन्धिः
श्रीमाञ्छत्रुनिबर्हणः;श्रीमाञ्+ शत्रुनिबर्हणः(ञ् +श् = छ) छत्वसन्धिः

समासाः; इक्ष्वाकुवंशः ; इक्ष्वाकोः वंशः = षष्ठीतत्पुरुषसमासः।
इक्ष्वाकुवंशप्रभवः इक्ष्वाकुवंशः प्रभवः यस्य सः = बहुव्रीहिसमासः।
नियतात्मा;नियतः आत्मा यस्य सः = बहुव्रीहिःसमासः।
महावीर्यः ;महद् वीर्यं यस्य सः = बहुव्रीहिःसमासः।

कोशः; धृतिः - धृतिस्तु तुष्टि-सन्तोषः (वैजयन्तीकोशः)

**स्वावलोकनप्रश्नाः**

१). महावीर्यः नाम कः ?

२). 'नीतिमान् ' इति पदं किम् अर्थं सूचयति ?

**२.२.२.४ श्रीरामस्य शारीरकगुणाः (physical Features)**

विपुलांसो महाबाहुः कम्बुग्रीवो महाहनुः ।। ९ ।।
महोरस्को महेष्वासो गूढजत्रुररिन्दमः ।
आजानुबाहुः सुशिराः सुललाटः सुविक्रमः ।। १० ।।
समः समविभक्ताङ्गः स्निग्धवर्णः प्रतापवान् ।
पीनवक्षा विशालाक्षो लक्ष्मीवान् शुभलक्षणः ।।११ ।।

पद्यपरिचयः; अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः।साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः; 'श्रीरामः आदर्शभूतशारीरकगुणसम्पन्नः ' इत्येतदंशं निरूपयन् अयं श्लोकः 'श्रीरामस्य गुणवैभवम्' इत्येतत् -नामके बालकाण्ड-कथाभागे वर्तते। नारदः महर्षये श्रीरामस्य प्रख्यातान् गुणान् कथयति।

पदविभागः; - विपुलांसः, महाबाहुः, कम्बुग्रीवः, महाहनुः ।।
महोरस्कः, महेष्वासः, गूढजत्रुः, अरिन्दमः ।
आजानुबाहुः, सुशिराः, सुललाटः, सुविक्रमः ।।
समः, समविभक्ताङ्गः, स्निग्धवर्णः, प्रतापवान् ।
पीनवक्षाः, विशालाक्षः, लक्ष्मीवान्, शुभलक्षणः ।।

अन्वयक्रमः; (सः रामः) विपुलांसः, महाबाहुः ,कम्बुग्रीवः, महाहनुः, । महोरस्कः, महेष्वासः, गूढजत्रुः, अरिन्दमः, आजानुबाहुः, सुशिराः, सुललाटः ,सुविक्रमः । समः, समविभक्ताङ्गः, स्निग्धवर्णः, प्रतापवान्, पीनवक्षाः ,विशालाक्षः ,लक्ष्मीवान् , शुभलक्षणः (च अस्ति) ।

प्रतिपदार्थः; मुने ! = महर्षे ! हे वाल्मीके!; विपुंलांसः = उन्नतभुजस्कन्धः; महाबाहुः = पीनबाहुः; कम्बुग्रीवः = शंखस्य इव उन्नतकन्धरयुक्तः ; महाहनुः = विशाल-कोमल-कपोलवान्; महोरस्कः = विशालवक्षःस्थलः; महेष्वासः = महाधनुर्धरः; गूढजत्रुः = मांसावृतसन्धिप्रदेशवान्; अरिन्दमः = शत्रुसूदनः; आजानुबाहुः = जानुपर्यन्तं लम्बमानदीर्घबाहुयुक्तः; सुशिराः = शोभनशिरस्कः; सुललाटः= सुन्दरललाटसम्पन्नः; सुविक्रमः = उत्साहयुक्तः; समः = समुचिताकारः; समविभक्ताङ्गः = सुघटितावयवः; स्निग्धवर्णः = मनोहरकोमलवर्णः; प्रतापवान् = प्रतापशाली; पीनवक्षाः = अभ्युन्नतवक्षःस्थलः; विशालाक्षः= आयतलोचनः; लक्ष्मीवान् = सौन्दर्यसम्पन्नः; शुभलक्षणः = प्रशस्त-अवयवैः सम्पन्नः;

श्लोकभावः;श्रीरामः विशालस्कन्धः,आजानुबाहुः, शंखतुल्यग्रीवः, प्रशस्तहनुश्च अस्ति।विशालवक्षःस्थलः महाधनुर्धरः मांसलतया पिहित-स्कन्धास्थिः शत्रुसंहारे समर्थः जानुपर्यन्तं लम्बायमानबाहुयुगलः शोभनशिरस्कः सुललाटः शोभनगतिशीलश्च।समुचिताकृतिः(नातिदीर्घः नातिक्षुद्रः) अङ्गसौष्ठवसम्पन्नः मनोहररूपः तेजस्वी अभ्युन्नतवक्षस्थलः आयतलोचनः सौन्दर्यसम्पन्नः शुभलक्षणोपेतश्च अस्ति ।

सन्धिः -गूढजत्रुररिन्दमः; गूढजत्रुः + अरिन्दमः (विसर्गः + अ = र्) विसर्गसन्धिः ।

लक्ष्मीवाञ् शुभलक्षणः; लक्ष्मीवान् + शुभलक्षणः (न् + श् = ञ्) श्चुत्वसन्धिः।

लक्ष्मीवाञ् छुभलक्षणः; लक्ष्मीवाञ्+ शुभलक्षणः (ञ् + श् = छ्) छत्वसन्धिः।

समासः -विपुलांसः; विपुलौ अंसौ यस्य सः =बहुव्रीहिसमासः।

महाबाहुः; महान्तौ बाहू यस्य सः =बहुव्रीहिसमासः।

कम्बुग्रीवः; कम्बुः इव ग्रीवा यस्य सः= बहुव्रीहिसमासः।

शत्रुनिबर्हणः; शत्रूणां निबर्हणः= षष्ठीतत्पुरुषसमासः।

महोरस्कः; महत् उरः यस्य सः= बहुव्रीहिसमासः।

आजानुबाहुः;आजानु बाहू यस्य सः=बहुव्रीहिसमासः।

सुशिराः; शोभनं शिरः यस्य सः=बहुव्रीहिसमासः।

सुललाटः;शोभनः ललाटः यस्य सः=बहुव्रीहिसमासः।

सुविक्रमः; शोभनः विक्रमः यस्य सः=बहुव्रीहिसमासः।

स्निग्धवर्णः; स्निग्धः वर्णः यस्य सः=बहुव्रीहिसमासः।

पीनवक्षाः; पीनं वक्षः यस्य सः=बहुव्रीहिसमासः।

कोशः -हनुः; अधस्ताच्चिबुकं गण्डकपोलौ तत्परा हनुः (अमरकोशः)

कम्बुग्रीवा; रेखात्रयान्विता ग्रीवा कम्बुग्रीवेति कथ्यते (हलायुधकोशः)

स्कन्धः; स्कन्धो भुजशिरोंऽसः (अमरकोशः)

जत्रु; स्कन्धो भुजशिरोऽम्सोऽस्त्री सन्धी तस्यैव जत्रुणी (अमरकोशः)

प्रतापः; प्रतापौ पौरुषातपौ (कोशः)

**स्वावलोकनप्रश्नाः** १). महाबाहुः-आजानुबाहुः'इत्यनयोः अर्थः कः?

२). 'महोरस्कः - पीनवक्षः' इत्यनयोः अर्थः कः

**२.२.२.५. श्रीरामस्य पालनगुणाः(Administrative Qualities)**

धर्मज्ञः सत्यसन्धश्च प्रजानां च हिते रतः ।
यशस्वी ज्ञानसम्पन्नः शुचिर्वश्यः समाधिमान् ।। १२ ।।
प्रजापतिसमः श्रीमान् धाता रिपुनिषूदनः ।
रक्षिता जीवलोकस्य धर्मस्य परिरक्षिता ।। १३ ।।
रक्षिता स्वस्य धर्मस्य स्वजनस्य च रक्षिता ।

पद्यपरिचयः; अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः; श्रीरामः आदर्शभूतैः पालनगुणैः युक्तः, इत्येतदंशं निरूपयन् अयं श्लोकः 'श्रीरामस्य गुणवैभवम्' इत्येतत्-नामके बालकाण्ड-कथाभागे वर्तते।अत्र नारदः महर्षये श्रीरामस्य प्रख्यातान् पालनपरान् गुणान् कथयति।

पदविभागः; धर्मज्ञः, सत्यसन्धः,च, प्रजानाम्, च, हिते, रतः ।
यशस्वी, ज्ञानसम्पन्नः, शुचिः, वश्यः, समाधिमान् ।।
प्रजापतिसमः, श्रीमान्, धाता, रिपुनिषूदनः ।
रक्षिता ,जीवलोकस्य, धर्मस्य, परिरक्षिता ।।
रक्षिता, स्वस्य, धर्मस्य, स्वजनस्य, च, रक्षिता ।

अन्वयक्रमः; (स च रामः) धर्मज्ञः, सत्यसन्धः, प्रजानां, हिते ,च, रतः, यशस्वी, ज्ञानसम्पन्नः, शुचिः, वश्यः, समाधिमान् । प्रजापतिसमः ,श्रीमान् , धाता, रिपुनिषूदनः, जीवलोकस्य, रक्षिता, धर्मस्य ,(च) परिरक्षिता ,(अस्ति) । स्वस्य धर्मस्य ,रक्षिता, स्वजनस्य च रक्षिता(अस्ति)।

प्रतिपदार्थः;मुने! = महर्षे ! हे वाल्मीके!धर्मज्ञः =स्वस्वविध्यनुष्ठानपरः(DUTY MINDED);सत्यसन्धः= सत्यप्रतिज्ञः,सत्यकर्मानुष्ठानपरः;प्रजानां च = जनानां च; हिते = कल्याणे,सङ्क्षेमे; रतः =तत्परः; यशस्वी = कीर्तिकरः;ज्ञानसम्पन्नः= सर्वविषयकज्ञानवान्;शुचिः =पवित्रः; वश्यः = जितेन्द्रियः; समाधि मान् = समानमानसिकस्थितिसम्पन्नः; प्रजापतिसमः = ब्रह्मतुल्यः; श्रीमान् = श्रीसम्पन्नः; धाता = प्रजानां धारकः;रिपुनिषूदनः = शत्रुहन्ता; जीवलोकस्य = प्राणिलोकस्य; रक्षिता = रक्षकः; धर्मस्य =क्रमशिक्षणस्य(DISCIPLINE)परिरक्षिता = पालकः; स्वस्य = आत्मनः;धर्मस्य= स्वीयविध्य नुष्ठानस्य च;रक्षिता =पालकः; स्वजनस्य च=बन्धूनां मातृ-पितृ-भ्रात्रादीनां च;रक्षिता = संरक्षकः;

श्लोकभावः;रामो न केवलं रूपवान् किन्तु गुणवान् अपि अस्ति !सः धर्मं जानाति ।सत्यम्आश्रित्य व्यवहरति। सः प्रजापालनपरः तिष्ठति, यशः वितनुते। सः ज्ञानवान् अस्ति । तदीयं चरितं पावनम् अस्ति।सः विनयं परिपालयति, योगपरः च तिष्ठति। रामः मानवः एव ,तथापि ब्रह्मसमानः भवति।सः मर्त्यजीवनेऽपि सनातनविभूतिसम्पन्नः अस्ति। सः धर्मव्यवस्थायाः सर्वथा परिपालकः अस्ति । तस्माद् एकतः तु जीवलोकं रक्षति। तदर्थमेव च अपरतः शत्रुसमूहं विनाशयति । रामः स्वकीयं धर्मं रक्षितुं जानाति । अत एव स्वजनान् रक्षितुम्=गौरवास्पदान् कर्तुम् अपि पारयति ।

सन्धयः; शुचिर्वश्यः; शुचिः + वश्यः (इः + व् = र् )विसर्गसन्धिः।

समासाः;सत्यसन्धः;सत्या सन्धा(प्रतिज्ञा) यस्य सः = बहुव्रीहिसमासः।
ज्ञानसम्पन्नः;ज्ञानेन सम्पन्नः = तृतीयातत्पुरुषसमासः।
स्वजनस्य;स्वस्य जनः स्वजनः,तस्य=षष्ठीतत्पुरुषसमासः।

कोशः- सन्धा; प्रतिज्ञानेऽवधौ सन्धा (वैजयन्तीकोशः)

**स्वावलोकनप्रश्नाः**

१). धर्मस्य परिरक्षिता इत्यस्य अर्थः कः ?

२). समाधिमान् इत्यस्य अर्थः कः ?

**२.२.२.६ श्रीरामस्य विद्वद्गुणाः (Scholastic Qualities)**

वेदवेदाङ्गतत्त्वज्ञो धनुर्वेदे च निष्ठितः ।। १४ ।।
सर्वशास्त्रार्थतत्त्वज्ञः स्मृतिमान् प्रतिभानवान् ।

पद्यपरिचयः; अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः; श्रीरामः विद्वद्गुणसम्पन्नः इत्येतदंशं निरूपयन् अयं श्लोकः 'श्रीरामस्य गुण वैभवम्' इत्येतत्-नामके बालकाण्ड-कथाभागे वर्तते।अत्र नारदः, महर्षये ,श्रीरामस्य प्रख्यातान् पाण्डित्य् गुणान् कथयति।

पदविभागः; - वेदवेदाङ्गतत्त्वज्ञः, धनुर्वेदे, च, निष्ठितः, ।।
सर्वशास्त्रार्थतत्त्वज्ञः, स्मृतिमान्, प्रतिभानवान् ।

अन्वयक्रमः;(मुने!सः)वेदवेदाङ्गतत्त्वज्ञः,धनुर्वेद च निष्ठितः(अस्ति)।सर्वशास्त्रार्थतत्त्वज्ञः,स्मृतिमान्, प्रतिभानवान्।

प्रतिपदार्थः; (मुने ! = महर्षे ! हे वाल्मीके! सः = श्रीरामः )वेदवेदाङ्गतत्त्वज्ञः, वेद=चतुर्णां वेदानाम्; वेदाङ्ग = षण्णाम् वेदाङ्गानां च; तत्त्वज्ञः = रहस्यज्ञाता; धनुर्वेदे = धनुर्विद्यायाम्; निष्ठितः = निष्णातः; सर्वशास्त्रार्थतत्त्वज्ञः,सर्व = समस्तानाम्; शास्त्रार्थ = शास्त्राभिप्रायाणाम् तत्त्वज्ञः=मर्मज्ञः; स्मृतिमान्=सुदृढः स्मरणशक्तिसम्पन्नः; प्रतिभानवान् = जन्मसिद्धविवेकज्ञानसम्पन्नः;

श्लोकभावः; ऋग्-यजु-साम-अथर्वणाख्याः चत्वारो वेदाः।शिक्षा,व्याकरणम्,छन्दः,निरुक्तम्, ज्योतिषम् कल्पश्चेति षट् वेदाङ्गानि च। अयं श्रीरामः चतुर्णां वेदानां, षण्णां वेदाङ्गानां तत्त्वं सम्यक् जानाति। शस्त्रविद्यायां धनुर्वेदेऽपि अयं निष्णातः अस्ति। शास्त्राणां दर्शनानां च मौलिकं तत्वं जानाति।श्रुतीनां व्याख्याभूताः स्मृतिग्रन्थाः। तान् सर्वान् अपि अयम् सूक्ष्मविवरणपूर्वकम् अधीते। रामः प्रतिभासम्पन्नः,अस्य जन्मसिद्धं बुद्धिवैभवम् अस्ति। अस्य समीचीनं वाक्चातुर्यं वर्तते।

सन्धयः; धनुर्वेदे; धनुः + वेदे = (उः+ व् = र् )विसर्गसन्धिः।

समासाः; वेदवेदाङ्गतत्त्वज्ञः

वेदाश्च वेदाङ्गानि च, वेदवेदाङ्गानि=द्वन्द्वसमासः

वेद-वेदाङ्गानां तत्त्वं,वेदवेदाङ्गतत्त्वम् = षष्ठीतत्पुरुषसमासः

वेदवेदाङ्गतत्त्वं जानातीति ,वेदवेदाङ्गतत्त्वज्ञः = उपपदसमासः

**स्वावलोकनप्रश्नाः** १). स्मृतिः नाम का?

२). वेदाङ्गानि कति ? तानि च कानि ?

**२.२.२.७ श्रीरामस्य उदात्तगुणाः(Descent Qualities)**

सर्वलोकप्रियः साधुः अदीनात्मा विचक्षणः ।। १५ ।।
सर्वदाभिगतः सद्भिः समुद्र इव सिन्धुभिः ।
आर्यः सर्वसमश्चैव सदैव प्रियदर्शनः ।। १६ ।।

पद्यपरिचयः; अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः; श्रीरामः समुदात्तलक्षणसम्पन्नः इत्येतदंशं निरूपयन् अयं श्लोकः 'श्रीरामस्य गुणवैभवम्' इत्येतत्-नामके बालकाण्ड-कथाभागे वर्तते।अत्र नारदः, महर्षये, श्रीरामस्य प्रख्यातान् उदारान् उदात्तान् च गुणान् कथयति।

पदविभागः; सर्वलोकप्रियः, साधुः, अदीनात्मा, विचक्षणः ।।
सर्वदा, अभिगतः, सद्भिः, समुद्रः, इव, सिन्धुभिः ।
आर्यः, सर्वसमः, च, एव, सदा, एव, प्रियदर्शनः ।।

अन्वयक्रमः; (मुने ! सः ) सर्वलोकप्रियः, साधुः, अदीनात्मा, विचक्षणः (च अस्ति) । (श्रीरामः) सिन्धुभिः,समुद्रः, इव,सर्वदा, सद्भिः,अभिगतः (भवति) । (सः) आर्यः, सर्वसमः, सदा एव प्रिय दर्शनः,एव च (भवति)

प्रतिपदार्थः;(मुने ! = महर्षे ! हे वाल्मीके! सः = श्रीरामः ) सर्वलोकप्रियः, सर्व= सर्वासाम् ; जन=प्रजानाम्; प्रियः=प्रीतिपात्रः; साधुः =सर्वेषु सत्प्रवर्तनः सज्जनः; अदीनात्मा = अनिरुत्साहपरः; विचक्षणः = विवेकसम्पन्नः; सिन्धुभिः = नदीभिः; समुद्रः = सागरः; इव = यथा; सर्वदा = सततम्; सद्भिः = सज्जनैः; अभिगतः = अभिगमनशीलः; आर्यः = पूज्यः; सर्वसमः,सर्व = सर्वेषु समः=समानः; सदा = सर्वदा ; प्रियदर्शनः एव = प्रशान्तरूपः, प्रसन्नदृष्टिः एव च भवति।

श्लोकभावः; श्रीरामः सर्वेषां जनानां प्रियम् आचरति।अयं साधुचरितः, सर्वेषु अनुकूलं प्रवर्तते। अदीनात्मा,कदापि दैन्यं न प्राप्नोति। समुद्रः सर्वदा नदीभिः अभिगम्यः भवति तथैव रामः सर्वदा सत्पुरुषैः अभिगम्यः तिष्ठति।सः सर्वसुलभः ,सर्वेषु च तुल्यं व्यवहरति । सः सर्वावस्थासु प्रियदर्शनः,प्रसन्नवदनः एव भवति, कदापि कोपोद्रिक्तं क्रोधोद्रिक्तं वा मुखं न धरति।

सन्धयः;साधुरदीनात्मा; साधुः + अदीनात्मा (उः + अ,=र्) विसर्गसन्धिः।
अदीनात्मा; अदीन + आत्मा (अ + आ = आ) सवर्णदीर्घसन्धिः।
सर्वदाभिगतः; सर्वदा + अभिगतः (आ + अ = आ) सवर्णदीर्घसन्धिः।
सदैव; सदा + एव (आ + ए = ऐ)वृद्धिसन्धिः।

समासाः; -सर्वलोकप्रियः;सर्वलोकानां प्रियः =षष्ठीतत्पुरुषसमासः।

अदीनात्मा; अदीनः आत्मा यस्य सः = बहुव्रीहिसमासः।

सर्वसमः; सर्वेषु समः = सप्तमीतत्पुरुषसमासः।

कोशः- साधु ; साधुस्त्रिषूचिते सौम्ये सज्जने वार्धुषावपि (वैजयन्तीकोशः)

सिन्धुः; नदी सिन्धुर्ना सरिति स्त्रियाम् (कोशः)

स्त्री नद्यां ना नदे सिन्धुर्देशभेदेऽम्बुधौ गजे (वैजयन्तीकोशः)

**स्वावलोकनप्रश्नाः**

१). श्रीरामः कैः, कथम् अभिगम्यो भवति ?

२). 'अदीनात्मा' इत्यस्य अर्थः कः ?

**२.२.२.८ श्रीरामस्य आत्मोत्कर्षाधायकाः गुणाः (Self -Possessive Qualities)**

स च सर्वगुणोपेतः, कौसल्यानन्दवर्धनः ।
समुद्र इव गाम्भीर्ये, धैर्येण हिमवानिव ।। १७ ।।
विष्णुना सदृशो वीर्ये, सोमवत् प्रियदर्शनः ।
कालाग्निसदृशः क्रोधे क्षमया पृथिवीसमः ।। १८ ।।
धनदेन समः त्यागे सत्ये धर्मः इव अपरः ।

पद्यपरिचयः; अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः; श्रीरामः गम्भीरः, धैर्यवान्, वीर्यवान् , क्षमावान् च इत्येतदंशं निरूपयन् अयं श्लोकः 'श्रीरामस्य गुणवैभवम्' इत्येतत्-नामके बालकाण्ड-कथाभागे वर्तते। अत्र नारदः, महर्षये, श्रीरामस्य प्रख्यातान् आत्मनः उत्कर्षाधायकान् गुणान् कथयति।

पदविभागः; - सः, च, सर्वगुणोपेतः, कौसल्यानन्दवर्धनः ।
समुद्रः, इव, गाम्भीर्ये, धैर्येण, हिमवान्, इव ।।
विष्णुना, सदृशः, वीर्ये, सोमवत्, प्रियदर्शनः ।
कालाग्निसदृशः, क्रोधे, क्षमया, पृथिवीसमः ।।
धनदेन, समः, त्यागे, सत्ये, धर्मः, इव, अपरः ।

अन्वयक्रमः; (मुने !) सः, सर्वगुणोपेतः, च, कौसल्यानन्दवर्धनः । गाम्भीर्ये समुद्रः इव,(गम्भीरः) धैर्येण हिमवान् इव (स्थिरः) । वीर्ये विष्णुना सदृशः । सोमवत् प्रियदर्शनः । क्रोधे कालाग्निसदृशः,। क्षमया पृथिवीसमः । त्यागे धनदेन समः। सत्ये अपरः धर्मः इव (च अस्ति) ।

प्रतिपदार्थः; - (मुने ! = महर्षे ! हे वाल्मीके! सः पूर्वोक्तः = श्रीरामः ) ; सर्वगुणोपेतः,सर्व = सर्वविधैः;गुण =प्रशस्तगुणैः; उपेतः = युक्तः; कौसल्यानन्दवर्धनः,कौसल्या =मातुः कौसल्यायाः;-

आनन्द=सन्तोषस्य; वर्धनः= अभिवर्धनः; गाम्भीर्ये = गभीरतायाम्; समुद्रः = सागरः;इव =यथा; (वर्तते)। धैर्येण = धृत्या; हिमवान् = हिमालयः; इव = यथा;(विद्यते)। वीर्ये = पराक्रमे; विष्णुना = श्रीमन्नारायणेन; सदृशः = तुल्यः ; (अस्ति)।सोमवत् = चन्द्रवत् ; प्रियदर्शनः, प्रिय=प्रीति पात्रः;दर्शनः=रूपवान् ;(अस्ति)। क्रोधे = कोपे; कालाग्निसदृशः, काल = प्रलयकालस्य; अग्नि = वह्निना; समः=तुल्यः;(भवति)। क्षमया = सहनेन ; पृथिवीसमः,पृथिवी = धरित्र्या,समः= तुल्यः;(वर्तते) त्यागे = दाने; धनदेन = कुबेरेण; समः = तुल्यः;(अस्ति)। सत्ये = सत्यवचने; अपरः = अन्या; धर्मः= धर्मदेवता; इव =यथा;(भवति)।

श्लोकभावः - श्रीरामः मातुः कौसल्यायाः सततम् आनन्दं वर्धयति।सर्वैः श्रेष्ठगुणैः सम्पन्नः वर्तते । सः समुद्र इव गम्भीरः विद्यते । हिमालयवत् धैर्यशाली च वर्तते । पराक्रमविषये विष्णुना तुल्यो भवति। दर्शने ,आह्लादजनने, च चन्द्रेण समानः भवति।क्रोधविषये प्रलयाग्निना सदृशः भवति।सहनविषये भूदेव्याः समानः विद्यते । त्यागविषये कुबेरेण समानः भवति।सत्यविषये यमेन सदृशः वर्तते ।

सन्धिः-कौसल्यानन्दवर्धनः; कौसल्या + आनन्दवर्धनः(आ+ आ=आ) सवर्णदीर्घसन्धिः।

कालाग्नि; काल + अग्नि (अ+ आ=आ) सवर्णदीर्घसन्धिः।

समासः- आनन्दवर्धनः; आनन्दस्य वर्धनः=षष्ठीतत्पुरुषसमासः।

कालाग्निसदृशः; कालाग्निना सदृशः=तृतीयातत्पुरुषसमासः।

पृथिवीसमः; पृथिव्या समः = तृतीयातत्पुरुषसमासः।

कोशः - वीर्यम्; वीर्यं शुक्रे च शक्तौ च वीर्यं तेजः प्रभावयोः (हैमः)

**स्वावलोकनप्रश्नाः**

१). गाम्भीर्यं नाम किम् ? गाम्भीर्यं च कस्य गुणः ?

२). श्रीरामः क्रोधे केन समः तिष्ठति ?

## २.३ उपसंहारः

एवम् अस्मिन् पाठ्यांशे श्रीरामस्य गुणवैभवम्,वाल्मीकिः व्यक्तित्वविकासात्मकाः गुणाः, सदाचारसम्पादकाः गुणाः आत्मगुणाः-साहसगुणाः यस्य वर्तन्ते,तादृशं आदर्शगुणसम्पन्नं पुरुष विशेषं ज्ञापयितुं नारदं पृच्छति। नारदः अपि मानवकल्याणं मनसि निधाय श्रीरामचरितं प्रस्तौति। तस्मिन् एव सन्दर्भे श्रीरामस्य गुणवैभवं कीर्तयति। नारदः तत्र - श्रीरामस्य वैयक्तिकगुणान्, शारीरकगुणान्,पालनगुणान्, विद्वत् गुणान्, उदात्तगुणान् आत्मोत्कर्षधायकगुणान् वर्णयति।

## २.४ अभ्यासः

द्वौ श्लोकौ व्याख्यात ?

१.वेदवेदाङ्गतत्त्वज्ञो धनुर्वेदे च निष्ठितः।
सर्वशास्त्रार्थतत्त्वज्ञः स्मृतिमान् प्रतिभानवान् ।।

२.चारित्रेण च को युक्तः सर्वभूतेषु को हितः ।
विद्वान् कः कः समर्थश्च कश्चैकप्रियदर्शनः ।।

# अंशः-III ; पितृवाक्यपालनम्

३.० परिचयः
३.१ लक्ष्याणि
३.२ पितृवाक्यपालनम्
३.२.१ दशरथस्य सङ्कल्पः
३.२.२ कैकेयाः वरयाचनम्
३.२.३ रामस्य अरण्यप्रेषणम्
३.२.४ रामस्य अरण्यगमनम्
३.२.५ लक्ष्मणस्य अनुगमनम्
३.२.६ सीतायाः अनुगमनम्
३.२.७ गुहस्य आसादनम् - सूतस्य विसर्जनम्
३.२.८ चित्रकूटस्य प्रवेशनम्
३.२.९ दशरथस्य मरणम्
३.२.१० भरतेन राज्यनिराकरणम्
३.२.११ भरतस्य विज्ञापनम्
३.२.१२ रामस्य पितृवाक्यपालनम्
३.२.१३ रामस्य पादुका ग्रहणम्
३.२.१४ नन्दिग्रामे भरतस्य राज्यपालनम्
३.३ उपसंहारः
३.४ अभ्यासः

## ३.० परिचयः

अयं पाठ्यांशः संक्षेपरामायणे एकोनविंशतितमश्लोकतः आरभ्य यावत् अष्टत्रिंशत् श्लोकं परिमितः। अयं अयोध्याकाण्डान्तर्गतकथांशानां ज्ञापकः। श्रीमद्रामायणम् एकं कुटुम्बकथा काव्यम्। बन्धु - मित्र - पुत्र - कलत्रादीनाम् आदर्शजीवनम् अत्र वर्णितम्। श्रेयोभिलाषिणां वशिष्ठ - विश्वामित्र - भरद्वाज - अगस्त्यादीनां मानवश्रेयस्साधकं वात्सल्यं च अत्र वर्णितम्। इतोऽपि दशरथस्य कुटुम्बविषयाः व्यवहाराश्च वर्णिताः। किञ्च श्रीरामः अवतारपुरुषः दुष्टशिक्षणोन्मुखतयैव तस्य जीवनयात्रापि प्रचलति। तस्य वनगमनम् - राक्षससंहारः इत्येते विषयाः अत्र उपलभ्यन्ते।

## ३.१ लक्ष्याणि

भारतीयजीवनविधानं पवित्रम्, आदर्शपात्रं च। बहूनां मानवीयगुणानाम् अभ्यसनाय शिक्षणं भारतीयजीवनविधाने एव भवति।सहायभावना-सहकारभावना-समिष्टिभावनाः भारतीय

कुटुम्बजीवनविधानेनैव जायन्ते। भारतीयकुटुम्बजीवनविधानस्य अपरं वैशिष्ट्यं पितृस्वामिकत्वम् । भारतीयानां कुटुम्बेषु पिता प्रधानः भवति। सः कुटुम्बसभ्यानां रक्षणभारं पोषणभारम् आवासभारं च वहति। विद्याबुद्धीश्च बोधयति । हिते च नियुङ्क्ते। अतः कृतज्ञतयाऽपि वा पितरं पूजयेत्।

किञ्च अयं जन्मदाता। पिता पुत्रस्य सौकर्यसम्पन्नं शरीरं प्रदाय एतल्लोके सुखजीवनाय अवकाशं कल्पयति। तादृशस्य जन्मदातुः ऋणात् पुत्रः अवश्यं मुक्तः भवेत्। तदर्थं वा पितरि पुत्रेण विनयेन भाव्यम्। "पितृदेवो भव" इति वेदवचनमपि पितरि पुत्रस्य विद्यमानां महतीं बाध्यतां बोधयति। तत्स्फूर्तिप्रदायकः अयं पाठ्यांशः। एतत् पाठ्यांशाध्ययनेन ----

अ) श्रीमद्रामायणे अयोध्याकाण्डान्तर्गतान् अंशान् ज्ञातुं प्रभवति।

इ) राज्यम् - कुटुम्बम् - तत्र च कलहाः तेषां च परिचयः सम्पादितः भवति।

उ) पितरि विनयः, मातृषु भक्तिः,भ्रातरि वात्सल्यम्, राज्ये निराकाङ्क्षा,प्रभृतीनां श्रीरामस्य गुणान् प्रति लिखितुं प्रभवति।

ऋ) लक्ष्मणस्य सौभ्रातृत्वं सीतायाः पतिव्रतात्वं प्रति च अवगन्तुं प्रभवति।

ए) प्रजापालने भरतस्य बाध्यताम्, भ्रातरि भरतस्य माननीयतां प्रति च वक्तुं समर्थो भवति।

## ३.२ पितृवाक्यपालनम्

### ३.२.१ दशरथस्य सङ्कल्पः

तमेवंगुणसम्पन्नं, रामं सत्यपराक्रमम् ।। १.१.१९ ।।  
ज्येष्ठं ज्येष्ठगुणैर्युक्तं प्रियं दशरथः सुतम् ।।  
प्रकृतीनां हितैर्युक्तं प्रकृतिप्रियकाम्यया ।। १.१.२० ।।  
यौवराज्येन संयोक्तुम् ऐच्छत् प्रीत्या महीपतिः ।

पद्यपरिचयः; अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः; दशरथः श्रीरामं युवराजपदव्याम् अभिषेचयितुं सङ्कल्पितः भवति इतेयेतदंशं निरूपयन् अयं श्लोकः पितृवाक्यपालनम् इत्येतत् नामके अयोध्यकाण्ड-कथाभागे वर्तते।

पदविभागः; तम् ,एवंगुणसम्पन्नम् ,रामम्, सत्यपराक्रमम् ।।  
ज्येष्ठम्, ज्येष्ठगुणैः, युक्तम्, प्रियम् ,दशरथः, सुतम् ।  
प्रकृतीनाम्, हितैः, युक्तम्, प्रकृतिप्रियकाम्यया ।।  
यौवराज्येन , संयोक्तुम्, ऐच्छत्, प्रीत्या ,महीपतिः ।

अन्वयक्रमः;महीपतिः दशरथः,एवंगुणसम्पन्नम् सत्यपराक्रमम्, प्रकृतीनाम्, हितैः, युक्तम्,ज्येष्ठगुणैः युक्तम् ,ज्येष्ठम् सुतम् तम् रामम्,प्रीत्या,प्रकृतिप्रियकाम्यया(च)यौवराज्येनसंयोक्तुम् ऐच्छत् ।

प्रतिपदार्थः; - महीपतिः = भूपतिः; दशरथः = दशरथः ; एवंगुणसम्पन्नम्, एवंगुण= पूर्वेक्तप्रशस्तगुणैः,सम्पन्नम् = युक्तम्; सत्यपराक्रमम्,सत्य =सत्यप्रतिष्ठायै ;पराक्रमम् =विक्रममाणम्; प्रकृतीनाम् = प्रजानाम्; हितैः = श्रेयोदायकैः,युक्तम् =सहितम्, ज्येष्ठगुणैः = श्रेष्ठगुणैः, युक्तम् = भूयिष्ठम् ,ज्येष्ठम् = प्रथमम्, सुतम् = पुत्रम्, तम्=पूर्वेक्तम् रामम्,= श्रीरामम्,,प्रकृतिप्रियकाम्यया, प्रकृति= प्रजानाम्; प्रिय = श्रेयसः, इच्छया = अभिलाषया, प्रीत्या = मनोभीष्टेन च, कारणेन,यौवराज्येन=युवराजपदव्या, संयोक्तुम् = सम्बन्धयितुम्, ऐच्छत् = अवाञ्छत् ।

श्लोकभावः;श्रीरामः शौर्यवान् धैर्यवान् औदार्यवान् गम्भीरवान् च।किञ्च अयं दशरथस्य प्रियः सुतः। ज्येष्ठश्च। प्रजानां श्रेयस्साधने रतः। पालनदक्षः। शत्रुसूदनः।दशरथः एवम् आदर्शगुणसम्पन्नं प्रियं पुत्रं श्रीरामं प्रजासंक्षेमं दृष्टौ निधाय युवराजपदव्याम् अधिष्ठातुं सङ्कल्पितः भवति ।

व्याकरणांशाः;सन्धयः; ज्येष्ठगुणैर्युक्तम् ;ज्येष्ठगुणैः + युक्तम् (ऐः + य् = र्)विसर्गसन्धिः।

हितैर्युक्तम्; हितैः + युक्तम्(ऐः + य् = र्)विसर्गसन्धिः।

समासाः;एवंगुणसम्पन्नः ; एवंगुणैः सम्पन्नः,तम् = तृतीयातत्पुरुषसमासः।

सत्यपराक्रमः ; सत्याय पराक्रमः यस्य सः, तम् = बहुव्रीहिसमासः ।

प्रकृतिप्रियम् ; प्रकृतीनाम् प्रियं =षष्ठीतत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः**

१. ऐच्छत् प्रीत्या महीपतिः ' अत्र महीपति कः ?

२. 'प्रकृतीनां हितैर्युक्तम्' अत्र 'प्रकृति' पदस्य अर्थः कः?

## ३.२.२ कैकेय्याः वरयाचनम्

तस्याभिषेकसम्भारान्, दृष्ट्वा भार्याऽथ कैकयी ।। .२१ ।।
पूर्वं दत्तवरा देवी वरमेनमयाचत ।
विवासनं च रामस्य भरतस्याभिषेचनम् ।। २२ ।।

पद्यपरिचयः; अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः;"श्रीरामस्य अभिषेकसंरम्भान् पश्यति।कैकेयी पूर्वं दत्तं वरद्वयं दशरथं याचति" इतेयेतदंशं निरूपयन् अयं श्लोकः पितृवाक्यपालनम् इत्येतत्-नामके अयोध्यकाण्डकथाभागे वर्तते।

पदविभागः; तस्य ,अभिषेकसम्भारान्, दृष्ट्वा, भार्या, अथ, कैकयी ।
पूर्वम्, दत्तवरा, देवी, वरम्, एनम्, अयाचत ।
विवासनम्, च, रामस्य, भरतस्य, अभिषेचनम् ।।

अन्वयक्रमः; अथ, तस्य, अभिषेकसम्भारान्, दृष्ट्वा, पूर्वम्, दत्तवरा, भार्या ,देवी, कैकयी, रामस्य, विवासनम्, भरतस्य ,अभिषेचनम्, च, वरम्, एनम्, अयाचत ।

प्रतिपदार्थः; अथ = यौवराज्येन श्रीरामं सम्बन्धयितुम् संकल्पितानन्तरम्; तस्य = रामस्य; अभिषेकसम्भारान्; अभिषेक= पट्टाभिषेकस्य; सम्भारान् = सन्नाहान्; दृष्ट्वा = विलोक्य; पूर्वम् = गते काले; दत्तवरा = लब्धवरा; भार्या = पत्नी; देवी = दिव्यलक्षणा,राणी; कैकयी = केकय राजपुत्री; रामस्य= श्रीरामस्य; विवासनम् = निर्वासनम्; भरतस्य =स्व(कैकयी)पुत्रस्य; अभिषेचनम् = राज्याभिषेकम्; वरम् = वरद्वयम्; एनम् =राजानं दशरथम्; अयाचत = अर्थितवती।

श्लोकभावः;कदाचित् देवासुरसङ्ग्रामे कैकेयी दशरथस्य सहायम् अनुतिष्ठति।कैकेय्याः समुचित-सामयिक-सहायस्य दशरथः सन्तुष्टः भवति।कैकेय्याः वरद्वयम् अनुगृह्णाति।कैकेयी दशरथः कालान्तरे स्वीकर्तुं च अनुमतिं प्राप्नोति। प्रकृते कैकेयी रामस्य यौवराज्याभिषेकासंरम्भान् विलोकयति।। पूर्वं दत्तवरा कैकेयी-'रामः चतुर्दशवर्षपर्यन्तं वने निवसतु, भरतश्च युवराजो भवतु'- इति वरद्वयं राजानं दशरथं याचति।

सन्धयः; तस्याभिषेकसम्भारान् ; तस्य + अभिषेकसम्भारान् (अ + अ =आ )सवर्णदीर्घसन्धिः।

भार्याऽथ ; भार्या + अथ (अ + अ =आ)सवर्णदीर्घसन्धिः।

भरतस्याभिषेचनम् ; भरतस्य + अभिषेचनम् (अ + अ = आ)सवर्णदीर्घसन्धिः।

समासाः; अभिषेकसम्भाराः; अभिषेकस्य सम्भाराः = षष्ठीतत्पुरुषसमासः।

दत्तवरा; दत्तौ वरौ यस्यै सा =बहुव्रीहिसमासः।

**स्वावलोकनप्रश्नाः**

१ तस्याभिषेकसम्भारान् ' अत्र 'तस्य' इति पदं कं सम्बन्धयति ?

२ कौसल्यायाः वरद्वयं किम् ?

## ३.२.३ रामस्य अरण्यप्रेषणम्

स सत्यवचनाद्राजा धर्मपाशेन संयतः ।
विवासयामास सुतं रामं दशरथः प्रियम् ।। २३ ।।

पद्यपरिचयः; अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः;दशरथः रामं अरण्यं विवासयति इत्यंशं निरूपयन् अयं श्लोकः पितृवाक्यपालनम् इत्येतत्-नामके अयोध्यकाण्ड-कथाभागे वर्तते।

पदविभागः; सः ,सत्यवचनात्, राजा, धर्मपाशेन, संयतः ।
विवासयामास, सुतम्, रामम् ,दशरथः, प्रियम् ।।

अन्वयक्रमः; -सत्यवचनात् धर्मपाशेन संयतः, सः राजा दशरथः, प्रियं सुतं रामं, विवासयामास।

प्रतिपदार्थः;- सत्यवचनात् = सत्यप्रतिज्ञत्वात् (सत्यवचनत्वस्य कारणात्); धर्मपाशेन = सत्यधर्मबन्धनेन; संयतः = बद्धः; सः = वरद्वयं प्रति कैकेय्याः कृतप्रतिज्ञः; राजा = दशरथः नृपः ; प्रियम् =

प्रीतिपात्रम्; सुतम् = पुत्रम्; विवासयामास = वनं प्रेषयामास।

श्लोकभावः; राजा दशरथः सत्यवादी,सत्यप्रतिज्ञः।यथाकथञ्चित् अपि कैकेय्याः प्रतिज्ञातं पूरयेत्।एवं सत्यधर्मपाशेन बन्धितः। कैकेय्याः वाग्दानं परिरक्षितुकामः एव भवति ।ज्येष्ठं प्रियं सुतं श्रीरामं वनं गमयितुं दुःखेन सिद्धः भवति । एवम् अन्ततः दशरथः श्रीरामं अरण्यं प्रापयति।

व्याकरणांशाः;सन्धयः; सत्यवचनाद्राजा ; सत्यवचनात् + राजा (त् + र् = द्)जश्त्वसन्धिः।

समासाः ;सत्यवचनात्; सत्यं वचनं यस्य सः सत्यवचनः,तस्मात् = बहुव्रीहिसमासः।

धर्मपाशेन; धर्मस्य पाशः,तेन = षष्ठीतत्पुरुषसमासः।

धर्मपाशेन ; धर्मः एव पाशः,तेन = कर्मधारयसमासः।

**स्वावलोकनप्रश्नाः**

१. धर्मपाशेन संयतः कः ?

२. दशरथस्य प्रियः सुतः कः?

## ३.२.४. रामस्य अरण्यगमनम्

स जगाम वनं वीरः प्रतिज्ञामनुपालयन् ।<br>
पितुर्वचननिर्देशात् कैकेय्याः प्रियकारणात् ।। २४ ।।

पद्यपरिचयः; अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः; श्रीरामः वनं गच्छति इत्यंशं निरूपयन् अयं श्लोकः पितृवाक्यपालनम् इत्येतत् -नामके अयोध्यकाण्ड-कथाभागे वर्तते।

पदविभागः; सः, जगाम, वनम्, वीरः, प्रतिज्ञाम्, अनुपालयन् ।<br>
पितुः, वचननिर्देशात्, कैकेय्याः, प्रियकारणात् ।।

अन्वयक्रमः; सः , वीरः पितुः प्रतिज्ञाम् अनुपालयन् , (तस्य) वचननिर्देशात्,कैकेय्याः प्रियकारणात् ,(च) वनं जगाम ।

प्रतिपदार्थः; सः = वनवासाय गन्तुं याचितः श्रीरामः; वीरः = उत्साहेन शूरः सन्,पितुः = जनकस्य दशरथस्य; प्रतिज्ञाम् = वाग्दानम्; अनुपालयन् = अनुसरन्; ( तस्य =पितुः )वचननिर्देशात् वचन = आज्ञारूपस्य वचनस्य; निर्देशात्=आदेशनात्;कैकेय्याः प्रियकारणात्=भरतमातुः;प्रियकारणात् (च) = प्रियहेतोः(च); वनम् = विपिनम्; जगाम = अगमत्।

श्लोकभावः;श्रीरामः सततम् उत्साहशीलः।सुखकृतं दुःखकृतं विकारं कदापि नैव भजते।एवं धैर्यवान् रामः पितुः वाक्यपालनाय संसिद्धः भवति्। पितुः दशरथस्य आज्ञापालनार्थम्, विमातुश्च कैकेय्याः प्रीतिसम्पादनार्थं च वनाय गन्तुं उद्युक्तः भवति। भवति

व्याकरणांशाः;सन्धयः; पितुर्वचन; पितुः + वचन (उः + व्, =र्) विसर्गसन्धिः।

समासाः;वचननिर्देशात् ; वचनस्य निर्देशः,तस्मात् = षष्ठीतत्पुरुषसमासः।

प्रियकारणम् ; प्रियं च तत् कारणम्,तस्मात् = विषेषणपूर्वपदकर्मधारयसमासः.

**स्वावलोकनप्रश्नाः**

१. श्रीरामः कुतः वनं जगाम ?

२. श्रीरामः कथं वनं जगाम ?

## ३.२.५ लक्ष्मणस्य अनुगमनम्

तं व्रजन्तं प्रियो भ्राता लक्ष्मणोऽनुजगाम ह ।
स्नेहाद्विनयसम्पन्नः सुमित्रानन्दवर्धनः ।। २५ ।।
भ्रातरं दयितो भ्रातुः सौभ्रात्रमनुदर्शयन् ।

पद्यपरिचयः; अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः; वनं गच्छन्तं श्रीरामं लक्ष्मणः अपि अनुजगाम इत्यंशं निरूपयन् अयं श्लोकः पितृवाक्यपालनम् इत्येतत् -नाामके अयोध्यकाण्ड-कथाभागे वर्तते।

पदविभागः; तम्, व्रजन्तम् ,प्रियः, भ्राता, लक्ष्मणः, अनुजगाम, ह ।
स्नेहात्, विनयसम्पन्नः, सुमित्रानन्दवर्धनः ।।
भ्रातरम्, दयितः, भ्रातुः, सौभ्रात्रम्, अनुदर्शयन् ।

अन्वयक्रमः; विनयसम्पन्नः, सुमित्रानन्दवर्धनः, भ्रातुः ,दयितः, प्रियः ,भ्राता, लक्ष्मणः, स्नेहात्, सौभ्रात्रम् ,अनुदर्शयन्, व्रजन्तम्,भ्रातरम्, तम्,अनुजगाम ।

प्रतिपदार्थः; विनयसम्पन्नः = विनम्रशीलः; सुमित्रानन्दवर्धनः, सुमित्रा= मातुः सुमित्रायाः आनन्द=प्रियस्य; वर्धनः = वर्धकः; भ्रातुः = रामस्य विषये; दयितः = सानुभूतिपरः; प्रियः = इष्टः; भ्राता =सोदरः ; लक्ष्मणः = रामस्य अनुजः लक्ष्मणः ; सौभ्रात्रम् = उत्तमभ्रातृभावम्; अनुदर्शयन् = आचरन्; स्नेहात्= भक्तिकारणतः; व्रजन्तम् = गच्छन्तम्; भ्रातरम् = अग्रजम् ;तम् = श्रीरामम्; अनुजगाम = अनुययौ।

श्लोकभावः;लक्ष्मणः श्रीरामस्य सोदरः। सः प्रीतिपात्रः भ्राता।ज्येष्ठे भ्रातरि श्रीरामे विधेयपूर्णः विन यशीलश्च।स्वमातुः सुमित्रायाः आनन्दवर्धकः।भातरि स्नेहप्रवर्तनः।पितुः वाक्यपालनाय, कैकेय्याः प्रीतिसम्पादनाय च वनं गच्छति खलु श्रीरामः।अभिषेचनार्हः श्रीरामः वनवासाय गच्छति इति लक्ष्मणः सानुभूतिपरो भवति । एवं लक्ष्मणः भ्रातरि सौजन्यं प्रदर्शयन् वनं व्रजन्तं श्रीरामम् अनु गच्छति।

सन्धयः; -प्रियो भ्राता ; प्रियः + भ्राता (अः + भ् =ओ)विसर्गसन्धिः।

लक्ष्मणोऽनुजगाम; लक्ष्मणः + अनुजगाम (अः + अ = ओऽ)विसर्गसन्धिः।

समासाः;विनयसम्पन्नः; विनयेन सम्पन्नः=तृतीयातत्पुरुषसमासः।

गुणयुक्तः; गुणेन युक्तः=तृतीयातत्पुरुषसमासः।

सुमित्रानन्दः ;सुमित्रायाः आनन्दः= षष्ठीतत्पुरुषसमासः।

सुमित्रानन्दवर्धनः;सुमित्रानन्दस्य वर्धनः = षष्ठीतत्पुरुषसमासः।

कोशः; विनयः; विनयो धर्मविद्यार्थशिक्षाचारप्रशान्तिषु (वैजयन्तीकोशः)

लक्ष्मणः; लक्ष्मीवान् लक्ष्मणः श्रीमान् (पर्यायपाठः)

**स्वावलोकनप्रश्नाः**

१. सुमित्रायाः आनन्दस्य वर्धकः कः ?

२. 'दयितः' इति पदस्य अर्थः कः ?

## ३.२.६ सीतायाः अनुगमनम्

रामस्य दयिता भार्या नित्यं प्राणसमा हिता ।। २६ ।।
जनकस्य कुले जाता देवमायेव निर्मिता ।
सर्वलक्षणसम्पन्ना नारीणामुत्तमा वधूः ।। २७ ।।
सीताप्यनुगता रामं शशिनं रोहिणी यथा ।
पौरैरनुगतो दूरं पित्रा दशरथेन च ।। .२८ ।।

पद्यपरिचयः; अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः;वनं गच्छन्तं श्रीरामं सीता अपि अनव्रजति इत्यंशं निरूपयन् अयं श्लोकः पितृवाक्य पालनम् इत्येतत् -नामके अयोध्यकाण्डकथाभागे वर्तते।

पदविभागः; रामस्य, दयिता, भार्या, नित्यम् प्राणसमा हिता ।
जनकस्य, कुले, जाता, देवमाया,इव, निर्मिता ।
सर्वलक्षणसम्पन्ना, नारीणाम्, उत्तमा, वधूः ।।
सीता, अपि, अनुगता, रामम्, शशिनम्, रोहिणी, यथा ।
पौरैः ,अनुगतः, दूरम्, पित्रा ,दशरथेन, च ।।

अन्वयक्रमः; सीता रामस्य भार्या।(सा) देवमाया इव निर्मिता, जनकस्य कुले जाता। दयिता (सा) नित्यं हिता, प्राणसमा, सर्वलक्षणसम्पन्ना, नारीणाम् उत्तमा वधूः (अस्ति)। (सा) अपि शशिनं रोहिणी यथा रामम् अनुगता। पौरैः पित्रा दशरथेन च दूरम्, अनुगतः ।

प्रतिपदार्थः; सीता = विदेहराजपुत्री ; रामस्य=श्रीरामस्य; भार्या=धर्मपत्नी;(सा=रामभार्या) देवमाया इव = मानवातीतदिव्यशक्तिः, इव = ननु; निर्मिता = सृष्टा; जनकस्य = मिथिलाधिपस्य; कुले = वंशे; जाता =समुत्पन्ना; दयिता = (रामस्य विषये) सानुभूतिपरा; (सा=सीता) नित्यम् = सदा; हिता=रामस्य पथ्यकारिणी; प्राणसमा, प्राण = असुभिः; समा=तुल्या; सर्वलक्षणसम्पन्ना,

सर्व=समस्तैः,लक्षण=शुभचिह्नैः; सम्पन्ना = उपेता; नारीणाम् = स्त्रीणाम्; उत्तमा = श्रेष्ठा; वधूः = स्नुषा; (अस्ति)। (सा=तादृशी सीता ) अपि= च; रोहिणी = रोहिणी नाम्नी तारका; शशिनं = चन्द्रम्; यथा = इव; रामम्=वनवासाय प्रस्थितं,भर्तारम् श्रीरामम्; अनुगता = अनुयाता। पौरैः=जनपदैः; पित्रा = जनकेन;दशरथेन = दशरथराजेन; च =सह; दूरम् =बहुदूरं यावत् ; अनुगतः = अनुसृतः। श्लोकभावः;सीता श्रीरामस्य भार्या।सा सर्वत्र श्रीरामं प्रति सानुभूतिपरा।श्रीरामस्य प्राणैः तुल्या। श्रीरामस्य श्रेयोभिलाषिणी। जनकस्य कुले उत्पन्ना ।देवानामपि मोहिनी सकलसद्गुणसम्पन्ना। सर्वलक्षणसंयुक्ता।एषा नारीणाम् उत्तमा वधूः भवति।एषा सीता रोहिणी चन्द्रमसमिव वनं गच्छन्तं श्रीरामम् अनुगतवती।

व्याकरणांशाः;सन्धयः; देवामायेव ; देवमाया + इव (आ + इ = ए) गुणसन्धिः।
सीताऽपि ; सीता + अपि (आ+ आ = आ) सवर्णदीर्घसन्धिः।
अप्यनुगता; अपि + अनुगता (इ+ अ = य्) यणादेशसन्धिः।
समासाः; गुणयुक्तः ; गुणेन युक्तः = तृतीयातत्पुरुषसमासः।
प्राणसमा ; प्राणैः समा = तृतीयातत्पुरुषसमासः।
सर्वलक्षणसम्पन्ना ; सर्वलक्षणैः सम्पन्ना = तृतीयातत्पुरुषसमासः।
देवमाया ; देवानाम् माया = षष्ठीतत्पुरुषसमासः।
कोशः; माया ; माया दम्भे कृपायां च (कोशः)
वधूः ; अचिरोढा तु वधूः (वैजयन्तीकोशः)
यथा ; यथा तथेवैवं साम्ये (अमरकोशः)

**स्वावलोकनप्रश्नाः**

१. श्रीरामः कैः कैः अनुगतः ?

२. सीता कीदृशी ?

अ)..................

इ)..................

उ)..................

ऋ).................

## ३.२.७ गुहस्य आसादनम् - सूतस्य विसर्जनम्

शृङ्गवेरपुरे सूतं गङ्गाकूले व्यसर्जयत् ।
गुहमासाद्य धर्मात्मा निषादाधिपतिं प्रियम् ।। २९ ।।

पद्यपरिचयः; अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः;श्रीरामः अयोध्यापरं त्यजति।शृङ्गवेरपुरं प्राप्नोति इत्यंशं निरूपयन् अयं श्लोकः पितृवाक्यपालनम् इत्येतत्-नामके अयोध्यकाण्डकथाभागे वर्तते।

पदविभागः; शृङ्गवेरपुरे, सूतम्, गङ्गाकूले ,व्यसर्जयत् ।
गुहम् ,आसाद्य, धर्मात्मा, निषादाधिपतिम्, प्रियम् ।।

अन्वयक्रमः; धर्मात्मा(रामः) शृङ्गवेरपुरे प्रियं निषादाधिपतिं गुहम् आसाद्य गङ्गाकूले सूतं व्यसर्जयत् ।

प्रतिपदार्थः; धर्मात्मा = पितृवाक्यपालनधर्मपरः रामः; शृङ्गवेरपुरे = शृङ्गवेरपुरनामके नगरे; प्रियम्= इष्टम् मित्रपक्षीयम्; निषादाधिपतिम् = निषादराजम्; गुहम् = गुहनामकम्; आसाद्य = प्राप्य; गङ्गाकूले = जाह्नवीतटे; सूतम् = सारथिम्; व्यसर्जयत् = न्यवर्तयत्।

श्लोकभावः ; रामः धर्मशीलः;पितृवाक्यपालनधर्मपरः।सः शृङ्गवेरपुरं प्राप्तः।तच्च गुहस्य आवासस्थानम्। गुहश्च निषादानां राजा, रामस्य प्रियं मित्रं च।रामश्च शृङ्गवेरपुरे गुहं आसादितः। ततः तत्रैव गङ्गाकूले सूतं सुमन्त्रं अयोध्यां प्रेषितः च।

सन्धयः; व्यसर्जयत्; वि + असर्जयत् ( इ+ अ= य् ) यणादेशसन्धिः।

समासाः ;गङ्गाकूले ; गङ्गायाः कूलम् , तस्मिन् = षष्ठीतत्पुरुषसमासः।
धर्मात्मा ; धर्मः आत्मा यस्य सः = बहुव्रीहिसमासः।
निषादाधिपतिः ; निषादानाम् अधिपतिः, तम् = षष्ठीतत्पुरुषसमासः।

कोशः; -निषादः ; निषादो मृगघाती स्यात् (वैजयन्तीकोशः)

**स्वावलोकनप्रश्नाः**

१. शृङ्गवेरपुरं कुत्र वर्तते ?
२. गुहः कः ? कीदृशश्च ?

## ३.२.८ चित्रकूटस्य प्रवेशनम्

गुहेन सहितो रामो लक्ष्मणेन च सीतया ।
ते वनेन वनं गत्वा नदीस्तीर्त्वा बहूदकाः ।। ३० ।।
चित्रकूटमनुप्राप्य भरद्वाजस्य शासनात् ।
रम्यमावसथं कृत्वा रममाणा वने त्रयः ।। ३१ ।।
देवगन्धर्वसङ्काशास्तत्र ते न्यवसन् सुखम् ।

पद्यपरिचयः; अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः; श्रीरामः गुहस्य सहायेन गङ्गां तरति , चित्रकूटं प्रविशति इत्येतदंशं निरूपयन् अयं श्लोकः पितृवाक्यपालनम् इत्येतत्-नामके अयोध्यकाण्डकथाभागे वर्तते।

पदविभागः; - गुहेन, सहितः, रामः, लक्ष्मणेन ,च, सीतया ।

ते, वनेन, वनम्, गत्वा, नदीः, तीर्त्वा ,बहूदकाः ।। ३० ।।
चित्रकूटम् , अनुप्राप्य , भरद्वाजस्य, शासनात् ।
रम्यम्, आवसथम्, कृत्वा, रममाणाः, वने , त्रयः ।। ३१ ।।
देवगन्धर्वसङ्काशाः, तत्र, ते ,न्यवसन् ,सुखम् ।

अन्वयक्रमः; गुहेन लक्ष्मणेन सीतया च सहितः रामः वनेन वनं गत्वा बहूदकाः नदीः तीर्त्वा (तत्र गुहं विसृष्टः। ततः) भरद्वाजस्य शासनात् चित्रकूटम् अनुप्राप्य, वने रम्यम् आवसथं कृत्वा, देवगन्धर्वसङ्काशाः ते त्रयः रममाणाः तत्र सुखं न्यवसन् ।

प्रतिपदार्थः ; गुहेन = मित्रेण निषादराजेन; लक्ष्मणेन = अनुजेन लक्ष्मणेन; सीतया = भार्यया जानक्या च = अपि सहितः = युक्तः; रामः = श्रीरामः; वनेन = अरण्येन, वनम् = अरण्यान्तरम्, गत्वा = प्रविश्य ; बहूदकाः = जलपूर्णाः गभीराः, नदीः = सरितः; तीर्त्वा = उत्तीर्य;(तत्र =गंगायाः अपरे तटे ; गुहं =मित्रं निषादराजम् ; विसृष्टः = प्रेषितः ;। ततः = गुहस्य प्रेषणान्तरम् ; ) भरद्वाजस्य = भरद्वाजमहर्षेः; शासनात् = आदेशनात्; चित्रकूटम् = चित्रकूटपर्वतम् ; अनुप्राप्य = गत्वा , वने = अरण्ये, रम्यम् = मनोहरम् रमणीयम्, आवसथम् = आवासस्थानम्, पर्णशालाम् ; कृत्वा = निर्माय, देवगन्धर्वसङ्काशाः, देव= देवैः;= गन्धर्व =गन्धर्वैः;सङ्काशाः = सदृशाः; ते = चित्रकूटं प्रविष्टाः;त्रयः = त्रिसंख्याकाः सीतारामलक्ष्मणाः; रममाणाः = विहरन्तः; तत्र = चित्रकूटे निर्मितपर्णशालायाम्; सुखम् = निर्बाधम्; न्यवसन् = निवासम् अकुर्वन् ।

श्लोकभावः; -श्रीरामः सीतया लक्ष्मणेन च गंगातीरं प्राप्नोतिः। तत्र प्रियं मित्रं गुहं सम्मिलति।ः। गंगा प्रवाहस्य तारणार्थं गुहम् अभ्यर्थयति।गुहः नूतनायां नौकायां तान् अधिरोप्य तारयितुं सिद्धः भवति। एवं गुहेन तारिताः ते वनात् वनं प्रविशन्ति। वनान्तरात् वनान्तरं अतीत्य गच्छन्ति। पूर्णजलाः अगाधनदीः तरन्ति। गंगायाः अपरं तटं च प्राप्नुवन्ति। तत्र च श्रीरामः गुहं विसृजति। ततः सीतया लक्ष्मणेन च श्रीरामः भरद्वाजस्य आश्रमं सम्पश्यति(Visit)। स च तान् चित्रकूटं गन्तुम् आदिशति।चित्रकूटपर्वतप्रान्तः प्रकृत्या मनोहरः।तत्र तैः निवासाय सुन्दरं आवसथं च निर्मितम् । तत्र ते देवगन्धर्वान् स्मारयन्ति। ते त्रयः सीतारामलक्ष्मणाः निरातङ्कं निर्बाधं चित्रकूटे सुखेन कालं यापयन्ति ।

सन्धयः; सहितो रामः;सहितः + रामः(अः + र् (हश्) = ओ) विसर्गसन्धिः।
रामो लक्ष्मणेन ; रामः + लक्ष्मणेन(अः + ल् (हश्) = ओ) विसर्गसन्धिः।
न्यवसन् ; नि + अवसन् ( इ+ अ= य् )यणादेशसन्धिः।

समासाः; बहूदकाः ; बहूनि उदकानि यासु ताः (बहूदकाः नदीः) = बहुव्रीहिसमासः।
देवगन्धर्वाः ; देवाश्च गन्धर्वाश्च = द्वन्द्वसमासः।
देवगन्धर्वसङ्काशाः ;देवगन्धर्वैः सङ्काशाः (तुल्याः) = तृतीयातत्पुरुषसमासः।

कोशः -अनु ; पश्चात् सादृश्ययोरनु (अमरकोशः)

**स्वावलोकनप्रश्नाः**

१. चित्रकूटपर्वतप्रान्तः कीदृशः ?

२. नद्यः कथं भवन्ति ?

### ३.२.९. दशरथस्य मरणम्

चित्रकूटं गते रामे पुत्रशोकातुरस्तथा ।। ३२ ।।
राजा दशरथः स्वर्गं जगाम विलपन् सुतम् ।

पद्यपरिचयः; अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः;वनवासाय श्रीरामस्य गमनानन्तरं अयोध्यायां दशरथः मृतः इत्येतदंशं निरूपयन् अयं श्लोकः पितृवाक्यपालनम् इत्येतत् -नामके अयोध्यकाण्डकथाभागे वर्तते।

पदविभागः; चित्रकूटम्. गते. रामे, पुत्रशोकातुरः, तथा ।
राजा, दशरथः .स्वर्गम्, जगाम. विलपन् ,सुतम् ।।

अन्वयक्रमः; रामे चित्रकूटं गते,तथा, पुत्रशोकातुरः राजा दशरथः, सुतं विलपन् स्वर्गम् जगाम ।

प्रतिपदार्थः; रामे = श्रीरामे, चित्रकूटम् = चित्रकूटपर्वतम् ; गते= प्राप्ते; पुत्रशोकातुरः, पुत्र=सुतस्य; शोक=वियोगदुःखेन; आतुरः = पीडितः; राजा = भूपः; दशरथः = अयोध्याधिपतिः; पुत्रम् = सुतम्; विलपन् = प्ररुदन्; स्वर्गम् = स्वर्गलोकम्; जगाम = गतवान् ।

श्लोकभावः;श्रीरामः वनवासाय चित्रकूटपर्वतं प्रस्थितः भवति।ततश्च अयोध्यायाम् राजा दशरथः सुतस्य शोकेन भृशं पीडितः जायते।तेनैव च शोकेन'हा प्रियपुत्र, हा श्रीराम' इत्येवं विलपन् दशरथः प्राणान् त्यजति।

सन्धयः ; शोकातुरः ; शोक + आतुरः(अ +आ =आ)सवर्णदीर्घसन्धिः।

समासाः ; पुत्रशोकः ; पुत्रस्य शोकः =षष्ठीतत्पुरुषसमासः।
पुत्रशोकातुरः ; पुत्रशोकेन आतुरः = तृतीयातत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः**

१. दशरथः स्वर्गं जगाम' इत्यस्य अर्थः कः ?

२. अत्र पुत्रशोकातुरः कः ?

### ३.२.१० भरतेन राज्यनिराकरणम्

गते तु तस्मिन् भरतो वसिष्ठप्रमुखैर्द्विजैः ।। ३३ ।।
नियुज्यमानो राज्याय नैच्छद्राज्यं महाबलः ।
स जगाम वनं वीरो रामपादप्रसादकः ।। ३४ ।।

पद्यपरिचयः; अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे

प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः;'भरतः राज्यं निराकृतवान्, श्रीरामम् एव आनेतुम् अरण्यम् आगतवान्' इत्येतदंशं निरूपयन् अयं श्लोकः पितृवाक्यपालनम् इत्येतत् -नामके अयोध्यकाण्डकथाभागे वर्तते।

पदविभागः - गते, तु, तस्मिन्, भरतः, वसिष्ठप्रमुखैः, द्विजैः ।

नियुज्यमानः, राज्याय, न, ऐच्छत्, राज्यम्, महाबलः।

सः,जगाम, वनम्, वीरः, रामपादप्रसादकः।।

अन्वयक्रमः; तस्मिन् गते तु,वसिष्ठप्रमुखैः द्विजैः राज्याय नियुज्यमानः भरतः महाबलः (अपि) राज्यं न ऐच्छत् (किन्तु) रामपादप्रसादकः सः वीरः वनं जगाम ।

प्रतिपदार्थः; तस्मिन् = दशरथे ; गते = स्वर्गं प्राप्ते,(मृते सति) ; वसिष्ठप्रमुखैः, वसिष्ठ= वसिष्ठादिभिः ; प्रमुखैः = राज्यपरिरक्षकेषु प्रधानैः, द्विजैः = विप्रैः,राज्याय=राज्यपरिरक्षणाय (अधिकारे); नियुज्यमानः = आदिश्यमानः ; भरतः = कैकेयीपुत्रः ; महाबलः = पालनाय आवश्यकबलसम्पन्नोपि,राज्यम् = राज्याधिकारम्, न ऐच्छत् =न अवाञ्छत्, तु = परन्तु ; रामपादप्रसादकः, राम = श्रीरामस्य ; पाद=चरणयोः ; प्रसादकः = अनुग्रहसम्पादनाय इच्छुः , सः = भरतः, वीरः = आत्मविश्वासेन उत्साहितः (सन्) वनम् = चित्रकूटपर्वतप्रान्तम्, जगाम = गतः।

श्लोकभावः;श्रीरामः पितरं सत्यप्रतिज्ञं करोति। श्रीरामः सीतया लक्ष्मणेन च वनं प्राप्नोति। दशरथः श्रीरामस्य वियोगबाधां सोढुम् अशक्तः भवति। वनवासाय श्रीरामस्य गमनान्तरं दशरथः षष्ठे दिने मृतः भवति। राज्यपरिरक्षणाय वसिष्ठप्रमुखाः भरतं राज्याधियकारे नियोक्तुं आदिशन्ति । पालनाय आवश्यकं यत् बलम्,तेन सम्पन्नोपि भरतः राज्याधिकारं स्वीकर्तुं न अङ्गीकरोति।प्रत्युत यथाकथंचित् श्रीराममनुनीय आनेतुम्,राज्ये तम् एव प्रतिष्ठापयितुं च भरतः आत्मविश्वासेन वनं प्रस्थितः भवति।

सन्धयः ; प्रमुखैर्द्विजैः ; प्रमुखैः + द्विजैः(ऐः + द् = र्) विसर्गसन्धिः।

नैच्छत् ; न + ऐच्छत् ( अ + ऐ = ऐ ) वृद्धिसन्धिः।

समासाः ;- वसिष्ठप्रमुखाः ; वसिष्ठः प्रमुखः येषां ते , तैः =बहुव्रीहिसमासः।

महाबलः ; महत् बलं यस्य सः= बहुव्रीहिसमासः।

रामपादप्रसादकः ; रामपादयोः प्रसादकः = षष्ठीतत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः**

१. महाबलः' इति पदं किमर्थं सूचयति ?

२. वसिष्ठप्रमुखाः राज्यपरिरक्षणाय किम् अकुर्वन्?

## ३.२.११ भरतस्य विज्ञापनम्

गत्वा तु स महात्मानं रामं सत्यपराक्रमम् ।

अयाचद् भ्रातरं रामम् आर्यभावपुरस्कृतः ।। ३५ ।।

त्वमेव राजा धर्मज्ञ इति रामं वचोऽब्रवीत् ।

पद्यपरिचयः; अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः;भरतः श्रीरामं राज्यस्वीकरणाय प्रार्थयति इत्येतदंशं निरूपयन् अयं श्लोकः पितृवाक्यपालनम् इत्येतत् -नामके अयोध्यकाण्डकथाभागे वर्तते।

पदविभागः; गत्वा, तु, सः ,महात्मानम्, रामम्, सत्यपराक्रमम् ।

अयाचत्, भ्रातरम् , रामम्, आर्यभावपुरस्कृतः ।।

त्वम्, एव ,राजा, धर्मज्ञ ! इति, रामम् ,वचः, अब्रवीत् ।

अन्वयक्रमः; सः, सत्यपराक्रमम्, महात्मानम्,रामम् भ्रातरम्, रामम् गत्वा अयाचत्। आर्यभाव पुरस्कृतः ,(सन् भरतः) धर्मज्ञ ! त्वम्, एव, राजा , इति ,वचः, रामम् अब्रवीत् ।

प्रतिपदार्थः; सः = भरतः ; सत्यपराक्रमम् ,सत्य =सत्यधर्मप्रतिष्ठायै ; पराक्रमम्=प्रयतमानम्; महात्मानम् = पितृवाक्यपालनेन महान्तम्; रामम् =अभिरामम्; भ्रातरम् = अग्रजम्,रामम् = श्रीरामम्; गत्वा = प्राप्य, अयाचत् = प्रार्थयत् । आर्यभावपुरस्कृतः, आर्यभाव = पूज्यभावनया पुरस्कृतः=पुरोगतः; (सन्,भरतः= कैकेयीसुतः) , धर्मज्ञ != धर्मानुष्ठानपर !; त्वम् = भवान्; एव = केवलम्; राजा = नृपः; इति = एवम् ; वचः = वचनम्, रामम् = श्रीराघवम्, अब्रवीत् = अकथयत्।

श्लोकभावः; यथाकथंचित् श्रीरामं अनुनीय आनेतुम्, राज्ये तम् एव प्रतिष्ठापयितुं च भरतः आत्मविश्वासेन वनं प्रस्थितः भवति । चित्रकूटं प्राप्नोति । श्रीरामः पितरं सत्यप्रतिज्ञं कर्तुं खलु काननं गच्छति। एवं सत्यधर्मप्रतिष्ठायै प्रयतमानः सन् श्रीरामः सत्यपराक्रमः सम्पन्नः। पितृवाक्यपालनेन महात्मा च भवति। एवम् श्रीरामः पितृवाक्यपालनेन,सत्यपराक्रमेण च गुणाभिरामः सञ्जातः। एतादृशं च श्रीरामं भरतः चित्रकूटे संगतः।भरतः श्रीरामं पूज्यभावनया "धर्मज्ञ ! त्वमेव राज्यभारवहनयोग्यः असि। भवान् एव राज्यं पालयतु "इति च उक्तवान्।

सन्धयः; वचोऽब्रवीत् ; वचः + अब्रवीत्(अः + अ =ओऽ)विसर्गसन्धिः।

समासाः ;महात्मानम् ; महान् आत्मा यस्य सः महात्मा,तम् = बहुव्रीहिसमासः।

सत्यपराक्रमः ; सत्यम् पराक्रमम् यस्य सः = बहुव्रीहिसमासः।

**स्वावलोकनप्रश्नाः**

१. श्रीरामः "महात्मा" कथं जातः?

२ .अत्र "सत्यपराक्रमम् "इति पदं किम् अर्थं सूचयति ?

## ३.२.१२. रामस्य पित्रृवाक्यपालनम्

रामोऽपि परमोदारः सुमुखः सुमहायशाः ।। ३६ ।।

न चैच्छत् पितुरादेशाद् राज्यं रामो महाबलः ।

पद्यपरिचयः; अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः; श्रीरामः भरतस्य प्रर्थनां न अङ्गीकरोति । इत्यंशं निरूपयन् अयं श्लोकः पितृवाक्यपालनम् इत्येतत्-नामके अयोध्यकाण्डकथाभागे वर्तते।

पदविभागः; रामः, अपि , परमोदारः, सुमुखः, सुमहायशाः ।।

न , च , ऐच्छत् , पितुः , आदेशात् , राज्यम् , रामः , महाबलः ।

अन्वयक्रमः;परमोदारः सुमुखः सुमहायशाः रामः, महाबलः अपि, पितुः आदेशात् राज्यं न ऐच्छत्

प्रतिपदार्थः; परमोदारः = उदारचेताः; सुमुखः = शोभनाननः; सुमहायशाः = सुकीर्तिः; महाबलः = शक्तिसम्पन्नः ; रामः = राघवः; अपि = च; पितुः = दशरथस्य; आदेशात् = आज्ञया; राज्यम् = राजसिंहासनम्; न ऐच्छत् = न अवाञ्छत् ;

श्लोकभावः;श्रीरामः विशालहृदयः; स्ववनवासाय कारणतया मातरं पितरं भ्रातरं वा न द्वेष्टि। श्रीरामस्य मातापित्रोः भक्तिः भ्रातरि वात्सल्यं च यथापूर्वम् अस्ति।सुखे दुःखे च अयं प्रसन्नवदनः। अयं सुचरितेन कीर्तिसम्पन्नश्च। किञ्च अयं राज्यपालनसमर्थः महाबलः। तथापि केवलं पितुः दशरथस्य आज्ञापालनार्थम्,भरतेन समर्प्यमाणं राज्यं न अङ्गीकरोति।

सन्धयः; रामोऽपि ; रामः + अपि (अः + अ =ओऽ) विसर्गसन्धिः।

चैच्छत् ; च + ऐच्छत् ( अ + ऐ = ऐ ) वृद्धिसन्धिः।

आदेशाद्राज्यम् ; आदेशात् + राज्यम् ( त् + र् = द् ) जश्त्वसन्धिः।

समासाः; परमोदारः ; परमश्चासौ उदारश्च = कर्मधारयसमासः।

सुमुखः ; शोभनं मुखं यस्य सः = बहुव्रीहिसमासः।

**स्वावलोकनप्रश्नाः**

१ पितुः आदेशः कीदृशः?

२ अत्र "महाबलः "इति पदं किम् अर्थं सूचयति ?

### ३.२.१३ रामस्य पादुकाग्रहणम्

पादुके चास्य राज्याय न्यासं दत्त्वा पुनः पुनः ।। ३७ ।।

निवर्तयामास ततो भरतं भरताग्रजः ।

पद्यपरिचयः; अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः; 'श्रीरामः भरताय पदुके ददाति' इत्येतदंशं निरूपयन् अयं श्लोकः पितृवाक्यपालनम्

इत्येतत् -नामके अयोध्यकाण्डकथाभागे वर्तते।

पदविभागः ; पादुके, च, अस्य ,राज्याय, न्यासम्, दत्त्वा, पुनः, पुनः ।।
निवर्तयामास, ततः, भरतम्, भरताग्रजः ।

अन्वयक्रमः; भरताग्रजः राज्याय पादुके न्यासं दत्त्वा भरतं पुनः पुनः निवर्तयामास ।

प्रतिपदार्थः; भरताग्रजः,भरत = भरतस्य ; अग्रजः=ज्येष्ठभ्राता रामः ; राज्याय = राज्यरक्षणाय; पादुके = पादरक्षौ; न्यासम् = प्रतिनिधितया ; दत्त्वा = प्रदाय; भरतम् = कैकेयीनन्दनम्; पुनः पुनः = भूयो भूयः; निवर्तयामास = प्रेषयामास।

श्लोकभावः; भरतः बहुशः श्रीरामं राज्यं स्वीकर्तुं प्रार्थयति।श्रीरामश्च पितुरादेशात् राज्यं स्वीकर्तुं न इच्छति। भरतः भ्रातरं श्रीरामं विना अयोध्यां गन्तुं न सिद्धः भवति। एवम् उभयोः राज्यस्वीकरणे उत्कण्ठा नास्ति। उभौ परस्परं सुहृदौ आदर्शभ्रातरौ। उभयोः मातापित्रोः भक्तिः अस्ति। तस्मिन्नेव समये उभयोः राज्यपालने बाध्यता, प्रजासंक्षेमे निबद्धता च अस्ति। राज्यम् अनाथं कर्तुं उभावपि नेष्टौ। अतः उभौ स्वस्वप्रतिज्ञां पालयन्तावेव राज्यमपि रक्षितुम् आलोचितवन्तौ । श्रीरामः भरताय पादुके ददाति ।भरतश्च अयोध्यां अगत्वा, पर्यन्तप्रान्ते नन्दिग्रामे पादुके अभिषिच्य रामनाम्ना राज्यं पालयति। एवम् आलोच्य, श्रीरामः भरतं बहुधा अनुनयति। पादुके ददाति भरतं प्रेषयति च।एवं श्रीरामस्य पितृवाक्यपालनम्,राज्ये भरतस्य अनभिषेचनम्,तद्द्वारा भरतस्य सान्त्वनम्, प्रजानां पालनञ्च सम्पादितं भवति।

सन्धयः; भरताग्रजः ; भरत + अग्रजः (अ + अ = आ)सवर्णदीर्घसन्धिः।

समासाः; भरताग्रजः ; भरतस्य अग्रजः = षष्ठीतत्पुरुषः।

**स्वावलोकनप्रश्नाः**

१. "पादुके चास्य राज्याय" अत्र "अस्य" कं सम्बन्धयति?

२. अत्र "न्यसम् "इत्यस्य अर्थः कः ?

## ३.२.१४. नन्दिग्रामे भरतस्य राज्यपालनम्

स काममनवाप्यैव रामपादावुपस्पृशन् ।। ३८ ।।
नन्दिग्रामेऽकरोद्राज्यं रामागमनकाङ्क्षाया ।

पद्यपरिचयः; अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः।
साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः;श्रीरामस्य आनयने विफलः भरतः ,भ्रातुः पादुके स्वीकरोति, नन्दिग्रामे अभिषेचति राज्यं करोति इत्यंशं निरूपयन् अयं श्लोकः पितृवाक्यपालनम् इत्येतत् -नामके अयोध्यकाण्डकथाभागे वर्तते।

पदविभागः; - सः, कामम् ,अनवाप्य, एव, रामपादौ, उपस्पृशन् ।
नन्दिग्रामे ,अकरोत्, राज्यम्, रामागमनकाङ्क्षया ।।

अन्वयक्रमः;सः कामम् अनवाप्य,एव,रामपादौ,उपस्पृशन्,रामागमनकाङ्क्षया नन्दिग्रामे राज्यम्,अकरोत्
प्रतिपदार्थः; -सः = भरतः; कामम् = रामस्य पुनः आनयनरूपाम् इच्छाम् ; अनवाप्य = अप्राप्य ;एव =केवलम् ; रामपादौ, राम=श्रीरामस्य ; पादौ = चरणौ ; उपस्पृशन् = नमस्कुर्वन् ; रामागमनकाङ्क्षया, राम = श्रीरामस्य ; आगमन = पुनरागमने ; काङ्क्षया = अभिलाषया, नन्दिग्रामे = नन्दिनाम्नि ग्रामे, राज्यम् = राज्यस्य प्रशासनम् ; अकरोत् = कृतवान्।

श्लोकभावः भरतः राज्यं स्वीकर्तुं श्रीरामं बहुधा प्रार्थयति।श्रीरामः पितुरादेशात् राज्यं स्वीकर्तुं न इच्छति। भरतः भ्रातरं श्रीरामं विना अयोध्यां गन्तुं न सिद्धः भवति। परन्तु स्वस्व इष्टानुसारगमने राज्यम् अराजकं भवति,प्रजाश्च अनाथाः भवन्ति इति च आलोचितवन्तौ।उभौ स्वस्वप्रतिज्ञां पालयन्तावेव राज्यमपि रक्षितुम् उद्युक्तौ।श्रीरामः भरताय पादुके ददाति । भरतश्च अयोध्यां अप्रविश्य, अयोध्यायाः पर्यन्तप्रान्ते नन्दिग्रामे पादुके अभिषच्य रामनाम्ना राज्यं पालयति। एवम् आलोच्य, श्रीरामः भरतम् बहुधा अनुनयति।एवम् विफलमनोरथः सन् भरतः रामपादुके स्वीकरोति। नन्दिग्रामे पादुके अभिषेचयति , रामस्य प्रत्यागमनं निरीक्षते। श्रीरामस्य आगमनपर्यन्तं भरतः, राज्यस्य रक्षणं करोति।

व्याकरणांशाः;सन्धयः;अनवाप्यैव ; अनवाप्य + एव ( अ + ए = ऐ )वृद्धिसन्धिः।

रामपादावुपस्पृशन्;रामपादौ + उपस्पृशन्(औ +उ =आव्) आव्-आदेशसन्धिः।

समासः; रामपादौ ;रामस्य पादौ =षष्ठीतत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः**

१ स कामम् अनवाप्यैव 'अत्र कामः कीदृशः?

२ नन्दिग्रामः कुत्र वर्तते ?

## ३.३.उपसंहारः

एवम् एतावत्पर्यन्तम् अयोध्याकाण्डान्तर्गताः विषयाः वर्णिताः। विषयपरतया अस्य 'पितृवाक्य पालनम्' इति नाम दत्तम् अस्ति। अत्र च -दशरथस्य सङ्कल्पः, कैकेयाः वरयाचनम्, रामस्य अरण्यप्रेषणम्, रामस्य अरण्यगमनम्,लक्ष्मणस्य अनुगमनम्,सीतायाः अनुगमनम् ,गुहस्य आसादनम्,सूतस्य विसर्जनम् ,चित्रकूटस्य प्रवेशनम्, दशरथस्य मरणम्, भरतेन राज्यनिराकरणम्, भरतस्य विज्ञापनम्,रामस्य पित्रवाक्यपालनम्, रामस्य पादुकाग्रहणम्, नन्दिग्रामे भरतस्य राज्यपालनम् - इति एते विषयाः प्रस्तुताः भवन्ति।

## ३.४ अभ्यासः

द्वौ श्लोकौ व्याख्यात ?

१.स काममनवाप्यैव रामपादावुपस्पृशन् ।
नन्दिग्रामेऽकरोद्राज्यं रामागमनकाङ्क्षाया ।।

२.स जगाम वनं वीरः प्रतिज्ञामनुपालयन् ।
पितुर्वचननिर्देशात् कैकेय्याः प्रियकारणात् ।।

# अंशः-V ; राम-सुग्रीवयोः अग्निसाक्षिकं सख्यम्

५.० परिचयः
५.१ लक्ष्याणि
५.२ राम - सुग्रीवयोः अग्निसाक्षिकं सख्यम्
५.२.१ सुग्रीवेण रामलक्ष्णयोः सङ्गमनम्
५.२.२ श्रीरामस्य स्वीयवृत्तान्तस्य श्रावणम्
५.२.३ राम - सुग्रीवयोः अग्निसाक्षिकं सख्यम्
५.२.४ सुग्रीवस्य स्वीयवृत्तान्तस्य श्रावणम्
५.२.५ रामस्य सामर्थ्यं प्रति सुग्रीवस्य शङ्का
५.२.६ वालिनः बलस्य ख्यापनम्
५.२.७ स्वीयबलप्रदर्शनाय श्रीरामस्य उपक्रमणम्
५.२.८ श्रीरामस्य सप्ततालभेदनम्
५.२.९ राम - सुग्रीवयोः परस्परं विश्वसनम् - किष्किन्धायाः गमनम्
५.२.१० युद्धाय सुग्रीवस्य गर्जनम्
५.२.११ वालिनः संहरणम्
५.२.१२ राज्ये सुग्रीवस्य प्रतिष्ठापनम्
५.२.१३ सीतान्वेषणाय दिशः वानराणां प्रस्थापनम्
५.३ उपसंहारः
५.४ अभ्यासः

## ५.० परिचयः

अयं च पाठ्यांशः संक्षेपरामायणे अष्टपञ्चाशत् श्लोकतः आरभ्य एकसप्ततितमश्लोक-पर्यन्तं परिमितः वर्तते। अत्र च किष्किन्धाकाण्डान्तर्गतानां कथांशानां सूचनं भवति। किष्किन्धकाण्ड-कथा संङग्रहेण अत्र उपलभ्यते।

प्रकृते - सीतान्वेषणे उद्युक्तौ रामलक्ष्मणौ पम्पातीरम् आगच्छतः। हनुमान् रामलक्ष्मण-सुग्रीवान् एकत्र समावेशयति। राम- सुग्रीवौ परस्परं कष्टापन्नौ। सहायापेक्षिणौ। परस्परं स्नेहार्थि-नौ। तौ परस्परं बलं च जानीतः। परस्परं च विश्वस्तौ भवतः। श्रीरामः वालिनं हन्ति। सुग्रीवश्च वानरान् सीतान्वेषनाय नियोजयति। अङ्गदस्य आध्वर्ये हनुमत्प्रमुखाः दक्षिणां दिशं गच्छन्ति। तत्र संपातितः सीतां रावणापहृतां जानन्ति। समुद्रं तीर्त्वा लङ्कां गन्तुम् उद्युक्ताः भवन्ति।

## ५.१लक्ष्याणि

मानवस्य अभ्युदयसम्पादकेषु सख्यम् अन्यतमम्। सख्यं च मित्रत्वम्। इदं सर्वथा सम-

योरेव जायते। इदं धियः जाड्यं हरति, वाचि सत्यं प्रतिष्ठापयति, योग्यतां पात्रतां च वर्धयति, दुरालोचनं नाशयति। आपदि सुखे च समानं करोति। मनस्सु भद्रताराहित्यं दूरीकरोति। मनसः स्थिमिततां प्रयच्छति।परस्परं कार्यसाधिका भवति। हृदयभारं न्यूनीकरोति। एवं सख्यं परस्परं श्रेयस्साधकं भवति।

इदं च सख्यं अग्निसाक्षिकं प्रसिद्धम्। अग्निः पवित्रः। तथा मैत्री द्रोहबुद्धिं विना पवित्रा सती मनः पूर्वकं कार्यं साधयति। अग्निः सर्वभक्षकः। अयः पिण्डमपि जीर्णं करोति। स्नेहेन प्रकाशयति । सर्वथा जडमपि क्रियाशीलं करोति। अग्नेः दुरुपयोगः प्रमादकरः। तथा मित्रत्व-स्यापि दुरुपयोगः प्रमादाय = मनसः विघटनाय, अविश्वसनाय च कल्पते। अतः सख्यस्य अग्निसाक्षिकत्वं प्रसिद्धम्। एतच्च अग्निसाक्षिकं सख्यं सर्वथा कार्यसाधनपर्यन्तं वर्धयेत्। एतत् पाठ्यांशस्य अध्ययनेन सख्यतासम्पादकेषु अधोनिर्दिष्टेषु अंशेषु परिचयः सम्पादितो भवति।

अ) भावसारूप्यम् ( Like Mindedness) अवगन्तुं प्रभवन्ति।

इ) परस्परं कष्टानि ज्ञातुं इच्छवः भवन्ति।

उ) परस्परं सहायापोक्षतां प्रति वक्तुं प्रभवन्ति।

ऋ) परस्परं स्वस्वअवसर(प्रयोजन) साधनक्षमतां लिखितुं प्रभवन्ति।

ए) परस्परं विश्वासवर्धनाय मानानि (Measures)स्वीकर्तुं प्रभवन्ति।

ओ) परस्पर कार्यसाधकत्वम् पठितुं समर्था भवन्ति।

## ५.२.राम-सुग्रीवयोः अग्निसाक्षिकं सख्यम्

### ५.२.१सुग्रीवेण रामलक्ष्मयोः सङ्गमः

पम्पातीरे हनुमता, सङ्गतो वानरेण ह ।। ५८ ।।

हनुमद्वचनाच्चैव सुग्रीवेण समागतः ।

पद्यपरिचयः; अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः; 'श्रीरामलक्ष्मणौ पम्पातीरे हनुमन्तं सुग्रीवं च समागतौ' इत्यमुमंशं ज्ञापयन् अयं श्लोकः'राम-सुग्रीवयोः अग्निसाक्षिकं सख्यम्'इत्येतत् -नामके किष्किन्धकाण्डकथा भागे वर्तते।

पदविभागः; पम्पातीरे, हनुमता, सङ्गतः. वानरेण ,ह ।।

हनुमद्वचनात्, च, एव, सुग्रीवेण ,समागतः ।

अन्वयक्रमः; (श्रीरामः)पम्पातीरे वानरेण हनुमता सङ्गतः । हनुमद्वचनात् च एव सुग्रीवेण समागतः ।

प्रतिपदार्थः;(श्रीरामः)पम्पातीरे, पम्पा = पम्पासरोवरस्य; तीरे = तटे; वानरेण = कपिना ; हनुमता = आञ्जनेयेन ; सङ्गतः = सम्मिलितः ; हनुमद्वचनात्, हनुमद् = आञ्जनेयस्य ; वचनात् = वचसः

(माध्यमेन) कारणात् ; एव = केवलम्; सुग्रीवेण = वानरराजेन सुग्रीवेण; समागतः च = मिलितश्च।

श्लोकभावः; - लक्ष्मणेन सह श्रीरामः कबन्धं हन्ति । शबरीम् अनुगृह्णाति। पम्पासरोवरं प्राप्नोति।तत्र सुग्रीवसचिवेन हनुमता सम्मिलति।हनुमतः वाक्पटुत्वं बुद्धिवैभवं च श्रीरामं लक्ष्मणं च आकर्षति। हनुमान् राम-सुग्रीवौ अन्योन्यसहकारम् आप्तुम् इच्छति। तत् च मनसि निधाय हनुमान् सलक्ष्मणं श्रीरामं , सुग्रीवेण सह मेलयति।

विशेषांशः;अत्र राम-सुग्रीवयोः समागमसम्पादने हनुमतः कार्यकरणशीलता सूचिता भवति।

व्याकरणांशाः;सन्धिः; -सङ्गतो वानरेण; सङ्गतः + वानरेण (अः + व्=ओ )विसर्गसन्धिः।

हनुमद्वचनात्; हनुमत् + वचनात्(त् + व् =द् )जश्त्वसन्धिः।

वचनाच्च; वचनात् + च (त् + च् = च् )श्चुत्वसन्धिः।

चैव; च + एव (अ + ए = ऐ) वृद्धिसन्धिः।

समासः; पम्पातीरे; पम्पायाः तीरं पम्पातीरम्,तस्मिन् =षष्ठीतत्पुरुषसमासः।

हनुमद्वचनात् ; हनुमतः वचनम् ,तस्मात् =षष्ठीतत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः**

१. श्रीरामः हनुमता कुत्र सङ्गतः ?

२. श्रीरामः कस्य वचनात् सुग्रावेण समागतः ?

## ५.२.२.श्रीरामस्य स्वीयवृत्तान्तस्य श्रावणम्

सुग्रीवाय च तत्सर्वं शंसद् रामो महाबलः ।। ५९ ।।
आदितस्तद्यथावृत्तं सीतायाश्च विशेषतः ।

पद्यपरिचयः;अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः; 'श्रीरामः स्ववृत्तान्तं सर्वं सुग्रीवाय निवेदयति' इति अमुम् अंशं ज्ञापयन् अयं श्लोकः'राम - सुग्रीवयोः अग्निसाक्षिकं सख्यम्'इत्येतत् -नामके किष्किन्धकाण्डकथाभागे वर्तते।

पदविभागः; - सुग्रीवाय, च, तत्सर्वं, शंसत्, रामः, महाबलः ।।
आदितः, तद्, यथावृत्तम्, सीतायाः, च, विशेषतः ।

अन्वयक्रमः;-महाबलः रामः सुग्रीवाय आदितः तत् सर्वम् विशेषतः सीतायाः यथावृत्तम्(च) शंसत्

प्रतिपदार्थ; महाबलः = अतुलितबलसम्पन्नः; रामः=श्रीरामः; आदितः = अयोध्यायां दशरथात् आरभ्य; तत् = वनागमनपर्यन्तं स्वीयं वृत्तान्तम्; सर्वम् = सम्पूर्णम्; विशेषतः = प्रत्येकतः;सीतायाः = जानक्याः; यथावृत्तम् = यथाघटितम् (अपहरणवृत्तान्तम्); सुग्रीवाय = वानरराजाय सुग्रीवाय, शंसत् = अकथयत्,

श्लोकभावः; हनुमान् कपिश्रेष्ठः,बुद्धिबलसम्पन्नः, विवेकी च। सः पम्पातटम् आगच्छति। श्रीराम लक्ष्मणयोः वृत्तान्तं च अवगच्छति।स च सोदरद्वयं प्रभावपूर्णं जानाति। हनुमान् श्रीराम -लक्ष्मणाभ्याम् सुग्रीवस्य श्रेयः चिन्तयति। श्रीरामं च कष्टापन्नं च जानाति।हनुमान् श्रीरामलक्ष्मणौ आश्वसिति। सुग्रीवेण सङ्गमयति च। सुग्रीवेण सङ्गतश्च रामः आदितः स्वीयं वृत्तान्तं कथयति ।विशिष्य सीतायाः अपहरणम् विस्तारेण च निवेदयति।

विशेषांशः;श्रीरामः सुग्रीवाय स्वीयं कष्टं दुःखं च श्रावितवान् इत्यंशः अत्र स्पष्टः भवति।

व्याकरणांशाः;सन्धिः; शंसद्रामः; शंसत् + रामः (त् + र् = द्)जश्त्वसन्धिः।

आदितस्तद्; आदितः + तद् (अः + त् =स् )विसर्गसन्धिः।

सीतायाश्च ; सीतायाः + च (आः + च् = श् )विसर्गसन्धिः।

समासः; महाबलः ; महद् बलं यस्य = बहुव्रीहिसमासः।

यथावृत्तम् ; वृत्तमनतिक्रम्य यथावृत्तम् =अव्ययीभावसमासः।

**स्वावलोकनप्रश्नाः**

१.श्रीरामः सुग्रीवं विस्तरेण किं श्रावयति ?

## ५.२.३ राम - सुग्रीवयोः अग्निसाक्षिकं सख्यम्

सुग्रीवश्चापि तत्सर्वं श्रुत्वा रामस्य वानरः ।। ६० ।।
चकार सख्यं रामेण प्रीतश्चैवाग्निसाक्षिकम् ।

पद्यपरिचयः;अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः; ' श्रीराम - सुग्रीवौ अग्निसाक्षिकं सख्यम् अकुरुताम् ' इति अमुम् अंशं ज्ञापयन् अयं श्लोकः 'राम-सुग्रीवयोः अग्निसाक्षिकं सख्यम्' इत्येतत् -नामके किष्किन्धकाण्डकथा भागे वर्तते।

पदविभागः; - सुग्रीवः, अपि, तत्सर्वम्, श्रुत्वा, रामस्य, वानरः ।।
चकार, सख्यम्, रामेण, प्रीतः, च, एव, अग्निसाक्षिकम् ।

अन्वयक्रमः; - वानरः सुग्रीवः च रामस्य तत्सर्वं श्रुत्वा प्रीतः च रामेण अग्निसाक्षिकं सख्यं चकार ।

प्रतिपदार्थः; वानरः = कपिः;सुग्रीवः=राजा सुग्रीवः ; च = अपि;रामस्य = श्रीराघवस्य; तत्सर्वम् = पूर्णम् वृत्तान्तम्; श्रुत्वा = आकर्ण्य; प्रीतः(सन्) = सन्तोषम् आप्तः(सन्); रामेण = राघवेण; अग्निसाक्षिकम् = अग्निसमक्षम् यथा स्यात् तादृशम्; सख्यं = स्नेहम् ; चकार = कृतवान्।

श्लोकभावः;सुग्रीवः अग्रजेन वालिना,विरुध्यति । स्वयं कष्टानि आप्नोति। सः कष्टकालिकीं बाधां जानाति, पर कष्टाभिज्ञः अपि भवति।अतः सुग्रीवोऽपि रामस्य सकलं वृत्तान्तं श्रद्धया शृणोति। श्रीरामस्य कष्टानि ज्ञात्वा सुग्रीवः सानुभूतिपरः=आकृष्टमनस्कः भवति । अग्निं प्रज्वाल्य ,तत्समक्षे सुग्रीवः श्रीरामेण सह

अग्निसाक्षिकं स्नेहं च करोति। अग्निं साक्षिणं कृत्वा सुग्रीवः रामेण सह पवित्रां मैत्रीम् आप्नोति।
विशेषांशः;कष्टापन्नेषु प्रतिस्पन्दनशीलं सुग्रीवस्य दयार्द्रहृदयत्वं अत्र वर्णितं भवति।
व्याकरणांशाः;सन्धिः; सुग्रीवश्च;सुग्रीवः + च (अः + च् = श् )विसर्गसन्धिः।
चापि; च + अपि(अ + अ = आ )सवर्णदीर्घसन्धिः।
प्रीतश्च; प्रीतः + च (अः + च् = श् )विसर्गसन्धिः।
चैव; च + एव (अ + ए = ऐ )वृद्धिसन्धिः।
समासः; अग्निसाक्षिकम्; अग्निः साक्षी यस्य = बहुव्रीहिसमासः।

**स्वावलोकनप्रश्नाः**

१.श्रीराम -सुग्रीवौ कीदृशं सख्यम् अकरुताम् ?

**५.२.४सुग्रीवस्य स्वीयवृत्तान्तस्य श्रावणम् - वालिवधं प्रति श्रीरामस्य प्रतिज्ञाकरणम्**

ततो वानरराजेन, वैरानुकथनं प्रति ।। ६१ ।।
रामायावेदितं सर्वं प्रणयात् दुःखितेन च ।
प्रतिज्ञातं च रामेण तदा वालिवधं प्रति ।। ६२ ।।

पद्यपरिचयः;अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः।सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः;'सुग्रीवः अपि वालिना स्वीयं विरोधं श्रीरामाय निवेदयति इति अमुम् अंशं ज्ञापयन् अयं श्लोकः'राम-सुग्रीवयोः अग्निसाक्षिकं सख्यम्'इत्येतत् -नामके किष्किन्धकाण्डकथाभागे वर्तते।

पदविभागः; ततः, वानरराजेन, वैरानुकथनम्, प्रति, ।।
रामाय, आवेदितम्, सर्वम्, प्रणयात्, दुःखितेन, च, ।
प्रतिज्ञातम्, च, रामेण, तदा, वालिवधम्, प्रति ,।।

अन्वयक्रमः; ततः दुःखितेन वानरराजेन वैरानुकथनं प्रति रामाय सर्वं प्रणयात्, आवेदितम् ।
तदा रामेण वालिवधं प्रति प्रतिज्ञातम् च।

प्रतिपदार्थः; ततः =मैत्रीकरणानन्तरम्; दुःखितेन = शोकाभिभूतेन; वानरराजेन = कपीश्वरेण; वैरानुकथनं, वैर=विरोधस्य;अनुकथनं=ज्ञापनाय पृष्टे सति;(तम्)प्रति = उद्दिश्य ; रामाय = श्रीराघवाय; सर्वम् = निखिलम् (वृत्तम्);प्रणयात् = अनुभूत्या;(भावोद्विग्नमनस्केन) आवेदितम् = निवेदितम् ; तदा च = तस्मिन् एव समये च ; रामेण = श्रीराघवेण ; वालिवधम्,वालि = वालिनः वधम् = संहरणम् ; प्रति = उद्दिश्य ; प्रतिज्ञातम्= वागपि दत्तम् ;

श्लोकभावः; राम-सुग्रीवयोः मध्ये मैत्री भवति । तयोश्च प्रत्येकतः स्वं स्वं कष्टम् अस्ति।अन्योन्यसहायेन कष्टानि तर्तुं सिद्धौ भवतः।श्रीरामः सुग्रीवस्य कष्टस्वरूपं पृच्छति।सुग्रीवश्च वैरम् एवं निवेदयति -- आवाम् वालि-सुग्रीवौ सोदरौ। ताराकारणतः आवयोः वैरं जातम् । वाली बलसम्पन्नः। प्राणान् अपि हरति।

प्राणभीत्या ऋष्यमूकम् आगतः।अहम्-मदीयः अल्पः परिवारश्च इदानीं अत्र (ऋष्यमूके)तिष्ठति--- इति सप्रणयं सबाधं वालिनः वैरम् उद्दिश्य कथयति। श्रीरामः अपि स्पन्दते ।अनन्तरं श्रीरामः वालिनः वधं प्रतिज्ञास्यति।

विशेषांशः;कष्टापन्नेषु प्रतिस्पन्दनशीलं श्रीरामस्य दयार्द्रहृदयत्वं अत्र वर्णितं भवति।

व्याकरणांशाः;सन्धिः ; वैरानुकथनम् ; वैर + अनुकथनम् (अ + अ =आ)सवर्णदीर्घसन्धिः।

रामायावेदितम्; रामाय + आवेदितम् (अ+आ =आ)सवर्णदीर्घसन्धिः।

प्रणयाद्दुःखितेन; प्रणयात् + दुःखितेन (त् + द् = द्)जश्त्वसन्धिः।

समासः; वानरराजेन;वानराणां राजा वानरराजः तेन = षष्ठीतत्पुरुषसमासः।

वैरानुकथनम्; वैरस्य अनुकथनम्, तत् = षष्ठीतत्पुरुषसमासः।

वालिवधम्;वालिनः वधः वालिवधः,तम् = षष्ठीतत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः**

१. सुग्रीवेण श्रीरामाय किं निवेदितम् ?

२. श्रीरामेण किं प्रतिज्ञातम् ?

## ५.२.५ रामस्य सामर्थ्यं प्रति, सुग्रीवस्य शङ्का

वालिनश्च बलं तत्र, कथयामास वानरः ।
सुग्रीवः शङ्कितश्चासीत् नित्यं वीर्येण राघवे ।। ६३ ।।

पद्यपरिचयः;अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः;'सुग्रीवः अनुपदमेव वालिनः बलपराक्रमादिकं श्रीरामाय निवेदयति इति अमुम् अंशं ज्ञापयन् अयं श्लोकः'राम-सुग्रीवयोः अग्निसाक्षिकं सख्यम्'इत्येतत् -नामके किष्किन्धकाण्डकथा भागे वर्तते।

पदविभागः; वालिनः, च, बलम्, तत्र, कथयामास, वानरः ।
सुग्रीवः, शङ्कितः, च, आसीत्, नित्यम्, वीर्येण, राघवे ।।

अन्वयक्रमः; वानरः सुग्रीवः राघवे वीर्येण नित्यं शङ्कितः च आसीत् (सः) तत्र वालिनः बलं च कथयामास ।

प्रतिपदार्थः; वानरः= कपिः; सुग्रीवः = राजा सुग्रीवः,वीर्येण=(वालिनः)शौर्येण धैर्येण पराक्रमेण बलेन;(वालिनः समः भवति वा ,न वा इति ) राघवे = श्रीरामे;नित्यम् = सततम् ; शङ्कितः = सन्देहयुक्तः ; च = अपि ; आसीत् = अवर्तत ; तत्र = तस्मिन् प्रदेशे ;वालिनः = वालिनामकस्य वानरराजस्य; बलम् = शक्तिम्; कथयामास = अवदत् च।

श्लोकभावः;राम-सुग्रीवयोः मध्ये मैत्री भवति। श्रीरामः वालिनः वधं प्रतिज्ञास्यति। परन्तु वालिनः वधस्य सम्पादने,श्रीरामस्य तादृशं सामर्थ्यम् अस्ति वा न वा सुग्रीवः नित्यं शङ्कितः भवति।

यथावसरं सुग्रीवः--वालीबलसम्पन्नः।सः कुक्षौ गृहीत्वा अरिभयङ्करं रावणम् एव चतुस्समुद्रान् भ्रामयति-- इत्येवं वालिनः बलं पराक्रमं च उद्दिश्य श्रीरामाय निवेदयति।एवं सुग्रीवः परोक्षतः श्रीरामस्य बलं ज्ञातुम् उत्सुकः भवति।

विशेषांशः; सुग्रीवः श्रीरामस्य शौर्य- धैर्य- पराक्रमादिकं ज्ञातुकामः जातः इत्यंशः अत्र सूचितः।

व्याकरणांशाः; सन्धिः; वालिनश्च; वालिनः + च (अः + च =श्)विसर्गसन्धिः।

शङ्कितश्च ; शङ्कितः + च (अः + च =श्)विसर्गसन्धिः।

चासीत् ; च + आसीत् (अ + आ = आ)सवर्णदीर्घसन्धिः।

**स्वावलोकनप्रश्नाः**

१.सग्रीवः किमर्थं नित्यं शङ्कितः भवति ?

२.श्रीरामः कस्य वचनात् सुग्रीवेण समागतः ?

## ५.२.६ वालिनः बलस्य ख्यापनम्

राघवप्रत्ययार्थं तु दुन्दुभेः कायम् उत्तमम् ।
दर्शयामास सुग्रीवो महापर्वतसन्निभम् ।। ६४ ।।

पद्यपरिचयः;अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः; 'श्रीरामाय सुग्रीवः स्वीयं बलपराक्रमादिकं प्रदर्शयति ' इति अमुम् अंशं ज्ञापयन् अयं श्लोकः'राम-सुग्रीवयोः अग्निसाक्षिकं सख्यम्'इत्येतत् -नामके किष्किन्धकाण्डकथाभागे वर्तते।

पदविभागः; - राघवप्रत्ययार्थम्, तु, दुन्दुभेः, कायम्, उत्तमम् ।
दर्शयामास,सुग्रीवः, महापर्वतसंनिभम् ।।

अन्वयक्रमः; सुग्रीवः राघवप्रत्ययार्थं तु महापर्वतसन्निभं दुन्दुभेः उत्तमं कायं दर्शयामास ।

प्रतिपदार्थः;सुग्रीवः = वानरराजः सुग्रीवः ;राघवप्रत्ययार्थम्,राघव = श्रीरामस्य; प्रत्ययार्थम्, विश्वासाय; महापर्वतसन्निभम्, महा, =उन्नतेन विशालेन च; पर्वत = गिरिणा;सन्निभम् =सदृशम्; दुन्दुभेः = दुन्दुभिनामकराक्षसस्य ; उत्तमम् = विस्तृतम् ; कायम् = शरीरम् ; दर्शयामास = अदर्शयत्।

श्लोकभावः; श्रीरामस्य बलपराक्रमादिकं ज्ञातुं सुग्रीवः पुनः अपि वालिनः पराक्रमं प्रस्तावयति।"दुन्दुभिः कश्चन राक्षसः,भयङ्कराकारः।महाकायः,पर्वतसन्निभः।सः वालिना हतः। तस्य देहः अयम्, पतितः अस्ति।पश्यतु भवान्" इति सुग्रीवः दुन्दुभेः राक्षसस्य अस्थिमात्रावशिष्टं निहतं शरीरं दर्शयति।

विशेषांशः;सुग्रीवः श्रीरामस्य शौर्य- धैर्य- पराक्रमादिकं ज्ञातुकामः भवति इत्यंशः अत्र सूचितः।

व्याकरणांशाः;समासः; राघवप्रत्ययार्थम्; - राघवस्य प्रत्ययः,तस्मै = चतुर्थीतत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः**

१.सग्रीवः किं दर्शयामास ?

२.सग्रीवः किमर्थं दर्शयामास ?

## ५.२.७ स्वीयबलप्रदर्शनाय श्रीरामस्य उपक्रमणम्

उत्स्मसित्वा महाबाहुः प्रेक्ष्य चास्थि महाबलः ।
पादाङ्गुष्ठेन चिक्षेप सम्पूर्णं दशयोजनम् ।। ६५ ।।

पद्यपरिचयः;अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः;'श्रीरामः अपि सुग्रीवाय स्वीयं बलपराक्रमादिकं प्रदर्शयति'इति अमुम् अंशं ज्ञापयन् अयं श्लोकः'राम-सुग्रीवयोः अग्निसाक्षिकं सख्यम्'इत्येतत् -नामके किष्किन्धकाण्डकथाभागे वर्तते।

पदविभागः; उत्स्मयित्वा, महाबाहुः, प्रेक्ष्य, च, अस्थि, महाबलः ।
पादाङ्गुष्ठेन, चिक्षेप, सम्पूर्णम्, दशयोजनम् ।।

अन्वयक्रमः; महाबाहुः महाबलः (रामः)अस्थि प्रेक्ष्य उत्स्मयित्वा च,पादाङ्गुष्ठेन सम्पूर्णं दशयोजनं चिक्षेप

प्रतिपदार्थः; - महाबाहुः = दीर्घबाहुः; महाबलः = महाशक्तिसम्पन्नः;(रामः=श्रीरामः) अस्थि = (दुन्दुभेः शवं) कीकसम्; प्रेक्ष्य = दृष्ट्वा; उत्स्मयित्वा = मन्दं विहस्य; च = अपि; पादाङ्गुष्ठेन, पाद =चरणस्य; अङ्गुष्ठेन=प्रथमाङ्गुल्या; सम्पूर्णम्=समस्तम्;दशयोजनम् = दशयोजनपरिमितम् दूरम्, चिक्षेप = अक्षिपत्;

श्लोकभावः; श्रीरामः अपि सुग्रीवस्य आन्तर्यं जानाति। वालिनः बलपराक्रमादिकं प्रति अवगाहितः भवति। सुग्रीवस्य स्वसामर्थ्यं प्रति विश्वासं जनयितुं सिद्धः भवति। सुग्रीवेण प्रदर्शितं दुन्दुभेः निहतं कायम् =अस्थिसमुदायं पश्यति।स्मितं करोति। तत् एतत् अकिञ्चित्करं भावयति। तत् अस्थि पञ्जरं पादाङ्गुष्ठेनैव दशयोजनपरिमितं दूरं निक्षिपति।

व्याकरणांशाः;सन्धिः;प्रेक्ष्य; प्र + ईक्ष्य (अ + ई =ए)गुणसन्धिः।
महेषुणा; महा + इषुणा (आ + इ =ए)गुणसन्धिः।
चास्थि;च + अस्थि (अ + अ =आ )सवर्णदीर्घसन्धिः।
पादाङ्गुष्ठेन; पाद + अङ्गुष्ठेन (अ + अ =आ)सवर्णदीर्घसन्धिः।
सप्तेकेन; सप्त + एकेन (अ + ए =ऐ)वृद्धिसन्धिः।
चैव; च + एव(अ + ए =ऐ)वृद्धिसन्धिः।

समासः; महाबाहुः; महान्तौ बाहू यस्य सः = बहुव्रीहिसमासः।
महाबलः; महद् बलं यस्य सः = बहुव्रीहिसमासः।

**स्वावलोकनप्रश्नाः**

१.श्रीरामः दुन्दुभेः कायं किम् अकरोत् ?

## ५.२.८ श्रीरामस्य सप्ततालभेदनम्

बिभेद च पुनः सालान् सप्तैकेन महेषुणा ।
गिरिं रसातलं चैवं जनयन् प्रत्ययं तदा ।। ६६ ।।

पद्यपरिचयः;अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः; ' श्रीरामः अपि स्वस्मिन् सुग्रीवस्य प्रत्ययं जनयितुं सप्ततालान् एकेन इषुणा भिनत्ति ' इति अमुम् अंशं ज्ञापयन् अयं श्लोकः'राम-सुग्रीवयोः अग्निसाक्षिकं सख्यम्'इत्येतत् -नामके किष्किन्धकाण्डकथाभागे वर्तते।

पदविभागः; बिभेद, च, पुनः, सालान्, सप्त, एकेन, महेषुणा ।
गिरिम्, रसातलम्, च , एव, जनयन्, प्रत्ययम्, तदा ।।

अन्वयक्रमः;पुनः च प्रत्ययम् जनयन्,तदा प्रएकेन महेषुणा सप्त सालान् गिरिं रसातलं च पुनः बिभेद ।

प्रतिपदार्थः; पुनश्च = भूयः अपि; प्रत्ययम् = विश्वासम्; जनयन् = उत्पादयन्;तदा = तस्मिन्नेव समये; एकेन = एकसंख्याकेन ; एव = केवलम् ; महेषुणा,महा = प्रभावपूर्णेन ; इषुणा = बाणेन; सप्त = सप्तसंख्याकान् ; सालान् = सालवृक्षान् ; च = तथा; गिरिम् = पर्वतम् ; रसातलम् = अधो लोकम्,पातालं ;यथा पतति तथा, बिभेद = चिच्छेद।

श्लोकभावः;श्रीरामः, स्वसामर्थ्यं प्रति सुग्रीवस्य विश्वासजननाय ,दुन्दुभेः अस्थिपञ्जरस्य दूरतः निक्षेपणेन तृप्तः न भवति।किञ्च क्रमशः सप्त तालान्,एकं महापर्वतं च एकेन एव बणेन प्रहरति ,युगपदेव पातालं प्रापयति। सुग्रीवः श्रीरामस्य भुजबलपराक्रमं जानाति।ततो सुग्रीवस्य श्रीरामे विश्वासश्च अधिकं जायते।

विशेषांशः; वालिनः वधाय आवश्यकं बलपराक्रमादिकं मम (= श्रीरामस्य) सकाशे अस्ति इत्यपि श्रीरामः सुग्रीवाय सूचयतीति अवगतः भवति।

व्याकरणांशाः; सन्धिः; सप्तैकेन; सप्त + एकेन (अ + ए=ऐ)वृद्धिसन्धिः।
समासः; महेषुणा; महान् च सः इषुः,तेन = विशेषणपूर्वपदकर्मधारयसमासः।

**स्वावलोकनप्रश्नाः**

१.श्रीरामः सप्त तालान् किमर्थं बिभेद ?

## ५.२.९ राम-सुग्रीवयोः परस्परं विश्वसनम् - किष्किन्धायाः गमनम्

ततः प्रीतमनास्तेन विश्वस्तः स महाकपिः ।
किष्किन्धां रामसहितो जगाम च गुहां तदा ।।६७ ।।

पद्यपरिचयः;अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः; 'श्रीरामस्य शौर्ये धैर्ये पराक्रमे च विश्वासम् आप्तः सुग्रीवः वालिना योद्धुम् किष्किन्धां गच्छति ' इति अमुम् अंशं ज्ञापयन् अयं श्लोकः'राम-सुग्रीवयोः अग्निसाक्षिकं सख्यम्'इत्येतत् -नामके किष्किन्धकाण्डकथाभागे वर्तते।

पदविभागः; - ततः, प्रीतमनाः, तेन, विश्वस्तः, सः, महाकपिः ।
किष्किन्धाम् ,रामसहितः, जगाम, च ,गुहाम्, तदा ।।

अन्वयक्रमः; - ततः स महाकपिः तेन विश्वस्तः प्रीतमनाः च तदा रामसहितः किष्किन्धां गुहां जगाम ।

प्रतिपदार्थः; - ततः = श्रीरामस्य बले पराक्रमे च विश्वासजननानन्तरम्, सः = श्रीरामस्य बलं शङ्कमानः; महाकपिः = वानरराजः सुग्रीवः;तेन = सप्ततालभेदनेन;विश्वस्तः = विश्वासम् आप्तः; प्रीतमनाः = सन्तोषम् प्राप्तश्च;(सन्) तदा = तस्मिन् एव काले ;रामसहितः,राम = श्रीराघवेण सहितः =युक्तः, किष्किन्धाम् = किष्किन्धानगर्याः ; गुहाम् = बिलम्, जगाम = गतवान्।

श्लोकभावः; दुन्दुभेः अस्थिपञ्जरस्य प्रक्षेपेण, सप्ततालभेदनेन च श्रीरामस्य सामर्थ्यं प्रति सुग्रीवस्य विश्वासः जातः।परस्परं श्रीराम-सुग्रीवौ विश्वासपूर्णौ च जातौ। प्रीतमनस्कौ च भवतः। अनन्तरं महाकपिः सुग्रीवः अपि प्रसन्नः भवति, वालिनं योद्धुं सिद्धः भवति। श्रीरामेण सह किष्किन्धायाः गुहां गच्छति।

विशेषांशः;वालिनः विषये सुग्रीवस्य विद्यमाना प्रबला प्रतीकारपूरणेच्छा अत्र स्फुटा भवति।

व्याकरणांशाः;सन्धिः; प्रीतमनास्तेन; प्रीतमनाः + तेन (आः + त् = स् )विसर्गसन्धिः।
सहितो जगाम; सहितः + जगाम (तः + ज् = ओ )विसर्गसन्धिः।
समासः; प्रीतमनाः ; प्रीतं मनः यस्य सः = बहुव्रीहिसमासः।
महाकपिः; महांश्चासौ कपिः = विषेषणपूर्वपदकर्मधारयसमासः।
रामसहितः; रामेण सहितः = तृतीयातत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः**

१. सुग्रीवः किमर्थं प्रीतमनाः जातः?

२. सुग्रीवः केन सहितः किष्किन्धां गतः ?

## ५.२.१० युद्धाय सुग्रीवस्य गर्जनम्

ततोऽगर्जद्धरिवरः सुग्रीवो हेमपिङ्गलः ।
तेन नादेन महता निर्जगाम हरीश्वरः ।। ६८ ।।

पद्यपरिचयः;अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः; ' श्रीरामस्य प्रोत्साहनेन सुग्रीवः वालिनं युद्धाय आहूतवान् ' इति अमुम् अंशं ज्ञापयन् अयं श्लोकः'राम-सुग्रीवयोः अग्निसाक्षिकं सख्यम्'इत्येतत् नामके किष्किन्धकाण्डकथाभागे वर्तते।

पदविभागः; ततः, अगर्जत् ,हरिवरः, सुग्रीवः, हेमपिङ्गलः, ।
तेन, नादेन, महता, निर्जगाम, हरीश्वरः, ।।

अन्वयक्रमः; ततः हेमपिङ्गलः हरिवरः सुग्रीवः अगर्जत्। महता तेन नादेन हरीश्वरः (वाली) निर्जगाम ।

प्रतिपदार्थः; ततः = किष्किन्धायाम् गुहां प्रति गमनानन्तरम्; हेमपिङ्गलः, हेम= सुवर्णस्येव, पिङ्गलः = हरितवर्णः; हरिवरः = वानरश्रेष्ठः ; सुग्रीवः = राजा सुग्रीवः ; अगर्जत् = गर्जितवान्; महता = उच्चैः ; तेन = युद्धकण्डूतिना ;नादेन = गर्जनेन ; हरीश्वरः = वानरराजः वाली, निर्जगाम = गुहातः बहिरागच्छत्।

श्लोकभावः;सुग्रीवस्य श्रीरामेण मैत्री जता। श्रीरामे सुग्रीवस्य विश्वासश्च वर्धितः ।वालिनं जेतुं उत्सुकश्च जातः।श्रीरामेण सह सुग्रीवः किष्किन्धां गच्छति।सुग्रीवः पिङ्गलवर्णः कान्तिमान्, सुवर्णसदृशः।सः गुहाम् एत्य वालिनं युद्धाय प्रेरयन् उच्चैः गर्जति। वाली अपि सुग्रीवस्य प्रेरकं गर्जनं श्रुत्वा युद्धाय सिद्धः भवति।

विशेषांशः; श्रीरामस्य सहकारेण वर्धितः, सुग्रीवस्य आत्मविश्वासः अत्र स्फुटः भवति।

व्याकरणांशाः;सन्धिः;ततोऽगर्जत् ; ततः + अगर्जत् (अः + अ =ओऽ)विसर्गसन्धिः।
सुग्रीवो हेमपिङ्गलः;सुग्रीवः+हेमपिङ्गलः(अः+ अ=ओऽ) विसर्गसन्धिः।
अगर्जद्धरिवरः; अगर्जत् + हरिवरः(त् + ह् =ध्)पूर्वसवर्णसन्धिः।
समासः;हरिवरः; हरिषु वरः = सप्तमीतत्पुरुषसमासः।
हेमपिङ्गलः;हेम इव पिङ्गलः = कर्मधारयसमासः।
हरीश्वरः;हरीणाम् + ईश्वरः = षष्ठीतत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः**

१'निर्जगाम हरीश्वरः' अत्र हरीश्वरः कः?

## ५.२.११ वालिनः संहरणम् -

अनुमान्य तदा तारां सुग्रीवेण समागतः ।
निजघान च तत्रैनं शरेणैकेन राघवः ।। ६९ ।।

पद्यपरिचयः;अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः; 'श्रीरामः वालिनं हन्ति' इति अमुम् अंशं ज्ञापयन् अयं श्लोकः 'राम-सुग्रीवयोः अग्निसाक्षिकं सख्यम्' इत्येतत्-नाामके किष्किन्धकाण्डकथा भागे वर्तते।

पदविभागः; अनुमान्य, तदा, तारां, सुग्रीवेण, समागतः, ।

निजघान, च ,तत्र, एनम्, शरेण, एकेन, राघवः ।।

अन्वयक्रमः; तदा वाली ताराम् अनुमान्य सुग्रीवेण (योद्धुं) समागतः । राघवः च एनं तत्र एकेन शरेण निजघान ।

प्रतिपदार्थः; तदा = किष्किन्धागुहायां सुग्रीवस्य गर्जनं यदा श्रुतः तदा; वाली=सुग्रीवस्य अग्रजः; ताराम् = जायाम् ताराम् ; अनुमान्य = आश्वास्य, अङ्गीकारयित्वा, सुग्रीवेण =अनुजेन सुग्रीवेण (योद्धुम्=युद्धं कर्तुम्,) समागतः = समायातः; राघवः = श्रीरामः; च = तु; तत्र = वालि-सुग्रीवयोः युद्धे; एकेन = केवलम् एकेनैव; शरेण = बाणेन; एनम् = वालिनम्; निजघान =हतवान्।

श्लोकभावः' तारा 'सुग्रीवस्य रामेण सह मैत्री जाता। इदानीम् अयं रामस्य सहायम् आप्तः। अतः सुग्रीवः इदानीं जेतुं न शक्यः। तस्मात् त्वया न गन्तव्यम् ''इत्येवं बहुधा वालिनं निवारयति। वाली नैव शृणोति। ताराम् एव आश्वासयति, अनुनयति ।एवं स्वपत्न्याः तारायाः वचनम् अपि अगृहीत्वा वाली सुग्रीवेण सह योद्धुं सिद्धः भवति । तत्र किष्किन्धाकन्दरायां वालि-सुग्रीवौ परस्परं युध्यतः।तयोः महान् युद्धः प्रचलति। युद्धे सुग्रीवः किञ्चित् बलहीनः भवति। तदवगत्य श्रीरामः एकेनैव बाणेन वालिनं प्रहरति।तेन वाली निहतः भवति।

विशेषांशः; अत्र च श्रीरामस्य बलपराक्रमादिकं, सत्यसन्धातृत्वं च निरूपितं भवति।

व्याकरणांशाः;सन्धिः; तत्रैनम् ; तत्र + एनम् (अ + ए = ऐ)वृद्धिसन्धिः।

शरेणैकेन ; शरेण + एकेन (अ + ए = ऐ)वृद्धिसन्धिः।

**स्वावलोकनप्रश्नाः**

१. तारा का ?

२. 'अनुमान्य'इत्यस्य अर्थः कः?

## ५.२.१२ राज्ये सुग्रीवस्य प्रतिष्ठापनम्

ततः सुग्रीववचनात् हत्वा वालिनमाहवे ।
सुग्रीवमेव तद्राज्ये राघवः प्रत्यपादयत् ।। ७० ।।

पद्यपरिचयः;अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः; ' श्रीरामः वालिनं हत्वा ,सुग्रीवं वानरराज्ये अभिषेचति, इति अमुम् अंशं ज्ञापयन् अयं श्लोकः'राम-सुग्रीवयोः अग्निसाक्षिकं सख्यम्'इत्येतत् नामके किष्किन्धकाण्डकथाभागे वर्तते।

पदविभागः; ततः, सुग्रीववचनात्, हत्वा, वालिनम्, आहवे, ।
सुग्रीवम्, एव, तद्राज्ये, राघवः, प्रत्यपादयत् ।।

अन्वयक्रमः; ततः राघवः आहवे वालिनं हत्वा, सुग्रीववचनात्, राज्ये, सुग्रीवम्, एव प्रत्यपादयत्।

प्रतिपदार्थः; ततः = अनन्तरम्; आहवे = युद्धे; वालिनम् = सुग्रीवस्य अग्रजं कपिराजम्; हत्वा =

निहत्य;सुग्रीववचनात्, सुग्रीव = वालिनः अनुजाय सुग्रीवाय; वचनात् =प्रतिज्ञातवचनानुसारम्; राघवः = श्रीरामः; तद्राज्ये = किष्किन्धाराज्ये; सुग्रीवम् एव =स्वीयं मित्रं वानरश्रेष्ठम् सुग्रीवमेव ; प्रत्यपादयत् = प्रतिष्ठितवान् ।

श्लोकभावः;श्रीराघवः युद्धे वालिनं हन्ति। प्रतिज्ञातं च साधयति ।वाग्दत्तम् पालयन् सुग्रीवम् एव राज्ये प्रतिष्ठापयति । एवम् अत्र श्रीरामस्य सत्यसन्धता, कार्यदक्षता ,प्रतापशीलता च सुग्रीवस्य स्फुटाः भवन्ति ।

विशेषांशः; अत्र च श्रीरामस्य बलपराक्रमादिकं, सत्यसन्धातृत्वं च निरूपितं भवति।

व्याकरणांशाः;सन्धिः; वचनाद्धत्वा ; वचनात् + हत्वा (त् + ह् = ध्)पूर्वसवर्णसन्धिः।

तद्राज्ये ; तत् + राज्ये (त् + र् = द् )जश्त्वसन्धिः।

प्रत्यपादयत् ; प्रति + अपादयत् (इ + अ = य्)यणादेशसन्धिः।

समासः ;सुग्रीववचनात् ; सुग्रीवस्य वचनं ,तस्मात् = षष्ठीतत्पुरुषसमासः।

तद्राज्ये ;तस्य राज्यं तद्राज्यम् = षष्ठीतत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः**

१.सुग्रीववचनम् =सुग्रीवाय वचनम्, किम् ?

२.'प्रत्यपादयत्'इत्यस्य अर्थः कः?

## ५.२.१३ सीतान्वेषणाय दिशः वानराणां प्रस्थापनम्

स च सर्वान् समानीय वानरान् वानरर्षभः ।
दिशः प्रस्थापयामास दिदृक्षुर्जनकात्मजाम् ।। ७१ ।।

पद्यपरिचयः;अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः; 'सुग्रीवः अपि सीतान्वेषणाय दिशः वानरान् प्रेषयति' इति अमुम् अंशं ज्ञापयन् अयं श्लोकः'राम-सुग्रीवयोः अग्निसाक्षिकं सख्यम्'इत्येतत्-नामके किष्किन्धकाण्डकथाभागे वर्तते।

पदविभागः; सः, च, सर्वान्, समानीय, वानरान्, वानरर्षभः, ।
दिशः, प्रस्थापयामास, दिदृक्षुः, जनकात्मजाम्, ।।

अन्वयक्रमः; सः च वानरर्षभः जनकात्मजां दिदृक्षुः सर्वान् वानरान् समानीय दिशः प्रस्थापयामास ।

प्रतिपदार्थः; सः = श्रीरामेण किष्किन्धाराज्ये अभिषिक्तः; वानरर्षभः = कपिश्रेष्ठः सुग्रीवः; जनकात्मजाम् = जनकपुत्रीम्; दिदृक्षुः =द्रष्टुम्(अन्वेष्टुम्) इच्छुः; (सन्) सर्वान् = निखिलान्; वानरान् = कपीन् ; समानीय = समावेशयित्वा ; दिशः = चतस्रः आशाः; प्रस्थापयामास = प्रेषयामास।

श्लोकभावः;सुग्रीवः रामस्य सहायेन वालिनः पीडातः विनिर्मुक्तः भवति। वालिनः वधानन्तरं सुग्रीवः किष्किन्धाराज्ये अभिषिक्तः भवति । समनन्तरम् एव वानरश्रेष्ठो राजा सुग्रीवः निजराज्यवर्तिनः

सकलान् वानरान् आह्वयति । सीतायाः अन्वेषणार्थं सर्वासु दिक्षु प्रेषयति च।
विशेषांशः;प्रतिज्ञातं पालयन् सुग्रीवः अपि श्रीरामकार्यसाधनाय संसिद्धः भवति इत्यंशः अत्र निरूपितः।

व्याकरणांशाः; सन्धिः; वानरर्षभः; वानर + ऋषभः (अ + ऋ = अर् )गुणसन्धिः।
समासः; वानरर्षभः; वानरेषु ऋषभः वानरर्षभः = सप्तमीतत्पुरुषसमासः।
जनकात्मजाम्; जनकस्य आत्मजा,ताम् = षष्ठीतत्पुरुषसमासः।
कोशः; दिक् ; दिशश्च ककुभः काष्ठा (अमरकोशः)

**स्वावलोकनप्रश्नाः**

१. अत्र वानरर्षभः कः ?
२.'दिदृक्षुः' इत्यस्य अर्थः कः?

## ५.३ उपसंहारः

एवं अत्र किष्किनधाकाण्डकथाभागः वर्णितः ।अस्यैव पाठ्यांशस्य विषयपरतया रामसुग्रीवयोः अग्निसाक्षिकं सख्यम् इति प्रसिद्धिः अस्ति इति च सूचितम् । अत्र - राम सुग्रीवयोः अग्निसाक्षिकं सख्यम्,सुग्रीवस्य स्वीयवृत्तान्तस्य श्रावणम्,रामस्य बलं प्रति सुग्रीवस्य शङ्कनम्,सुग्रीवस्य वालिनः बलप्रदर्शनम्,श्रीरामस्य स्वीयबलप्रदर्शनाय उपक्रमणम्,श्रीरामस्य सप्ततालभेदनम्, किष्किन्धायाः गमनम् युद्धाय सुग्रीवस्य गर्जनम् वालिनः संहरणम्, राज्ये सुग्रीवस्य प्रतिष्ठापनम् सीतान्वेषणाय दिशः वानराणां प्रस्थापनम्,इत्येते अंशाः प्रधानतया प्रस्तुताः सन्ति।

## ५.४ अभ्यासः

पद्यद्वयं व्याख्यात?

१.अनुमान्य तदा तारां सुग्रीवेण समागतः ।
निजघान च तत्रैनं शरेणैकेन राघवः ।।

२.वालिनश्च बलं तत्र, कथयामास वानरः ।
सुग्रीवः शङ्कितश्चासीत् नित्यं वीर्येण राघवे ।।

# अंशः-VI; सीतायाः अन्वेषणम् (७२-७८)

६.० परिचयः
६.१ लक्ष्याणिः
६.२ सीतायाः अन्वेषणम्
६.२.१ हनुमतः समुद्रोल्लङ्घनम्
६..२.२ सीतायाः दर्शनम्
६.२.३ अभिज्ञानस्य प्रदानम्
६.२.४ सेनानायकानाम् - मन्त्रिपुत्राणां च हननम्
६.२.५ ब्रह्मास्त्रेण ग्रहणम्
६.२.६ लङ्कायाः दहनम्
६.२.७ रामाय सीतादर्शनस्य निवेदनम्
६.३ उपसंहारः
६.४ अभ्यासः

## ६.० परिचयः

अयं पाठ्यांशः संक्षेपरामायणे द्विसप्ततितमश्लोकतः आरभ्य अष्टसप्ततितमश्लोकपर्यन्तं (७२-७८)परिमितः वर्तते। सुन्दरकाण्डान्तर्गतान् अंशान् बोधयति। सुन्दरकाण्डान्तर्गता कथा अत्र संक्षेपेण लभ्यते।

प्रकृते—सम्पातिः अङ्गदादिभ्यः सीतां रावणापहृतां कथयति। हनुमान् समुद्रं तरति। लङ्कां प्राप्नोति। अशोकवने सीतां पश्यति। रामस्य अभिज्ञां सीतायै ददाति। सीतां समाश्वसिति। रावणबलं ज्ञातुं इच्छति। पञ्च सेनानाकान्,सप्त मन्त्रिपुत्रान् च हन्ति। इन्द्रजिता ब्रह्मास्त्रेण गृहीतो भवति। तद्व्याजेन रावणसभां प्राप्नोति। तस्य हितं बोधयति। लाङ्कां दहति। राममधिगम्य सीतासन्दर्शनं निवेदयति।

## ६.१ लक्ष्याणि

महिमान्विताः प्रभावपूर्णाश्च पुरुषाः, मानावानाम् आदर्शभूताः भवन्ति। तेषां जीवनचरितं स्फूर्तिप्रदम् श्रेयोदायकञ्च भवति। तादृशेषु पुराणपुरुषेषु आञ्जनेयः प्रमुखः। अयं केसरनन्दनः। अञ्जनीगर्भसम्भूतः। नवव्याकरणवेत्ता। सुग्रीवसचिवः। उद्भटराजनीतिज्ञः। शूरः,वीरः, जितेन्द्रियश्च। श्रीराम - सुग्रीवयोः मैत्रीस्थापनायाम् अस्य प्रशंसनीयं नेपथ्यम् अस्ति। श्रीराम-सुग्रीवयोः अपन्निवारणे, सुग्रीवस्य राज्यसम्पादने, सीतान्वेषणे, समुद्रतरणे, सीतादर्शने, युद्ध-प्रचलने, रावणसंहारे, च अस्य स्थानं महत्वपूर्णम्। अयं च पाठ्यांशः महत्वपूर्णस्य हनूमतः कार्य-जातं वर्णयति।

एतत् पाठ्यांशस्य अध्ययनेन ---

अ) हनूमतः स्वामिभक्तिपरायणतां ज्ञातुं प्रभवन्ति।

इ) हनूमतः रामकार्यदुरन्धरतां लिखितुं प्रभवन्ति।

उ) हनूमतः कार्यसाधनक्षमतां पठितुं प्रभवन्ति।

ऋ) हनूमतः बुद्धिकुशलतां प्रति भाषितुं समर्थो भवन्ति।

ए) "शौर्यं दाक्ष्यम् बलम् धैर्यम् प्राज्ञतन्नयसाधनम्।
विक्रमश्च प्रभावश्च..." एतान् हनूमतः गुणान् अवगन्तुं समर्थो भवन्ति।

## ६.२ सीतायाः अन्वेषणम्

### ६.२.१ हनुमतः समुद्रोल्लङ्घनम्

ततो गृध्रस्य वचनात् सम्पातेर्हनुमान् बली ।
शतयोजनविस्तीर्णं पुप्लुवे लवणार्णवम् ।। १.१.७२ ।।

पद्यपरिचयः;अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः ; ' हनूमान् अब्धिम् अतरत् ' इत्येतदंशस्य निरूपणसन्दर्भे,अयं श्लोकः सुन्दरकाण्ड कथाभागे वर्तते।

पदविभागः ; ततः, गृध्रस्य, वचनात्, सम्पातेः, हनुमान्, बली ।
शतयोजनविस्तीर्णम्, पुप्लुवे, लवणार्णवम् ।।

अन्वयक्रमः; ततः बली हनुमान्, सम्पातेः गृध्रस्य वचनात्, शतयोजनविस्तीर्णं लवणार्णवं पुप्लुवे।

प्रतिपदार्थः; ततः =अनन्तरम्; बली = बलवान्; हनुमान् = आञ्जनेयः; सम्पातेः गृध्रस्य = सम्पाति नामकस्य गृध्रस्य; वचनात् = कथनात्; शतयोजनविस्तीर्णम्, शतयोजन = योजनानां शतैः;विस्तीर्णम् =विस्तृतम्; लवणार्णवम् = क्षारसमुद्रम्, पुप्लुवे = आकाशमार्गेण प्लवनं चकार ।

श्लोकभावः;हनुमान् वायुसुतः,उल्लङ्घने समर्थः, महाबलसम्पन्नः च अस्ति।सम्पातिः जटायुषः ज्येष्ठभ्राता, दशरथस्य मित्रं च। स च, लङ्काधिपेन रावणेन सीता अपहृता इति वानराणां समाचारं ददाति। हनुमान् सम्पातेः वाक्यं शृणोति ।सीताम् अन्वेष्टुकामः शतयोजनविस्तीर्णं समुद्रं लङ्घयति।

विशेषांशः ; समुद्रोल्लङ्घनम् हनुमतः अनन्यसाधारणं बुद्धिवैभवं ,कार्यदीक्षापरत्वं च प्रकटयति।

व्याकरणांशाः सन्धिः; सम्पातेर्हनुमान् ; सम्पातेः + हनुमान् (एः+ ह्= र्) विसर्गसन्धिः।

लवणार्णवम् ; लवण + अर्णवम् (अ + अ = आ) सवर्णदीर्घसन्धिः।

ततो गृध्रस्य; ततः + गृध्रस्य (अः + ग् = ओ) विसर्गसन्धिः।

समासः; शतयोजनम् ; शतानां योजनानां समाहारः शतयोजनम् =द्विगुसमासः।

लवणार्णवम् ; लवणः च असौ अर्णवः लवणार्णवः,तम् = विशेषणपूर्वपदकर्मधारयः।

**स्वावलोकनप्रश्नाः**

१.हनुमान् कस्य वचनात् लवणार्णवं पुप्लुवे ?

## ६.२.२ सीतायाः दर्शनम्

तत्र लङ्कां समासाद्य पुरीं रावणपालिताम् ।
ददर्श सीतां ध्यायन्तीम् अशोकवनिकां गताम् ।। ७३ ।।

पद्यपरिचयः;अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः; ' हनुमान् लङ्कायाम् अशोकवने सीतां पश्यति ' इत्येतदंशस्य निरूपणसन्दर्भे, अयं श्लोकः सुन्दरकाण्डकथाभागे वर्तते।

पदविभागः - तत्र, लङ्काम्, समासाद्य, पुरीम्, रावणपालिताम् ।
ददर्श, सीताम्, ध्यायन्तीम्, अशोकवनिकाम्, गताम् ।।

अन्वयक्रमः ; (हनुमान्) रावणपालितां लङ्कां पुरीं समासाद्य तत्र अशोकवनिकां गतां ध्यायन्तीं सीतां ददर्श ।

प्रतिपदार्थः ; (हनुमान् =आञ्जनेयः;)रावणपालिताम्, रावण = दशाननेन; पालिताम् = परिरक्षिताम्; लङ्काम् = लङ्कानाम्नीम्; पुरीम् = नगरीम्; समासाद्य = साम्प्राप्य; तत्र = लङ्कायाम्; अशोकवनिकाम् = अशेकवाटिकायाम्; गताम् = स्थिताम्;सीताम् = जानकीम्, ध्यायन्तीम् =रामम् अनुस्मरन्तीम्; ददर्श = दृष्टवान् ।

श्लोकभावः - हनुमान् सागरं तरति।लङ्कापुरीं प्राप्नोति।लङ्कापुरीं च रावणः पालयति । हनुमता सर्वा च लङ्का सीतायै शोधिता। कुत्रापि सीता न दृष्टा। सीता अशोकवने स्थिता। सा राक्षसैः परिवृता भयकम्पिता अस्ति। मनसा श्रीरामम् एव चिन्तयन्ती अस्ति । हनुमान् एवं दुःखितां रामसंसक्तमानसां सीतां अन्ततः अशोकवने पश्यति ।

विशेषांशः; अत्र 'ध्यायन्ती'शब्दः सीतायाः भर्तृसंसक्तमानसत्वं स्फुटयति।

व्याकरणांशाः ; समासः ; रावणपालिताम् ; रावणेन पालिता, ताम् = तृतीयातत्पुरुषसमासः।
अशोकवनिकाम् ;अशोक इति वनिका,ताम् = सम्भावनपूर्वपदकर्मधारयसमासः।

**स्वावलोकनप्रश्नाः**

१. लङ्का कीदृशी ?

२. सीता कुत्र दृष्टा ?

## ६.२.३ अभिज्ञानस्य प्रदानम्

निवेदयित्वाऽभिज्ञानं प्रवृत्तिं विनिवेद्य च ।
समाश्वास्य च वैदेहीं मर्दयामास तोरणम् ।। ७४ ।।

पद्यपरिचयः;अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः ; ' हनुमान् सीतायै श्रीरामस्य अभिज्ञानं समर्पयति 'इत्येतदंशस्य निरूपणसन्दर्भे,अयं श्लोकः सुन्दरकाण्डकथाभागे वर्तते।

पदविभागः ; निवेदयित्वा, अभिज्ञानम्, प्रवृत्तिम् ,विनिवेद्य च ।
समाश्वास्य, च, वैदेहीम्, मर्दयामास, तोरणम् ।।

अन्वयक्रमः ; (ततश्च हनुमान्) अभिज्ञानं निवेदयित्वा ,(रामस्य)प्रवृत्तिं च विनिवेद्य, वैदेही समाश्वास्य च, तोरणं मर्दयामास ।

प्रतिपदार्थः ; (ततश्च =अशोकवने सीतायाः दर्शनानन्तरम् ; हनुमान् = आञ्जनेयः ; सीतायै = जानक्यै) अभिज्ञानम् = परिचायकं वस्तु ; निवेदयित्वा = समर्प्य ; (रामस्य = श्रीरामस्य) प्रवृत्तम्= वृत्तान्तम् ; च = अपि ; विनिवेद्य = सविस्तरं निश्शेषं ज्ञापयित्वा ; वैदेहीम् = सीताम् ; समाश्वास्य= आश्वस्य ; च = अनन्तरम् ; तोरणम् =अशोकवनिकाद्वारम्, मर्दयामास = ध्वंसं कृतवान्।

श्लोकभावः ; अशोकवने सीता हनुमन्तं च राक्षसमाया इति बिभेति। हनुमान् अपि विश्वासं जनयितुं परिचायकं श्रीरामस्य अङ्गुलीयकं सीतायै समर्पयति। सुग्रीवेण श्रीरामस्य सख्यं च निवेदयति।सीता हनुमद्द्वारा आत्मीयं श्रीरामस्य वृत्तान्तं शृणोति।प्रकामं खिन्ना भवति। दुःखितां सीतां च आश्वासयति।स्वस्य आगमनं राक्षसानां ज्ञापयितुम् अशोकवाटिकाद्वारं भञ्जयति च।

विशेषांशः ; सीतारमयोः हनुमतः भक्तिः अत्र स्पष्टा भवति।

व्याकरणांशाः

सन्धिः; निवेदयित्वाभिज्ञानम् ; निवेदयित्वा +अभिज्ञानम्(आ + अ =आ)सवर्णदीर्घसन्धिः।

कोशः ; तोरणः ; तोरणोऽस्त्री बहिर्द्वारम् (अमरकोशः)
प्रवृत्तिः ; वार्ता प्रवृत्तिर्वृत्तान्तः (अमरकोशः)

**स्वावलोकनप्रश्नाः**

१.हनुमान् सीतीयै कि निवेदितवान्?
२.वैदेही का ?

## ६.२.४ सेनानायकानाम् - मन्त्रिपुत्राणां च हननम्

पञ्च सेनाग्रगान् हत्वा सप्त मन्त्रिसुतानपि ।
शूरमक्षं च निष्पिष्य ग्रहणं समुपागमत् ।। ७५ ।।

पद्यपरिचयः;अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः; ' हनुमान् लङ्कायाम्, शत्रोः रावणस्य सैनिकबलमपि ज्ञातुं सङ्कल्पितः '
इत्येतदंशस्य निरूपणसन्दर्भे, अयं श्लोकः सुन्दरकाण्डकथाभागे वर्तते।

पदविभागः - पञ्च, सेनाग्रगान्, हत्वा, सप्त, मन्त्रिसुतान् ,अपि ।
शूरम्, अक्षम्, च,निष्पिष्य, ग्रहणम्, समुपागमत् ।।

अन्वयक्रमः - (सः हनुमान्) पञ्च सेनाग्रगान् सप्त मन्त्रिसुतान् च हत्वा शूरम् अक्षम् अपि निष्पिष्य ग्रहणं समुपागमत् ।

प्रतिपदार्थः -(सः= हनुमान्) पञ्च = पञ्च संख्याकान्; सेनाग्रगान् = सेनापतीन्; सप्त = सप्तसंख्याकान्; मन्त्रिसुतान् = मन्त्रिणां पुत्रान्; च = अपि; हत्वा = मारयित्वा; शूरम्= युद्धोत्साहिनम्; अक्षम् अपि = रावणात्मजम् अपि; निष्पिष्य = चूर्णीकृत्य; ग्रहणम् = ब्रह्मास्त्रेण बन्धनम् ; समुपागमत् = प्राप्तः।

श्लोकभावः - हनुमान् अमितबलपराक्रमसम्पन्नः।हनुमान् एकाकी एव पिङ्गलनेत्रादीन् उग्रान् पञ्च सेनापतीन् हन्ति जाम्बमाल्यादीन् सप्त सचिवसुतान् हन्ति। अक्षयकुमारं रावणतनयञ्च हन्ति। ब्राह्मणः प्रतिष्ठारक्षणाय मेघनादेन प्रयुक्तस्य ब्रह्मास्त्रस्य तु बन्धितः भवति।

विशेषांशः; अत्र च हनुमतः बल -पराक्रमौ स्पष्टं व्यक्तौ भवतः।

व्याकरणांशाः;सन्धिः; सेनाग्रगान् ; सेना + अग्रगान् (आ + अ = आ)सवर्णदीर्घसन्धिः।
उपागमत् ; उप + अगमत्(अ + अ =आ)सवर्णदीर्घसन्धिः।
समासः; अग्रगाः ; अग्रे गच्छन्ति इति अग्रगाः =उपपदतत्पुरुषसमासः।
सेनाग्रगान् ;सेनायाः अग्रगाः ,तान् = षष्ठीतत्पुरुषसमासः।
मन्त्रिसुतान् ; मन्त्रिणः सुताः मन्त्रिसुताः,तान् = षष्ठीतत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः**

१.हनुमान् कति हतवान् ? कान् हतवान् ?

## ६.२.५ ब्रह्मास्त्रेण ग्रहणम्

अस्त्रेणोन्मुक्तमात्मानं ज्ञात्वा पैतामहाद्वरात् ।
मर्षयन् राक्षसान् वीरः यन्त्रिणस्तान् यदृच्छया ।। ७६ ।।

पद्यपरिचयः;अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः; 'हनुमान् , लङ्कायाम् इन्दजिता ब्रह्मास्त्रेण गृहीतः भवति' इत्येतदंशस्य निरूपणसन्दर्भे, अयं श्लोकः सुन्दरकाण्डकथाभागे वर्तते।

पदविभागः; अस्त्रेण, उन्मुक्तम्, आत्मानम्, ज्ञात्वा, पैतामहात्, वरात् ।
मर्षयन्, राक्षसान्, वीरः, यन्त्रिणस्तान् यदृच्छया ।।

अन्वयक्रमः ; (बन्धनानन्तरं हनुमान्) पैतामहात् वरात् आत्मानम् अस्त्रेण उन्मुक्तं ज्ञात्वा,

यन्त्रिणः तान् राक्षसान् यदृच्छया मर्षयन् (रावणं प्राप्तवान्)

प्रतिपदार्थः; (बन्धनानन्तरम् = अस्त्रेण ग्रहणानन्तरम्;) वीरः = शूरः हनुमान्; पैतामहात् = ब्रह्मणः; वरात् = अनुग्रहात्; आत्मानम् = स्वम्; अस्त्रेण = ब्रह्मास्त्रेण;उन्मुक्तम् = विमुक्तम्; ज्ञात्वा = बुद्ध्वा; यन्त्रिणः = निबद्धान्; तान् = रावणसम्बन्धिनः; राक्षसान् = असुरान्; यदृच्छया = स्वच्छन्देन; मर्षयन् = सहन् (रावणसभां प्राप्तः)

श्लोकभावः -अञ्जनानन्दनः हनुमान् महाबलः।अयं राक्षसानां संहारकः। इन्द्रजितः ब्रह्मास्त्रेण तु बन्धितः भवति। वरप्रभावेण ब्रह्मास्त्रादपि आत्मानं क्षेमं विजानाति। रावणस्य सभां प्रविशतुम् इच्छति हनुमान् स्वच्छन्देन राक्षसानां दौष्ट्यं भरति(सहते)। बन्धित इव रावणसभां च प्राप्नोति। अत्र यद्यपि हनुमान् सीतान्वेषणायैव लङ्कां आगतः, तथापि तदनन्तरं श्रीरामस्य कार्यं सुलभं कर्तुं शत्रोः सैनिकसम्पत्तिविज्ञानाय अपि प्रयतितवान् इति हनुमतः कार्यकरणशीलता अत्र सूचिता भवति।

व्याकरणांशाः;सन्धिः ;अस्त्रेणोन्मुक्तम् ; अस्त्रेण + उन्मुक्तम् (अ + उ = ओ)गुणसन्धिः।

पैतामहाद् वरात् ; पैतामहात् + वरात् (त् + व = द्)जश्त्वसन्धिः।

यन्त्रिणस्तान् ; यन्त्रिणः + तान् (अः + त् =स् )विसर्गसन्धिः।

उन्मुक्तम् ; उद् + मुक्तम् (द् + म् = न् )अनुनासिकसन्धिः।

**स्वावलोकनप्रश्नाः**

१.हनुमान् किमर्थं ग्रहणं प्राप्तः ? केन ग्रहणं प्राप्तः ?

## ६.२.६ लङ्कायाः दहनम्

ततो दग्ध्वा पुरीं लङ्काम् ऋते सीतां च मैथिलीम् ।
रामाय प्रियमाख्यातुं पुनरायान्महाकपिः ।। ७७ ।।

पद्यपरिचयः;अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः ;'हनुमान् लङ्कां दग्धवान्'इत्येतदंशस्य निरूपणसन्दर्भे, अयं श्लोकः सुन्दरकाण्ड कथाभागे वर्तते।

पदविभागः- ततः, दग्ध्वा, पुरीम्, लङ्काम्, ऋते, सीताम्, च, मैथिलीम् ।
रामाय, प्रियम्, आख्यातुम्, पुनः, आयात्, महाकपिः ।।

अन्वयक्रमः - ततः महाकपिः मैथिलीं सीताम् ऋते लङ्कां पुरीं दग्ध्वा रामाय प्रियमाख्यातुं पुनःआयात् ।

प्रतिपदार्थः - ततः = तस्मात् स्थानात्; महाकपिः = हनुमान् ; मैथिलीम् =मिथिलाधिपस्य पुत्रीम् सीताम् = जानकीम्; ऋते = विना; (अपहाय) लङ्काम् = लङ्कानाम्नीम्; पुरीम् = नगरीम्, दग्ध्वा = दहनं कृत्वा; रामाय = श्रीरामाय; प्रियम् = सुखकरम्;(शुभवार्ताम्) आख्यातुम् = कथयितुम्; पुनः=भूयः; आयात् = प्रत्यागच्छत् ।

श्लोकभावः - इन्द्रजिता ब्रह्मास्त्रेण हनुमान् बन्धितः भवति। तद्व्याजेन रावणस्य सभां प्रविशति। रावणेन विवदते। रावणश्च हनुमतः लाङ्गूलं वह्निना योजितं कर्तुं आदिशति । हनूमतः लाङ्गूलं च वह्निना योजितं भवति । सीतानिवासस्थानं अशोकवनम्,विभीषणनिवासस्थानं च विहाय,सर्वां लङ्कां प्रदहति। अनन्तरं रामाय सीता दर्शनप्राप्तिरूपां शुभवार्तां निवेदयितुं प्रतिनिवृत्तः भवति।
विशेषांशः; वह्निना ,लङ्कायाः दहनम् , सीतायाः अस्पर्शनम्,एतदुभयं रावणस्य(असाधुतायाः) उपरि श्रीरामस्य (साधुतायाः) नैतिकः विजयः प्रकृत्या संसूचितः।
व्याकरणांशाः; सन्धिः; ततो दग्ध्वा; ततः + दग्ध्वा (अः + द् = ओ)विसर्गसन्धिः।
पुनरायात्;पुनः + आयात् (अः + आ = र् )विसर्गसन्धिः।
समासः; महाकविः;महान् च असौ कपिः = विशेषणपूर्वपदकर्मधारयसमासः।

**स्वावलोकनप्रश्नाः**

१. किमर्थं पुनः आयातः?

## ६.२.७ रामाय सीतादर्शनस्य निवेदनम्

सोऽभिगम्य महात्मानं कृत्वा रामं प्रदक्षिणम् ।
न्यवेदयदमेयात्मा दृष्टा सीतेति तत्त्वतः ।। ७८ ।।

पद्यपरिचयः;अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।
पद्यसन्दर्भः ; 'हनुमान् सीतासन्दर्शनवृत्तान्तं रामाय निवेदयति ' इत्येतदंशस्य निरूपणसन्दर्भे, अयं श्लोकः सुन्दरकाण्डकथाभागे वर्तते।
पदविभागः; - सः ,अभिगम्य, महात्मानम्, कृत्वा, रामं प्रदक्षिणम् ।
न्यवेदयत् ,अमेयात्मा ,दृष्टा, सीता , इति, तत्त्वतः ।।
अन्वयक्रमः; अमेयात्मा सः (महाकपिः) महात्मानम् रामम् अभिगम्य प्रदक्षिणं (च) कृत्वा सीता तत्वतः दृष्टा इति न्यवेदयत् ।
प्रतिपदार्थः; अमेयात्मा, अमेय = अपरिमित ; आत्मा = बुद्धिसम्पन्नः(विवेकसम्पन्नः); सः = हनुमान्; महात्मानम् = महासत्वसम्पन्नम् ; रामम् = श्रीरामम्; अभिगम्य = सम्मुखं गत्वा;प्रदक्षिणं कृत्वा = परिक्रम्य; सीता = जानकी; तत्त्वतः = वस्तुतः; दृष्टा = वीक्षिता, इति = अमुं विषयम्; न्यवेदयत् = अकथयत्।
श्लोकभावः; श्रीरामः सत्वसम्पन्नः, सहनशीली। न सुलभतया कोपं वहति। अत एव महात्मा भवति। हनुमान् अनन्तबुद्धिसम्पन्नः;कार्यकारणविवेचनपुरस्सरं कार्यकारी। हनुमान् लङ्कातः किष्किन्धां प्रति आगच्छति । रामं सम्मिलति। तम् नमस्करोति। वस्तुतः 'सीता दृष्टा'इति सीतादर्शनवृत्तान्तं श्रीरामाय निवेदयति।अत्र अमेयात्मा,इति पदं'यस्य यद्वक्तव्यम्,तत् तस्मै एव निवेदनीयम् इत्येवं रूपं

व्यावहारज्ञता ज्ञापकं भवति।

व्याकरणांशाः-सन्धयः ;न्यवेदयत् ; नि + अवदेयत् (इ+ अ = य्)यणादेशसन्धिः।

न्यवेदयदमेयात्मा; न्यवेदयत् + अमेयात्मा (त् + अ = द्)जश्त्वसन्धिः।

सीतेति; सीता + इति (आ + इ = ए )गुणसन्धिः।

समासः महात्मानम् ; महान् आत्मा यस्य सः महात्मा (बहुव्रीहिः) तम्

अमेयात्मा ; अमेयः आत्मा यस्य सः अमेयात्मा (बहुव्रीहिः)

**स्वावलोकनप्रश्नाः**

१.हनुमान् किं न्यवेदयत् ? कस्मै न्यवेदयत् ?

## ६.३ उपसंहारः

एवम् अत्र सुन्दरकाण्डकथाभागः प्रस्तुतः। अत्र च प्रधानतया सीतायाः अन्वेषणविषयः प्रचलति।अत्र च प्रस्ताविताः प्रमुखाः अंशाः-, हनुमतः समुद्रोल्लङ्घनम्, सीतायाः दर्शनम्, अभिज्ञानस्य प्रदानम्, सेनानायकानाम् , मन्त्रिपुत्राणां च हननम्, ब्रह्मास्त्रेण ग्रहणम्,लङ्कायाः दहनम्, रामाय सीतादर्शनस्य निवेदनम्,इत्येवंरूपाः सन्ति।

## ६.४ अभ्यासः

द्वौ श्लोकौ व्याख्यात ?

१.तत्र लङ्कां समासाद्य पुरीं रावणपालिताम् ।
ददर्श सीतां ध्यायन्तीम् अशोकवनिकां गताम् ।।

२.सोऽभिगम्य महात्मानं कृत्वा रामं प्रदक्षिणम् ।
न्यवेदयदमेयात्मा दृष्टा सीतेति तत्त्वतः ।।

# अंशः-VII; रावणस्य संहरणम् (७९-८९)

७.० परिचयः
७.१ लक्ष्याणि
७.२ रावणस्य संहरणम्
७.२.१ समुद्रस्य क्षोभणम्
७.२.२ नलस्य सेतुबन्धनम्
७.२.३ रावणस्य संहरणम् -रामस्य व्रीडोपगमनञ्च
७..२.४ रामस्य परुषवचनम् - सीतायाः अग्निप्रवेशनम्
७.२.५ सीतायाः स्वीकरणम् - देवतानां अभिनन्दनम्
७.२.६ लङ्काराज्ये विभीषणस्य प्रतिष्ठापनम्
७.२.७ श्रीरामस्य अयोध्याप्रस्थानम्
७.२.८ भरतस्य सकाशं हनूमतः विसर्जनम्
७.२.९ नन्दिग्रामं प्रति श्रीरामस्य प्रयाणम्
७.२.१० भरतात् राज्यस्वीकरणम्
७.३ उपसंहारः
७.४ अभ्यासः

## ७.० परिचयः

अयं च पाठ्यांशः एकोनसप्ततितमश्लोकतः एकोननवतितमश्लोकपर्यन्तं परिमितः वर्तते। युद्धकाण्डविषयाः अत्र बोध्यन्ते। युद्धकाण्डकथायाः विषयसूची भवति। अत्र च युद्धकाण्डकथा संक्षेपेण लभ्यते। प्रकृते - रामसुग्रीवादयः सीतायाः समाचारं जानन्ति। समुद्रतीरम् आगच्छन्ति। मार्गाय समुद्रं क्षोभयन्ति। समुद्रवचनात् नलः सेतोः बन्धनं करोति। रामः रावणं हन्ति। सीतामुपेत्य लज्जितो भवति। सीतां परुषं भाषते। असहमाना सीता अग्नौ प्रविशति। अग्निवचनात् सीतां विगतकल्मषां जानाति। सीतां स्वीकरोति। देवगणाः ऋषिगणाश्च श्रीरामं अभिनन्दन्ति। लङ्काराज्ये विभीषणं प्रतिष्ठापयति। सपरिवारः नन्दिग्रामं गच्छति। भरतात् राज्यभारं स्वीकरोति च।

## ७.१ लक्ष्याणि

मानवः सङ्कल्पपूर्वकं प्रयत्नेन महनीयतां साधयेत्। महनीयतायाः साधने मानवस्य मनसः प्रमुखं स्थानम् अस्ति। मानवस्य मनः सहजतया मलिनं कुलुषितं च भवति। कलुषितं च मनः रागद्वेषादिकं जनयति। कामम् - क्रोधम् - दुरभिमानम् च वर्धयति। काम-क्रोधादयश्च अन्तश्शत्रवः। एते च अन्तरङ्गे एव स्थित्वा आत्मनः नाशं अभिलषन्ति। अत एव काम- क्रोध-लोभान् नरकद्वारं कथयन्ति —

त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः।

कामः क्रोधः तथा लोभः तस्मात् एतत् त्रयं त्यजेत्।। इति गीतापि कामक्रोधादीनां दूरतः जीवनं बोधयति। अपि च "न परदारान् गच्छेत्" इति वेदवचनम्, "अनिर्वर्णनीयम् परकलत्रम्", मातृवत् परदारेषु ... स पण्डितः (विचक्षणः) इति लौकिकवचनान्यपि परस्त्रीषु पुरुषैः सम्यक् दृष्टिभिर्भाव्यम्। परस्त्रीषु पुरुषाणां पूज्यभावना आवश्यकी इति बोधयन्ति। एतत् विपरीतप्रवर्तनम् पुरुषस्य अप्रतिष्ठाकरम् अपयशः सम्पादकञ्च भवति। आत्मविनाशाय च कल्पते। एतत् अर्थस्फोरकश्च अयं पाठ्यांशः। एतत् पाठ्यांशाध्ययनेन —

अ) रावणस्य कामाभिभूतप्रवर्तनम् अवगन्तुं प्रभवति।

इ) परदाराभिगमनेच्छायाः पर्यवसानानि पठितुं प्रभवति।

उ) रावणस्य दुराग्रहपूर्णप्रवर्तनं लिखितुं समर्थो भवति।

ऋ) रावणस्य दुरभिमानप्रवर्तनं वक्तुं पारयति।

ए) रावणस्य क्रोधातिरेकप्रवर्तनम् प्रति च परिचयः सम्पादितो भवति।

ओ) अन्ततः काम-क्रोध-दुराग्रह-दुरभिमानानां फलं मरणम् इति च भाषितुं च समर्थो भवति।

## ७.२ रावणस्य संहरणम्

### ७.२.१ समुद्रस्य क्षोभणम्

ततः सुग्रीवसहितो गत्वा तीरं महोदधेः ।  
समुद्रं क्षोभयामास शरैरादित्यसन्निभैः ।। ७९ ।।

पद्यपरिचयः;अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः; रसीतायाः अपहारिणं रावणं हन्तुं सुग्रीवेण सह श्रीरामः समुद्रतीरं प्राप्नोति इति अमुम् अंशं निरूपयन् अयं श्लोकः रावणसंहारात्मके युद्धकाण्डकथाभागे वर्तते।

पदविभागः; ततः, सुग्रीवसहितः, गत्वा, तीरम्, महोदधेः ।  
समुद्रम्, क्षोभयामास, शरैः, आदित्यसन्निभैः ।।

अन्वयक्रमः ; ततः (रामः) सुग्रीवासहितः (सन्) महोदधेः तीरं गत्वा, आदित्यसन्निभैः शरैः समुद्रं क्षोभयामास ।

प्रतिपदार्थः; ततः = सीतायाः समाचारज्ञानानन्तरम्;(रामः =श्रीरामः) सुग्रीवसहितः,सुग्रीव = सुग्रीवेण; सहितः =युक्तः ; महोदधेः = शतयोजनविस्तृतस्य समुद्रस्य; तीरम् =तटम्; गत्वा = प्राप्य; आदित्यसन्निभैः, आदित्य = सूर्येण; सन्निभैः = समानैः;(तीक्ष्णैः) शरैः = बाणैः, समुद्रम् = सागरम्, क्षोभयामास = सेतुबन्धनाय कल्लोलितवान्।

श्लोकभावः; श्रीरामः हनुमद्द्वारा सीतासमाचारं जानाति । अनुपदमेव सुग्रीवेण रावणस्य वधं प्रति चर्चां निर्वहति । सुग्रीवश्च वानरासेनां सन्नद्धीकरोति। एवं श्रीरामः सुग्रीवसहितः सन् सागरतीरम् ससैन्यम् उपस्थितः भवति। सेतुबन्धनाय च उद्यमितः भवति। चिराय अपि समुद्रः न सहकुरुते। तेन क्रुद्धः श्रीरामः तीक्ष्णैः बाणैः तम् आपातालम् आकुलीकरोति।

सन्धिः; सहितोगत्वा;सहितः + गत्वा (अः+ ग् = ओ)विसर्गसन्धिः।

शरैरादित्य; शरैः + आदित्य (ऐः + आ = र्)विसर्गसन्धिः.।

समासः; सुग्रीवसहितः; सुग्रीवेण सहितः = तृतीयातत्पुरुषः।

महोदधेः;महान् च असौ उदधिः महोदधिः,तस्य= विशेषणपूर्वपदकर्मधारयसमासः.।

आदित्यसन्निभैः;आदित्येन सन्निभः आदित्यसन्निभः,तैः= तृतीयातत्पुरुषः।

**स्वावलोकनप्रश्नाः**

१.'शरैः आदित्यसन्निभैः' अत्र 'आदित्यसन्निभैः'इत्यस्य अर्थः कः?

## ७.२.२ नलस्य सेतुबन्धनम्

दर्शयामास चात्मानं समुद्रः सरितां पतिः ।
समुद्रवचनाच्चैव नलं सेतुमकारयत् ।। ८० ।।

पद्यपरिचयः;अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः; श्रीरामस्य कोपम् असहमानः सन् समुद्रः प्रत्यक्षः भवति। नलेन सेतुं च निर्मापयति् इत्यंशं निरूपयन् अयं श्लोकः रावणसंहारात्मके युद्धकाण्डकथाभागे वर्तते।

पदविभागः ; दर्शयामास, च, आत्मानम्, समुद्रः, सरिताम्, पतिः ।
समुद्रवचनात् ,च, एव, नलम्, सेतुम्, अकारयत् ।।

अन्वयक्रमः ;सरिताम् पतिः समुद्रः आत्मानं दर्शयामास (रामः) समुद्रवचनात् एव च नलंसेतुम् अकारयत् ।

प्रतिपदार्थः ;सरिताम् = नदीनाम्;पतिः = भर्ता;समुद्रः = सागरः;आत्मानम् = स्वम्;दर्शयामास = प्रादर्शयत् ;च = अपि च, समुद्रवचनात्,समुद्र = उदधेः; वचनात् = कथनात्; एव= केवलम् ; नलम् = नलनामकं कपिश्रेष्ठम्; सेतुम् = बन्धनम्; अकारयत् = कारितवान्।

श्लोकभावः;नदीनां सागरो गतिः। नद्यः सदा समुद्रस्य अभिमुखं गच्छन्ति।अतः समुद्रः सरितां पतिः जातः। सः श्रीरामस्य कोपेन भीतः।एकेनैवतीक्ष्णेन श्रीरामस्य बाणेन व्यथितः।अनुपदमेव सः शरीरं धृतः। विनयेन आत्मानं रामाय दर्शितः। सेतुबन्धनाय सहकारं प्रतिज्ञातः। समुद्रस्य सहकारवचनेन वानरसैन्यं तुष्टं जातम्। नलश्च कपिश्रेष्ठः । महान् आरचकः ( Engineer) श्रीरामस्य समक्षे नलः सेतुं च निर्मितवान्।

सन्धिः; चात्मानम् ; च + आत्मानम् (अ + आ=आ)सवर्णदीर्घसन्धिः।
वचनाच्च ; वचनात् + च (त् + च् =च्)श्चुत्वसन्धिः।
चैव ; च + एव (अ + ए =ऐ)वृद्धिसन्धिः।
समासः ;समुद्रवचनात्; समुद्रस्य वचनं ,तस्मात् = षष्ठीतत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः**

१. कः सेतुं चकार ?

२. सरितां पतिः कः ?

## ७.२.३ रावणस्य संहरणम् -रामस्य व्रीडोपगमनञ्च

तेन गत्वा पुरीं लङ्कां हत्वा रावणमाहवे ।
रामः सीतामनुप्राप्य परां व्रीडामुपागमत् ।। ८१ ।।

पद्यपरिचयः;अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः; श्रीरामः लङ्कां प्राप्नोति ,रावणं च हन्ति , अवमानभारेण सीतायाः पुरतः उपस्थितः भवति इत्यंशं निरूपयन् अयं श्लोकः रावणसंहारात्मके युद्धकाण्डकथाभागे वर्तते।

पदविभागः; - तेन गत्वा पुरीम् लङ्काम्, हत्वा रावणम् आहवे ।
रामः सीताम् अनुप्राप्य, पराम् व्रीडाम् उपागमत् ।।

अन्वयक्रमः; - रामः तेन (सेतुना) लङ्कां पुरीं गत्वा आहवे रावणं हत्वा सीताम् अनुप्राप्य परां व्रीडाम् उपागमत् ।

प्रतिपदार्थः; - रामः = राघवः ; तेन = तेन (सेतुना) ;लङ्कां पुरीम् = लङ्काभिधां नगरीम् ; गत्वा = प्राप्य ; आहवे = युद्धे ;रावणम् = दशाननम् ; हत्वा = मारयित्वा ; सीताम् = जानकीम् ; अनुप्राप्य = लब्ध्वा ; पराम् = महतीम् ; व्रीडाम् = लज्जाम् ; उपागमत् = अधिगतवान्

श्लोकभावः;- श्रीरामः समुद्रस्य अनुमतिं प्राप्नोति।नलेन सेतुं कारयति।श्रीरामः ससैन्यं तेन सेतुना लङ्काम् गच्छति। रावणसैन्यं मथ्नाति।युद्धे सामात्यपुत्रबान्धवं रावणं हन्ति। परसदनं प्राप्तां सीतां पश्यति। दशाननस्य भवने स्थितायाः सीतायाः स्वीकारे लोकापवादभीत्या लज्जावशः= अवमानभरितः भवति इति भावः ।

**स्वावलोकनप्रश्नाः**

१ 'तेन गत्वा पुरीं लङ्काम्' अत्र 'तेन' पदस्य अर्थः कः ?

## ६.२.४ रामस्य परुषवचनम् - सीतायाः अग्निप्रवेशनम्

तामुवाच ततो रामः परुषं जनसंसदि ।
अमृष्यमाणा सा सीता विवेश ज्वलनं सती ।। ८२ ।।

पद्यपरिचयः;अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः; मनस्तापकं श्रीरामस्य वचः निशम्य, आत्मनः पवित्रता निरूपणाय सीता अग्निं प्रविष्टा इत्यंशं ज्ञापयन् अयं श्लोकः रावणसंहारात्मके युद्धकाण्डकथाभागे वर्तते।

पदविभागः; ताम् ,उवाच ,ततः, रामः, परुषम् ,जनसंसदि ।
अमृष्यमाणा, सा, सीता, विवेश ,ज्वलनम् ,सती ।।

अन्वयक्रमः; ततः रामः जनसंसदि तां परुषम् उवाच। (तत्) अमृष्यमाणा सा सती सीता ज्वलनं विवेश ।

प्रतिपदार्थः ;ततः = रावणस्य संहरणानन्तरम् ; रामः= श्रीरामः ; जनसंसदि,जन = प्रजानाम् ; संसदि= (परिषदि)समक्षे; ताम् = सीताम्; परुषम् = अप्रियम् ; उवाच = अवदत्; अमृष्यमाणा = असहमाना ;सा = पूर्वोक्ता ; सती = साध्वी ; सीता = जानकी ; ज्वलनम् = अग्निम्; विवेश = प्राविशत् ।

श्लोकभावः; श्रीरामः आदर्शभर्ता भवति ।भर्तुः धर्मम् अनुतिष्ठति। रावणं च हन्ति। सर्वसमक्षं सीतां परुषं भाषते।आत्मनः पवित्रतां प्रकटयितुं च पृच्छति। सीता च महासाध्वी। रामादन्यं न चिन्तयति । सीता श्रीरामस्य निष्ठुरवचनं शृणोति।परम् असहमाना भवति ।आत्मनः पवित्रातां प्रकटयितुं संसिद्धा भवति। अग्निं प्रविशतुम् इच्छति । अग्निं प्रविशति च। एवं सीता आत्मनः पवित्रतां पातिव्रत्यं च निरूपयति।

सन्धिः; - ततो रामः; ततः + रामः (अः+ र् =ओ)विसर्गसन्धिः।

समासः;-जनसंसदि; - जनानां संसद् जनसंसद्,तस्याम् = षष्ठीतत्पुरुषः।
अमृष्यमाणा; - न मृष्यमाणा= नञ्तत्पुरुषः।

कोशः;-ततः; - यत् तद् यतः ततः हेतौ (अमरकोशः)

**स्वावलोकनप्रश्नाः**

१. श्रीरामः सीतां परुषं किमर्थम् उवाच ?
२. सीता अमृष्यमाणा किमर्थम् जाता?

### ७.२.५ सीतायाः स्वीकरणम् - देवतानां अभिनन्दनम्

ततोऽग्निवचनात्सीतां ज्ञात्वा विगतकल्मषाम् ।
कर्मणा तेन महता, त्रैलोक्यं सचराचरम् ।
सदेवर्षिगणं तुष्टं, राघवस्य महात्मनः ।।८३ ।।

पद्यपरिचयः;अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः ;श्रीरामः अग्निपरीक्षितां सीतां स्वीकरोति, ऋषिसङ्घाश्च श्रीरामम् अभिनन्दन्ति,

इत्यंशं ज्ञापयन् अयं श्लोकः रावणसंहारात्मके युद्धकाण्डकथाभागे वर्तते।

पदविभागः; - ततः अग्निवचनात् सीताम्, ज्ञात्वा विगतकल्मषाम् ।
कर्मणा ,तेन, महता, त्रैलोक्यम् , सचराचरम् ।।
सदेवर्षिगणम् ,तुष्टम्, राघवस्य, महात्मनः ।

अन्वयक्रमः; - ततः अग्निवचनात् सीतां विगतकल्मषां ज्ञात्वा (तया सह) महात्मनः राघवस्य तेन महता कर्मणा सचराचरं त्रैलोक्यं तुष्टम् ।

प्रतिपदार्थः; - ततः = तदनन्तरम् ; अग्निवचनात्, अग्नि= अग्निदेवस्य वचनात् = प्रशस्तवचसः कारणात्; सीताम् = जानकीम् ; विगतकल्मषाम् = दोषरहिताम्; ज्ञात्वा = बुद्ध्वा; ताम् अङ्गीचकार= (तां स्वीकृतवान्); महात्मनः = महापुरुषस्य; राघवस्य =श्रीरामस्य; तेन = पूर्वोक्तेन; महता = आदर्शप्रायेण; कर्मणा = कार्येण; सचराचरम् =स्थावरजङ्गमम्; त्रैलोक्यम् = त्रिभुवनम् ,(त्रयो लोकाः) तुष्टम् = प्रसन्नम् जातम् ।

श्लोकभावः -सीता च महासाध्वी। श्रीरामस्य निष्ठुरवचनं शृणोति। परम् उद्विग्ना भवति ।आत्मनः पवित्रतां प्रकटयितुं उद्युक्ता भवति। अग्निं च प्रविशति।अग्निदेवः स्वयं पवित्रः। सर्वभक्षकश्च। अग्निशिखाः सीतां किमपि कर्तुं न पारयन्ति। अग्निः स्वयं पावनीं सीतां हस्ताभ्यम् आददाति।शिखाभ्यः बहिः आगच्छति। श्रीरामं प्रति 'हे राघव !इमां विशुद्धां जानीहि । निष्पापाम् इमां सीतां गृह्णातु' इति वदति। सीतायाः अग्नौ परीक्षणं पवित्रम् आदर्शभूतं च कर्म भवति। सीतारामौ उभौ अपि तदनुष्ठीय लोकस्य आदर्शदम्पती भवतः। आदर्शदम्पत्योः सीतारामयोः अनेन महत्कर्मणा चराचरजगत्सर्वं सन्तुष्टम्। सकलाश्च ऋषिगणाः देवगणाश्च तुष्टाः।सीतां श्रीरामं च अभिनन्दितवन्तः।

विशेषांशः; अत्र च सीतायाः पातिव्रत्यम् स्पष्टं निरूपितम्।

सन्धिः; ततोऽग्निवचनात्; ततः + अग्निवचनात् (अः+ अ=ओ)विसर्गसन्धिः।
देवर्षिः; देव + ऋषिः (अ + ऋ =अर्)गुणसन्धिः।

समासः; अग्निवचनात्; - अग्नेः वचनम् अग्निवचनम्,तस्मात् = षष्ठीतत्पुरुषसमासः।
विगतकल्मषाम् ;- विगतम् कल्मषम् यस्याः सा विगतकल्मषा, ताम् = बहुव्रीहिसमासः।
महात्मनः; - महान् आत्मा यस्य सः महात्मा,तस्य = बहुव्रीहिसमासः।
सर्वदैवतैः; - सर्वाणि च दैवतानि सर्वदैवतानि, तैः = विषेषणपूर्वपदकर्मधारयसमासः।

**स्वावलोकनप्रश्नाः**

१. 'महता तेन कर्मणा' अत्र 'तत् कर्म' किम् ?

२. कस्मात् सीताम्, विगतकल्मषां ज्ञाताः ?

## ७.२.६ लङ्काराज्ये विभीषस्य प्रतिष्ठापनम्

बभौ रामः सम्प्रहृष्टः पूजितः सर्वदैवतैः ।। ८४ ।।
अभिषिच्य च लङ्कायां राक्षसेन्द्रं विभीषणम् ।
कृतकृत्यस्तदा रामो विज्वरः प्रमुमोद ह ।। ८५ ।

पद्यपरिचयः;अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः;श्रीरामः लङ्कायां विभीषणं अभिषेचति इत्यशं ज्ञापयन् अयं श्लोकः रावणसंहारात्मके युद्धकाण्डकथाभागे वर्तते।

पदविभागः; - बभौ ,रामः, सम्प्रहृष्टः, पूजितः, सर्वदैवतैः ।।
अभिषिच्य, च, लङ्कायाम्, राक्षसेन्द्रम्, विभीषणम् ,।
कृतकृत्यः, तदा, रामः, विज्वरः, प्रमुमोद, ह, ।।

अन्वयक्रमः; - रामः सर्वदेवतैः पूजितः सम्प्रहृष्टः बभौ ।तदा,राक्षसेन्द्रं विभीषणं लङ्कायाम् अभिषिच्य ,कृतकृत्यः विज्वरः च रामः प्रमुमोद ह ।

प्रतिपदार्थः; - सर्वदेवतैः, सर्व = समस्तैः; देवतैः=सुरैः; पूजितः = प्रशंसितः; रामः = श्रीराघवः; सम्प्रहृष्टः = आनन्दभरितः सन् बभौ = अप्राकाशत;तदा = तस्मिन् आनन्दसमये ; राक्षसेन्द्रम् = राक्षसराजम्, विभीषणम् = विभीषणाख्यं रावणानुजम्;लङ्कायाम् = लङ्काभिधायां नगर्याम् ; अभिषिच्य = प्रतिष्ठाप्य ; कृतकृत्यः = कृतार्थः; (जातः। ततश्च) विज्वरः = वाग्दान पालनेन विगतबाधस्सन्; रामः = श्रीरामः; प्रमुमोद= प्रकामं हर्षम् आप।

श्लोकभावः; सीतायाः अग्निप्रवेशाय, सीतायाः विगतकल्मषताज्ञापनाय, अग्निवचनात् सीतायाः स्वीकरणाय च सकलाः देवताः श्रीरामम् अभिनन्दन्ति। श्रीरामश्च सीतां प्राप्नोति। परमानन्दभरितः भवति। तस्मिन् एव आनन्दसमये श्रीरामः लङ्काराज्ये रावणस्य अनुजम् विभीषणम् अभिषेचति। श्रीरामः विभीषणस्य अभिषेचनाय, प्रतिज्ञापालनाय च आत्मानं चरितार्थं भावयति। विगतज्वरश्च (TENSION FREE MINDED )भवति। श्रीरामः सन्तुष्टान्तरङ्गश्च भवति।

विशेषांशः; श्रीरामस्य सत्यसन्धता अत्र निरूपिता भवति।

सन्धिः;राक्षसेन्द्रम्; राक्षस + इन्द्रम् (अ+ इ=ए)गुणसन्धिः।

समासः; राक्षसेन्द्रम्; राक्षसानाम् इन्द्रः राक्षसेन्द्रः. तम् = षष्ठीतत्पुरुषसमासः।
विज्वरः; विगतः ज्वरः यस्य सः = बहुव्रीहिसमासः।
कृतकृत्यः; कृतं कृत्यं येन सः = बहुव्रीहिसमासः।

**स्वावलोकनप्रश्नाः**

१.श्रीरामः कुतः विज्वरः जातः ?कार्यद्वयं चिन्तयतु ?

## ७.२.७ श्रीरामस्य अयोध्याप्रस्थानम्

देवताभ्यो वरं प्राप्य समुत्थाप्य च वानरान् ।
अयोध्यां प्रस्थितो रामः पुष्पकेण सुहृद्-वृतः ।। ८६ ।।

पद्यपरिचयः;अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे

प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः श्रीरामः लङ्कायां विभीषणं अभिषिच्य, अयोध्यां प्रस्थितः इत्यशं ज्ञापयन् अयं श्लोकः रावणसंहारात्मके युद्धकाण्डकथाभागे वर्तते।

पदविभागः; देवताभ्यः, वरम् ,प्राप्य, समुत्थाप्य, च, वानरान्, ।

अयोध्याम् , प्रस्थितः, रामः, पुष्पकेण, सुहृद्वृत्तः ।।

अन्वयक्रमः; रामः देवताभ्यः वरं प्राप्य वानरान् समुत्थाप्य सुहृद्धतः च पुष्पकेण अयोध्यां प्रस्थितः।

प्रतिपदार्थः; रामः = श्रीरामः; देवताभ्यः = सुरेभ्यः; वरम् = आशीर्वादम्; प्राप्य = लब्ध्वा; वानरान् = कपीन्; समुत्थाप्य = सम्यक् प्रबोध्य (सजीवान् कृत्वा) ; च = अपि च;सुहृद्वृतः,सुहृद् = मित्रैः;वृतः= आवृतः;पुष्पकेण = पुष्पकनामकेन विमानेन; अयोध्याम् = अयोध्यापुरीम्; प्रस्थितः गमनायउपचक्रमे ;

श्लोकभावः; श्रीरामः कण्टकिनं रावणं हन्ति,लोककल्याणं च आचरति देवगणास्सर्वे श्रीरामं अभिनन्दन्ति,पूजयन्ति च। देवाश्च शिष्टरक्षकाय श्रीरामाय वराञ्च प्रयच्छन्ति। श्रीरामः तैः वरैः युद्धे निहतान् वानरान् सजीवान् करोति। अनन्तरं च सुग्रीव-अङ्गद जाम्बवत्-विभीषणादीन् अयोध्याम् आह्वयति। ते च सम्मताः। पूर्वं कुबेरं विजित्य रवणेन प्राप्तं पुष्पकं विमानं किञ्चित् अस्ति।सुहृद्भिः परिवृतः सन् श्रीरामः तेन विमानेन अयोध्यां प्रस्थितः भवति।

सन्धिः; देवताभ्यो वरम्; देवताभ्यः + वरम्(अः+ व् =ओ) विसर्गसन्धिः।

प्रस्थितो रामः;प्रस्थितः + रामः(अः+ र् =ओ)विसर्गसन्धिः।

समासः; सुहृद्वृतः; सुहृद्भिः वृतः सुहृद्वृतः = तृतीयातत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः**

१.'अयोध्यां प्रस्थितो रामः पुष्पकेण सुहृद्-वृतः' अत्र 'सुहृदः' के ?

## ७.२.८ भरतस्य सकाशं हनूमतः विसर्जनम्

भरद्वाजाश्रमं गत्वा रामः सत्यपराक्रमः ।
भरतस्यान्तिके रामो हनूमन्तं व्यसर्जयत् ।। ८७ ।।

पद्यपरिचयः;अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः; ' अयोध्यां प्रस्थितः श्रीरामः मध्ये भरद्वाजाश्रमं सम्पश्यति (Visit करोति)' इत्यंशं ज्ञापयन् अयं श्लोकः रावणसंहारात्मके युद्धकाण्डकथाभागे वर्तते।

पदविभागः; भरद्वाजाश्रमम्, गत्वा, आरामः, सत्यपराक्रमः ।

भरतस्य, अन्तिके, रामः, हनूमन्तम्, व्यसर्जयत् ।।

अन्वयक्रमः; आरामः सत्यपराक्रमः रामः भरद्वाजाश्रमं गत्वा भरतस्य अन्तिके हनूमन्तम् व्यसर्जयत् ।

प्रतिपदार्थः; आरामः = आनन्दनिलयः; सत्यपराक्रमः = सत्यशूरः, पराक्रमशाली च; रामः = श्रीराघवः; भरद्वाजाश्रमम्, भरद्वाज = ऋषेः भरद्वाजस्य; आश्रमम्= तपोवनम्; गत्वा = प्राप्य; भरतस्य = कैकेयीपुत्रस्य; अन्तिके = समीपम्; हनूमन्तम् = आञ्जनेयम्; व्यसर्जयत् = प्रेषितवान्

श्लोकभावः; श्रीरामः रावणं हन्ति, सीतां प्राप्नोति, आनन्दभरितः च भवति । सुग्रीवाय,विभाषणाय च प्रतिज्ञातं साधयति । सत्यविक्रमश्च भवति । श्रीरामः सुग्रीव-अङ्गद -जाम्बवत्-विभीषणादिभिः सह अयोध्यां प्रस्थितः भवति। पूज्यपूजाव्यतिक्रमणं मास्तु इति ,मध्ये मार्गं भरद्वाजस्य महर्षेः आश्रमं अवतरति।अत्रान्तरे भरतः नन्दिग्रामे अनागमनं विशङ्क्य प्राणत्यगाय सिद्धो भवतीति विचिन्त्य, स्वप्रत्यागमनस्य निवेदनाय वेगवन्तं हनुमन्तं भरतस्य सकाशं प्रेषयति च।

सन्धिः; भरतस्यान्तिके ; भरतस्य + अन्तिके(अ + अ = आ )सवर्णदीर्घसन्धिः।

रामो हनुमन्तम् ; रामः + हनुमन्तम् (अः + ह् = ओ)विसर्गसन्धिः।

भरद्वाजाश्रमम् ; भरद्वाज + आश्रमम्(अ + आ =आ ) सवर्णदीर्घसन्धिः।

समासः;भरद्वाजाश्रमम् ; भरद्वाजस्य आश्रमः भरद्वाजाश्रमः , तम् = षष्ठीतत्पुरुषसमासः।

सत्यपराक्रमः ; सत्यः पराक्रमः यस्य सः सत्यपराक्रमः = बहुव्रीहिसमासः।

**स्वावलोकनप्रश्नाः**

१. 'भरतस्य अन्तिके रामो हनूमन्तं व्यसर्जयत्' -किमर्थम् ?

## ७.२.९ नन्दिग्रामं प्रति श्रीरामस्य प्रयाणम्

पुनराख्यायिकां जल्पन् सुग्रीवसहितस्तदा।
पुष्पकं तत्समारुह्य नन्दिग्रामं ययौ तदा ।। ८८ ।।

पद्यपरिचयः;अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः; ' भरद्वाजाश्रमतः अपि श्रीरामः अयोध्यां प्रस्थितः ' इत्यंशं ज्ञापयन् अयं श्लोकः रावणसंहारात्मके युद्धकाण्डकथाभागे वर्तते।

पदविभागः; - पुनः, आख्यायिकाम् ,जल्पन्, सुग्रीवसहितः, तथा।
पुष्पकम् ,तत्, समारुह्य, नन्दिग्रामम् ,ययौ, तदा ।।

अन्वयक्रमः; - तदा सुग्रीवसहितः (रामः) तत् पुष्पकं पुनः समारुह्य आख्यायिकाम् जल्पन् तदा नन्दिग्रामं ययौ ।

प्रतिपदार्थः; - तदा = भरद्वाजाश्रमे महर्षेः योगक्षेमविचारणानन्तरं तस्मिन् समये, सुग्रीवसहितः,सुग्रीव=वानरराजेन सुग्रीवेण, सहितः =युक्तः,(रामः=श्रीरामः) तत् =पूर्वारूढमेव; पुष्पकम्=

पुष्पकविमानम्, पुनः = भूयः, समारुह्य = अधिरुह्य, आख्यायिकाम् =रावणयुद्धविषयान् , जल्पन् = कथयन्, तदा = निर्दिष्टे तस्मिन् एव दिने, नन्दिग्रामम् = भरतस्य राज्यपालनक्षेत्रम् ;ययौ = प्राप्तवान् ।

श्लोकभावः; श्रीरामः आश्रमे भरद्वाजस्य महर्षेः दर्शनम् आचरति।योगक्षेमादिकम् पृच्छति । भरद्वाजाय स्वीयवृत्तान्तं निवेदयति । आशीश्च गृह्णाति। समयाभावकारणतः भवति । अनुपदम् एव पुनः श्रीरामः सुग्रीव-विभीषणादिभिः परिवृतः सन्, पूर्वारूढमेव पुष्पकं समारोहति । तत्र ते सर्वे परस्परं युद्धविषयान् सल्लपन्ति। एवं श्रीरामः हनुमतः गमनानन्तरमेव,भरतस्य प्रतिज्ञातं पालयन् , तात्कालिकं भरतस्य निवासस्थानं नन्दिग्रामं प्राप्नोति ।

सन्धिः; पुनराख्यायिकाम्; पुनः + आख्यायिकाम् (अः+ आ = र्)विसर्गसन्धिः।

सहितस्तदा; सहितः + तदा (तः + त् =स्)विसर्गसन्धिः।

समासः ;सुग्रीवसहितः; सुग्रीवेण सहितः= तृतीयातत्पुरुषः।

कोशः; आख्यायिका; आख्यायिकोपलब्धार्था (अमरकोशः)

**स्वावलोकनप्रश्नाः**

१ 'सुग्रीवसहितः तदा' - कदा ?

## ७.२.१० भरतात् राज्यस्वीकरणम्

नन्दिग्रामे जटां हित्वा भ्रातृभिः सहितोऽनघः ।
रामः सीतामनुप्राप्य राज्यं पुनरवाप्तवान् ।। ८९ ।।

पद्यपरिचयः;अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः; ' भरतस्य पालनक्षेत्रं नन्दिग्रामं प्राप्नोति, श्रीरामः पुनः राज्यभारं स्वीकरोति ' इत्यंशं ज्ञापयन् अयं श्लोकः रावणसंहारात्मके युद्धकाण्डकथाभागे वर्तते।

पदविभागः; नन्दिग्रामे, जटाम्, हित्वा, भ्रातृभिः, सहितः, अनघः ।
रामः, सीताम्, अनुप्राप्य, राज्यम्, पुनः, अवाप्तवान् ।।

अन्वयक्रमः; अनघः रामः भ्रातृभिः सहितः नन्दिग्रामे जटां हित्वा सीताम् अनुप्राप्य राज्यं पुनः अवाप्तवान् ।

प्रतिपदार्थः; अनघः = परिशुद्धस्वभावः; रामः = श्रीरामः; भ्रातृभिः = अनुजैः; सहितः = युक्तः; नन्दिग्रामे = भरतस्य राज्यपालनक्षेत्रे; जटाम् = सटाम्;हित्वा = त्यक्त्वा; सीताम् = जानकीम्;अनुप्राप्य = वामे संस्थाप्य; राज्यम् =पादुकाक्रान्तं साम्राज्यम्; पुनः = भूयः; अवाप्तवान् = स्वीकृतवान्;

श्लोकभावः; - पितुः आज्ञां पालितवान् । अरण्यं गतवान्। तत्र ऋषीणाम् अभ्यर्थनया दुष्टशिक्षणं कृतवान्।एवं स्वधर्मानुष्ठनेन, प्रतिज्ञातस्य पालनेन च श्रीरामः परिशुद्धस्वभावः सम्पन्नः।श्रीरामः

नन्दिग्रामं प्राप्तः।जटाः विसृष्टः।सुवस्त्रादिभिरलङ्कृतः। वामभागे सीतां अनुप्राप्तः। भरतलक्ष्मणशत्रुघ्नैः परिवृतः । एवम् आप्तानां, पुरोहितानां, मन्त्रीणां मित्राणां च समक्षे जीवनदीनां जलसेचनपुरस्सरं वेदमन्त्रोच्चारणमध्ये श्रीरामः भरतात् राज्यभारं स्वीकरोति।

सन्धिः; सहितोऽनघः;सहितः + अनघः (अः + अ = ओऽ)विसर्गसन्धिः।

पुनरवाप्तवान्; - पुनः + अवाप्तवान् (अः + अ = र्) विसर्गसन्धिः।

समासः; अनघः; न अघं यस्य सः= बहुव्रीहिसमासः।

**स्वावलोकनप्रश्नाः**

१ ' भ्रातृभिः सहितः अनघः ' अत्र भ्रातरः के ?

२. 'भ्रातृभिः सहितः अनघः ' अत्र अनघः कः ?

## ७.३ उपसंहारः

एवम् अत्र युद्धकाण्डगताः अंशाः प्रस्तुताः। अत्र -समुद्रस्य क्षोभणम्,नलस्य सेतुबन्धनम्,रावणस्य संहरणम् -रामस्य व्रीडोपगमनञ्च,रामस्य परुषवचनम् - सीतायाः अग्निप्रवेशनम् ,सीतायाः स्वीकरणम्, सीतारामयोः देवतानां अभिनन्दनम्, लङ्काराज्ये विभीषणस्य प्रतिष्ठापनम्,श्रीरामस्य अयोध्याप्रस्थानम्, भरतस्य सकाशं हनूमतः विसर्जनम्,श्रीरामस्य नन्दिग्रामस्य प्रयाणम्,भरतात् राज्यस्वीकरणम्-इति एते प्रमुखतया निरूपिताः । एते च विषयाः समग्रयुद्धकाण्डगतकथावगमनाय समर्थाः भवन्ति।

## ७.४ अभ्यासः

द्वौ श्लोकौ व्याख्यात ?

१.भरद्वाजाश्रमं गत्वा रामः सत्यपराक्रमः ।
भरतस्यान्तिके रामो हनूमन्तं व्यसर्जयत् ।।

२.दर्शयामास चात्मानं समुद्रः सरितां पतिः ।
समुद्रवचनाच्चैव नलं सेतुमकारयत् ।।

# अंशः-VIII ; श्रीरामराज्यप्राशस्त्यम्

८.० परिचयः
८.१ लक्ष्याणि
८.२ श्रीरामराज्यप्राशस्त्यम्
८.२.१ सुखमयं शान्तिपूर्णं च रामराज्यम्
. ८.२.२ भद्रजीवनं रामराज्यम्
८.२.३ उपद्रवरहितं रामराज्यम्
८.२.४ क्रियाशीलकं रामराज्यम्
८.२.५ यज्ञ-यागाद्यनुष्ठापकं रामराज्यम्
८.२.६ विकेन्द्रीकरणकं रामराज्यम्
८.२.७ राज्यपालनकालः - अवतारविरमणं च
८.३.श्रीमद्रामाणप्राशस्त्यम्
८.३.१दुरालोचननाशकं श्रीमद्रामायणम्
८.३.२.कुटुम्बजीवनविधानज्ञापकं श्रीमद्रामायणम्
८.३.३.चातुर्वर्गफलप्रदं श्रीमद्रामायणम्
८.४ उपसंहारः
८.५ अभ्यासः

## ८.२ श्रीरामराज्यप्राशस्त्यम्

### ८.२.१सुखमयं शान्तिपूर्णं च रामराज्यम्

प्रहृष्टमुदितो लोकः तुष्टः पुष्टः सुधार्मिकः ।
निरामयो ह्यरोगश्च दुर्भिक्षभयवर्जितः ।। ९० ।।

पद्यपरिचयः;अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः; 'रामराज्ये सर्वे जनाः सुखेन सन्तोषेण च जीवितं यापयन्ति' इत्यमुम् अंशं विवृण्वन् अयं श्लोकः रामराज्यप्राशस्त्यकथनप्रसङ्गे वर्तते।

पदविभागः; - प्रहृष्टमुदितः, लोकः, तुष्टः, पुष्टः, सुधार्मिकः ।
निरामयः, हि, अरोगः, च, दुर्भिक्षभयवर्जितः ।।

अन्वयक्रमः; - (रामे राज्यम् अधिरूढे )लोकः प्रहृष्टमुदितः तुष्टः पुष्टः सुधार्मिकः निरामयः अरोगः दुर्भिक्षभयवर्जितः च (जातः)हि ।

प्रतिपदार्थः; - (रामे=श्रीरामे ; राज्यम्=प्रभुत्वम्; अधिरूढे=अधिष्ठिते; )लोकः = प्रजाः; प्रहृष्ट मुदितः, प्रहृष्ट = सन्तोषेण ;मुदितः = आनन्दितः; तुष्टः = तृप्तिम् आप्तः; पुष्टः = बलसम्पन्नः; सुधार्मिकः = धर्माचरणरतः; निरामयः = मानसव्यथारहितः; अरोगः = शारीरिकरोगरहितः; दुर्भिक्षभयवर्जितः= अतिवृष्टि-अनावृष्ट्यादिभीतिरहितः;च=अपि ;(जातः=भूतः) हि = खलु;

श्लोकभावः; श्रीरामः रावणस्य वधानन्तरं सुग्रीवादिभिः साकम् अयोध्याम् आगच्छति।राज्ये च अभिषिक्तः भवति। भरतात् राज्यभारं स्वीकरोति। तस्य राज्यपालनाकाले सर्वे जनाः सुखिनः भवन्ति। सन्तोषम् आप्नुवन्ति। क्रमशिक्षणयुताश्च भवन्ति। बलवर्धिताः भवन्ति। निरामयाः जीवन्ति। अतिवृष्टिं अनावृष्टिं वा कदापि न पश्यन्ति ।

विशेषांशः; 'रामराज्ये प्रजाः प्रशान्तजीवनं यापयामासुः'इत्यंशः अत्र निरूपितः।

सन्धिः ;लोकस्तुष्टः; लोकः + तुष्टः (अः + तु = स्)विसर्गसन्धिः।
ह्यरोगः ; हि + अरोगः (इ + अ = य् )यणादेशसन्धिः।
अरोगश्च; अरोगः + च (अः + च् = स्)विसर्गसन्धिः ।

समासः; प्रहृष्टः; प्रकर्षेण हृष्टः= प्रादितत्पुरुषसमासः।
प्रहृष्टमुदितः; प्रहृष्टश्चासौ मुदितश्चेति= कर्मधारयसमासः।
सुधार्मिकः; शोभनश्चासौ धार्मिकश्चेति = कर्मधारयसमासः।
निरामयः - निर्गताः आमयाः यस्मात् सः =बहुव्रीहिसमासः।
अरोगः - अविद्यमानः रोगः यस्य सः =बहुव्रीहिसमासः।

कोशः; आमयः; - मनःपीडा, मनोव्यथा

### ७. २.२.भद्रजीवनं रामराज्यम्

न पुत्रमरणं केचिद् द्रक्ष्यन्ति पुरुषाः क्वचित् ।
नार्यश्चाविधवा नित्यं भविष्यन्ति पतिव्रताः ।। ९१ ।।

पद्यपरिचयः;अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः;'रामराज्ये सर्वे जनाः भद्राणि एव पश्यन् जीवितं यापयन्ति - कोपि अशुभं न पश्यति ,न शृणोति च' इत्यमुम् अंशं विवृण्वन् अयं श्लोकः रामराज्यस्य प्राशस्त्यकथनप्रसङ्गे वर्तते।

पदविभागः; - न ,पुत्रमरणम्, केचित्, द्रक्ष्यन्ति, पुरुषाः, क्वचित् ।
नार्यः, च ,अविधवाः, नित्यं, भविष्यन्ति, पतिव्रताः ।।

अन्वयक्रमः; केचिद् (अपि) पुरुषाः क्वचित् पुत्रमरणं न द्रक्ष्यन्ति । नार्यः नित्यम् अविधवाः पतिव्रताः च भविष्यन्ति ।

प्रतिपदार्थः; -केचित् = ये केचन, (अपि =च;) पुरुषाः = जनाः, क्वचित् = कुत्रचिद् अपि ,

पुत्रमरणम् ,पुत्र=सुतस्य; मरणम् = मृत्युम्; न द्रक्ष्यन्ति = न अवलोकिष्यन्ते; नार्यः च = स्त्रियः च; पतिव्रताः = पतिभक्तिपरायणास्सन्तः; नित्यम् = सर्वदा; अविधवाः = सौभाग्यवत्यः; भविष्यन्ति = जीविष्यन्ति;

पद्यभावः; - श्रीरामस्य राज्यपालनकाले पुरुषाः, स्त्रियश्च स्वस्वधर्मेषु रताः सन्ति। क्रमशिक्षणयुताः च भवन्ति। अतः सर्वे पुण्यशलिनः जाताः। अतएव पुण्यफलं भद्रम् एव प्राप्नुवन्ति। कदाचित् अपि, कुत्रचिदपि पितरः अशुभं पुत्रमरणं न पश्यन्ति। नार्यश्च पति सेवापराणास्सत्यः निरन्तरं सौभाग्यवत्यो जीवन्ति। कदाचिदपि वैधव्यं न प्राप्नुवन्ति।

विशेषांशः; श्रीरामस्य राज्यपालनकाले दुरालोचनपराः वा दुष्कर्माचरणशीलाः जनाः न सन्ति इति अस्मात् ज्ञायते।

सन्धिः; नार्यश्च; नार्यः + च (अः+ च् = श्)विसर्गसन्धिः।
चाविधवा; च + अविधवाः (अ + अ = आ)सवर्णदीर्घसन्धिः

समासः; पुत्रमरणम्; पुत्रस्य पुत्राणां वा मरणम् =षष्ठीतत्पुरुषः।
अविधवाः; न विधवाः अविधवाः = नञ् तत्पुरुषः।
पतिव्रताः; पतिः एव व्रतं यासां ताः = बहुव्रीहिः।

## ८.२.३.उपद्रवरहितं रामराज्यम्

न चाग्निजं भयं किञ्चिन् नाप्सु मज्जन्ति जन्तवः ।
न वातजं भयं किञ्चिन् नापि ज्वरकृतं तथा ।। ९२ ।।

पद्यपरिचयः;अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः; 'श्रीरामस्य राज्यपालनकाले प्राकृतिकाः = प्रकृतिसम्बन्धिनः,उपद्रवाः केपि नासन्' इत्यमुम् अंशं ज्ञापयन् अयं श्लोकः श्रीरामराज्यस्य प्राशस्त्यकथनप्रसङ्गे विद्यते।

पदविभागः; न, च, अग्निजम्, भयम्, किञ्चित्, न ,अप्सु ,मज्जन्ति, जन्तवः ।
न, वातजम्, भयम्, किञ्चित्, न, अपि, ज्वरकृतम्, तथा ।।

अन्वयक्रमः; - अग्निजं किञ्चिद् भयम्, न (च)।जन्तवः अप्सु न मज्जन्ति । वातजं भयम्, किञ्चिद् न । तथा ज्वरकृतम् अपि किञ्चिद् भयम्, न।

प्रतिपदार्थः ;- अग्निजम् = अग्निहेतुकम्; किञ्चिद् च= यत्किञ्चन अपि; भयम् = भीतिः; न = न वर्तते; जन्तवः = प्रणिनः; अप्सु = जले; न मज्जन्ति = न निमग्नाः भवन्ति;वातजम् = वायुजनितम्; भयम् = भीतिः; किञ्चिद् = यत्किञ्चन; न = न विद्यते; तथा = तेनैव प्रकारेण; ज्वरकृतम्, ज्वर= रोगेण; कृतम् =जातम् पीडादिकम्; अपि = च; न =नैव भवति;

श्लोकभावः; -यथा राजा आदर्शो भवति तथा प्रजाः अपि नीतिसम्पन्नाः भवन्ति।यदि राजा दुष्टः तदा प्रजाः अपि दुरालोचनपराः ,पापकार्याचरणशीलाः च भवन्ति। प्रजानां पापकार्याचरणं प्रकृतेः भारजनकं भवति। दुरालोचनं नाम मनः कालुष्यं भवति। पापकार्याचरणं नाम कर्म कालुष्यं भवति। तच्च उपद्रवान् कल्पयति। तदा प्रकृतेः वैपरीत्यं सम्भवति।भूकम्पः,जलप्रलयः, वायुगुण्डम् इत्यादिकं जायते। प्रकृते श्रीरामस्य राज्यपालनाकाले प्रजानां मनस्सु कर्मसु वा कालुष्यं नास्ति। प्रकृतेःसमतोलनम् नष्टं न भवति।उपद्रवाश्च न भवन्ति।अत एव अग्नेः वा, जलात् वा, वायोः वा उपद्रवा न भवन्ति। भीतिश्च नास्ति।

सन्धिः;चाग्निजम् ; च + अग्निजम् (अ + अ=आ)सवर्णदीर्घसन्धिः।

केचिन्न; केचित् + न (त् + न =न् )अनुनासिकसन्धिः।

नाप्सु; न + अप्सु (अ + अ=आ)सवर्णदीर्घसन्धिः।

किञ्चिन्न; किञ्चित् + न(त् + न =न् )अनुनासिकसन्धिः।

नापि; न + अपि (अ + अ=आ)सवर्णदीर्घसन्धिः।

समासः;अग्निजम्; अग्नेः जायते = उपपदतत्पुरुषसमासः।

वातजम्; वातात् जायते = उपपदतत्पुरुषसमासः।

ज्वरकृतम्; - ज्वरेण कृतम् = तृतीयातत्पुरुषसमासः।

विशेषांशः; श्रीरामस्य राज्यपालनं प्रकृतेः अनुकूलं,पर्यावरणपरिरक्षकं च अस्ति इति अत्र निरूपितम्।

## ८.२.४.क्रियाशीलकं रामराज्यम्

न चापि क्षुध्-भयं तत्र न तस्करभयं तथा ।
नगराणि च राष्ट्राणि धनधान्ययुतानि च ।। ९३ ।।
नित्यं प्रमुदिताः सर्वे यथा कृतयुगे तथा ।

पद्यपरिचयः;अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः; 'श्रीरामस्य राज्यपालनकाले , कदाचिदपि आहारसमस्या नास्ति इति अमुम् विषयं ज्ञापयन् अयं श्लोकः श्रीरामराज्यस्य प्राशस्त्यकथनप्रसङ्गे विद्यते।

पदविभागः; - न, च, अपि, क्षुध्-भयम्, तत्र, न, तस्करभयम्, तथा ।
नगराणि, च, राष्ट्राणि, धनधान्ययुतानि, च ।।
नित्यम्, प्रमुदिताः, सर्वे, यथा, कृतयुगे, तथा ।

अन्वयक्रमः; - तत्र क्षुध्-भयम् अपि न । तथा (एव) तस्करभयम् (अपि) न। नगराणि राष्ट्राणि च धनधान्ययुतानि(सन्ति)। सर्वे यथा कृतयुगे तथा प्रमुदिताः(अभवन्)।

प्रतिपदार्थः; - तत्र = तस्मिन् रामराज्ये; क्षुद्भयम्,क्षुत्, =बुभुक्षाहेतुकम्; भयम् =भीतिः ; अपि = च; न = न विद्यते ;तथा = तेनैव प्रकारेण; तस्करभयम् ,तस्कर = चोरेभ्यः ; भयम् = भीतिः; अपि = च;न = न विद्यते; नगराणि = पुराणि ;राष्ट्राणि च = जनपदाश्च; धनधान्ययुतानि ; धन= धनेन, धान्य=धान्येन च युतानि=.समृद्धानि(भवन्ति=सन्ति)। यथा = येन प्रकारेण;कृतयुगे = सत्ययुगे; सर्वे =समस्ताः जनाः;( प्रमुदिताः =प्रकर्षेण हर्षं आप्ताः)तथा = तेन प्रकारेण; प्रमुदिताः = प्रकर्षेण आनन्दम् आप्ताः (वर्तन्ते।)

श्लोकभावः; - रामराज्ये क्षुधादिबाधा कापि नास्ति। क्षुत्पीडानिवारणार्थं कुत्रापि पौराः पथिकान् न ताडयन्ति। धन-कनक-वस्तु-वाहनादिकं न चोरयन्ति। पत्तनानि,पुरः, नगराणि सततं सस्य श्यामलानि वर्तन्ते। धनसमृद्धानि धान्यसमृद्धानि च भवन्ति। एवं तत्र चौर्याय अवसरो नास्ति। चोराणां प्रसक्तिरेव च नास्ति।

समासः; क्षुध्- भयम् ; क्षुधः भयं क्षुद्भयम् = पञ्चमीतत्पुरुषसमासः।

तस्करभयम्; तस्कराद् भयं तस्करभयम् = पञ्चमीतत्पुरुषसमासः।

कृतयुगे; कृतञ्च तद् युगम् कृतयुगः,तस्मिन् = कर्मधारयसमासः।

विशेषांशः; रामराज्ये सेद्यव्यवसायः प्रधानवृत्तिः, आहारभद्रता पुष्कला, धान्यागाराश्च पूर्णाः , पौराश्च कृषीवलाः ,कष्टफलभोक्तारश्च इत्ययमंशः अत्र निरूपितः।

## ८.२.५ यज्ञ-यागाद्यनुष्ठापकं रामराज्यम्

अश्वमेधशतैरिष्ट्वा तथा बहुसुवर्णकैः ।। ९४ ।।
गवां कोट्ययुतं दत्त्वा विद्वद्भ्यो विधिपूर्वकम् ।
असंख्येयं धनं दत्त्वा ब्राह्मणेभ्यो महायशाः ।। ९५ ।।

पद्यपरिचयः;अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः; ' राज्यपालनकाले श्रीरामः यज्ञ-यागादिभिः दैवं पालनानुगुणं करोति 'इति अमुं विषयं ज्ञापयन् अयं श्लोकः श्रीरामराज्यस्य प्राशस्त्यकथनप्रसङ्गे विद्यते।

पदविभागः; - अश्वमेधशतैः इष्ट्वा, तथा बहुसुवर्णकैः ।।
गवाम्, कोट्ययुतम्, दत्त्वा, विद्वद्भ्यः ,विधिपूर्वकम् ।
असंख्येयम्, धनम्, दत्त्वा, ब्राह्मणेभ्यः महायशाः ।

अन्वयक्रमः; - महायशाः (राघवः) बहुसुवर्णकैः अश्वमेधशतैः इष्ट्वा ,गवां कोट्ययुतं असंख्येयम् धनं (च) विद्वद्भ्यः ब्राह्मणेभ्यः विधिपूर्वकं दत्त्वा ( सत्करोति )।

प्रतिपदार्थः - महायशाः = सुकीर्तिसम्पन्नः, राघवः =श्रीरामः, बहुसुवर्णकैः, बहु=प्रचुरेण,सुवर्णकैः, = स्वर्णमुद्रिका (Golden Coins) व्ययेन साध्यैः,अश्वमेधशतैः, अश्वमेध=अश्वमेधदीनाम्; शतैः = शतसंख्याकैः;

(बहुभिः इति यावत्) इष्ट्वा = यजनं विधाय; तथा = तेनैव प्रकारेण ;गवाम् = धेनूनाम्; कोट्ययुतम् = दशसहस्र-कोटीः; च=अपि च; असंख्येयम् = अपरिगणनीयम्; धनम् =धन-कनक-वस्तु- वाहनादिरूपं द्रव्यम्, च = अपि च; विद्वद्भ्यः = प्रतिभा-व्युत्पन्नेभ्यः पण्डितेभ्यः; ब्राह्मणेभ्यः = विप्रेभ्यः; विधिपूर्वकम् = यथाशास्त्रम्; दत्त्वा = समर्प्य; (सत्करिष्यति स्म =सन्मानं करोति स्म। )

श्लोकभावः; - श्रीरामः अश्वमेधयज्ञान् शतशः आचरति । ते च बहु आयाससाध्याः, अधिकधनव्ययेन आचरणीयाश्च भवन्ति । तस्मिन् एव सन्दर्भे प्रतिभायुत्पन्नानां ब्राह्मणानां कोटिशः गावः समर्पयति। विप्रेभ्यः धन-कनक-वस्तु- वाहनादिरूपं द्रव्यम् च बहुशः दानं करोति ।

विशेषांशः ; श्रीरामः सततं मेधाविनां सन्मानं करोति इत्ययमंशः अत्र प्रस्तावितः।

सन्धिः; कोट्ययुतम्; कोटि + अयुतम्(इ+ अ=य् )यणादेशसन्धिः।

समासः; अश्वमेधशतैः; अश्वमेधानां शतम् अश्वमेधशतम्,तैः= षष्ठीतत्पुरुषसमासः।

कोट्ययुक्तम्; कोटीनाम् अयुतम् =षष्ठीतत्पुरुषसमासः।

महायशाः; महद् यशः यस्य सः=बहुव्रीहिसमासः।

राजवंशान् - राज्ञः वंशाः राजवंशाः तान् =बहुव्रीहिसमासः.।

## ८.२.६.विकेन्द्रीकरणकं रामराज्यम्

राजवंशाञ्छतगुणान् स्थापयिष्यति राघवः ।
चातुर्वर्ण्यं च लोकेऽस्मिन् स्वे-स्वे धर्मे नियोक्ष्यति ।। ९६ ।।

पद्यपरिचयः;अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः; ' राज्यपालनकाले श्रीरामः अधिकारं विकेन्द्रीकरोति 'इति अमुं विषयं ज्ञापयन् अयं श्लोकः श्रीरामराज्यस्य प्राशस्त्यकथनप्रसङ्गे विद्यते।

पदविभागः; - राजवंशान् ,शतगुणान्, स्थापयिष्यति ,राघवः ।
चातुर्वण्यम्, च, लोके, अस्मिन्, स्वे,स्वे , धर्मे, नियोक्ष्यति ।।

अन्वयक्रमः - राघवः शतगुणान् राजवंशान् स्थापयिष्यति। अस्मिन् लोके चातुर्वण्यं स्वे-स्वे धर्मे नियोक्ष्यति च ।

प्रतिपदार्थः - राघवः = श्रीरामः; शतगुणान् ,शत=शतशः; गुणान्= गुणितान्; राजवंशान्, राज= राजकीयनायकानाम्; ,वंशान् =समुदायान्; स्थापयिष्यति = प्रतिष्ठापयिष्यति,च = अपि च, अस्मिन् =एतस्मिन्; लोके = भुवि; चातुर्वर्ण्यम् = चतुर्णां वर्गाणां समुदायम्, स्वे स्वे = स्व स्व धर्मे =कर्मणि, नियोक्ष्यति = नियमयति,

श्लोकभावः - श्रीरामः परिपालनदक्षः। प्रजानां सौख्यं तस्य प्रधानम्।तदर्थं अधिकारं च विकेन्द्रीकरोति । यथावसरं बहूनि राजकुलानि स्थापयेति । तैः प्रजानां संक्षेमकार्यक्रमान् अनुतिष्ठति। चातुर्वर्ण्यं च स्व -स्व -कार्येषु नियमयति। जीवनं सामाजिकं समैक्यं समरसं च साधयति।

विशेषांशः; विवादरहितम्, समरसतासाधकं च रामराज्यम् इति अत्र निरूपितम्
सन्धिः; कोट्ययुतम् ; कोटि + अयुतम्(इ+ अ=य् )यणादेशसन्धिः।
लोकेऽस्मिन् ; लोके + अस्मिन् (ए + अ =एऽ )पूर्वरूपसन्धिः।
समासः; अश्वमेधशतैः; अश्वमेधानां शतम् अश्वमेधशतं तैः=षष्ठीतत्पुरुषसमासः।
कोट्ययुक्तम्; कोटीनाम् अयुतम् =षष्ठीतत्पुरुषसमासः।
महायशाः; महद् यशः यस्य सः= बहुव्रीहिसमासः।
राजवंशान् ; राज्ञः वंशाः राजवंशाः तान्= बहुव्रीहिसमासः।

## ८.२.७.राज्यपालनकालः - अवतारविरमणं च

दशवर्षसहस्राणि दशवर्षशतानि च ।
रामो राज्यमुपासित्वा ब्रह्मलोकं प्रयास्यति ।। ९७ ।।

पद्यपरिचयः;अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।
पद्यसन्दर्भः; 'श्रीरामस्य राज्यपालनाकालं , अवतारविरमणं च ज्ञापयन् अयं श्लोकः श्रीरामराज्यस्य प्राशस्त्यकथनप्रसङ्गे विद्यते।
पदविभागः; - दशवर्षसहस्राणि, दशवर्षशतानि च ।
रामः, राज्यम्, उपासित्वा, ब्रह्मलोकम्, प्रयास्यति ।।
अन्वयक्रमः; - रामः दशवर्षसहस्राणि दशवर्षशतानि म राज्यम् उपासित्वा ब्रह्मलोकं प्रयास्यति ।
प्रतिपदार्थः; रामः = राघवः, दशवर्षसहस्राणि = दशवर्षसहस्राणि, दशवर्षशतानि = दशवर्षशतानि, च = च, राज्यम् = साम्राज्यम्, उपासित्वा = संसेव्य,ब्रह्मलोकम् = परमं लोकम्,प्रयास्यति = गमिष्यति ।
श्लोकभावः - श्रीरामः दशशतानि =1000+ , दशसहस्राणि =10,000 वर्षाणि, आहत्य एकादशसहस्रवर्षाणि यावत् राज्यं प्पालयति। अनन्तरं परब्रह्मणः लोकं विष्णुसायुज्यं वैकुण्ठं च गच्छति ।अवतारं च समापयति ।
विशेषांशः; ' अत्र एकादशसहस्रं वर्षाणि यावत् दिव्यकालं श्रीरामः राज्यं करोति' इत्यंशः अत्र निरूपितः।
सन्धिः;रामो राज्यम् ;रामः + राज्यम् (अः + र् = ओ) विसर्गसन्धिः।
समासः; ब्रह्मलोकम् ; ब्रह्मणः लोकः = षष्ठीतत्पुरुषसमासः।

## ८.३.श्रीमद्रामाणप्राशस्त्यम्

### ८.३.१.दुरालोचननाशकं रामायणम्

इदं पवित्रं पापघ्नं पुण्यं वेदैश्च सम्मितम् ।
यः पठेद् रामचरितं सर्वपापैः प्रमुच्यते ।। ९८ ।।

पद्यपरिचयः;अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः ;श्रीमद्रामायणस्य पठनं पाठकस्य सदालोचनम् अभ्यासयति, दुरालोचनं दूरीकरोति, इति अमुम् अंशं ज्ञापयन् अयं श्लोकः श्रीमद्रामायणप्राशस्त्यकथनप्रसङ्गे वर्तते।

पदविभागः - इदम्, पवित्रम्, पापघ्नम्, पुण्यम्, वैदैः, च, सम्मितम् ।
यः, पठेत्, रामचरितम्, सर्वपापैः, प्रमुच्यते ।।

अन्वयक्रमः -यः पवित्रं पापघ्नं पुण्यं वैदेश्च सम्मितं रामचरितं इदं पठेत् सर्वपापैः प्रमुच्यते ।

प्रतिपदार्थः -यः = यः जनः, पवित्रम् = परिशुद्धम्, पापघ्नम् = दुरालोचनानाम् अपनोदकम् पुण्यम् = सदालोचनानां वर्धकम्, पुण्यप्रदम्, वेदैश्च = श्रुतिभिः, सम्मितम्=अनुमोदितम्, रामचरितम् = रामस्य वृत्तान्तबोधकम्,इदम् = एतत् रामायणम्, पठेत् = संगिरेत्,(सः= सःपुरुषः) सर्वपापैः,सर्वैः =समस्तविधैः पापैः =दुष्कर्माचरणफलैः , प्रमुच्यते = मुक्तः भवति।

श्लोकभावः -श्रीमद्रामाणम् दुरालोचनं अपनुदति। साधु चिन्तनं वर्धयति। अत एव यः कोऽपि नरः श्रद्धया श्रीमद्रामाणम् पठति तस्य बुद्धिः वर्धते। विवेकश्च जायते। परिशुद्धश्च भवति।अपि च अत्र वेदवेद्यस्य श्रीरामस्य सुचरितं वर्ण्यते। तत् च सर्वदुःखहरं भवति। एवम् इदं वेदार्थबोधकं संक्षिप्तं मूलरामायणस्य पठनम् सर्वपापविमोचकं भवति।

विशेषांशः;श्रीमद्रामाणस्य पठनं मनवानां मानसिकपरिवर्तनं जनयति इत्यंशः अत्र प्रस्तावितः।

सन्धिः; वेदैश्च; वेदैः + च (ऐः + च् =श्)विसर्ग/श्चुत्वसन्धिः।

समासः;पापघ्नम्; पापं हन्ति इति पापघ्नः,तम् =उपपदसमासः

रामचरितम् ; रामस्य चरितम्= षष्ठीतत्पुरुषसमासः

सर्वपापैः; सर्वाणि च पापानि, सर्वपापानि, तैः= कर्मधारयसमासः

### ८.३.२. कुटुम्बजीवनविधानज्ञापकं श्रीमद्रामायणम्

एतदाख्यानमायुष्यं पठन् रामायणं नरः ।
सपुत्रपौत्रः सगणः प्रेत्य स्वर्गे महीयते ।। ९९ ।।

पद्यपरिचयः;अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके

वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।
पद्यसन्दर्भः; श्रीमद्रामायणस्य पठनं जन्मान्तरेषु पुत्र-पौत्रादिष्वपि बुद्धिविवर्धनाय कल्पते इति अमुं विषयं ज्ञापयन् अयं श्लोकःश्रीरामद्रामायणस्य प्राशस्त्यकथनप्रसङ्गे विद्यते।
पदविभागः - एतत्, आख्यानम्, आयुष्यम्, पठन्, रामायणम्, नरः,
सपुत्रपौत्रः, सगणः, प्रेत्य, स्वर्गम्, महीयते ।।
अन्वयक्रमः; एतद् आयुष्यम् रामायणम् आख्यानम्, पठन् नरः सपुत्रपौत्रः सगणः प्रेत्य स्वर्गे महीयते ।
प्रतिपदार्थः; एतद् = इदम्; आयुष्यम् = आयुर्वर्धकम्; रामायणम् = रामचरितम्,आख्यानम् = कथाम्, पठन् = अधीयानः, नरः = जनः, प्रेत्य = शरीरं त्यक्त्वा, सपुत्रपौत्रः = पुत्रैः पौत्रैः सहितः,च=अपि च; सगणः = सपरिवारः, स्वर्गे = स्वर्गलोके, महीयते = पूज्यते।
श्लोकभावः; रामायणस्य पठनम्, श्रवणं च बुद्धिप्रदं विवेकवर्धकं च भवति। विवेकेन बाध्यतायुतं जीवनं यापयति। बाध्यताजीवनं समैक्यस्फूर्तिं ददाति।समैक्यस्फूर्तिः आनन्दं जनयति।आनन्देन आरोग्यम्, तेन च आयुष्यं सम्पद्यते। एवम् रामायणं आयुःकारकं भवति। बन्धु-मित्र-पुत्र-कलत्रैः साकं अस्याः कथायाः सल्लापनेन ,इह उत्तमजीवनं भवति। मरणानंतरम् स्वर्गे वासः च लभ्यते।
विशेषांशः;रामायणस्य पठनम्, विस्तृतरूपेण संस्काराधायकं सत्, इह-परसुखं ददाति इत्यंशः अत्र प्रस्तावितः।
सन्धिः; एतदाख्यानम् ; एतत् + आख्यानम् (त् + आ = द्)जश्त्वसन्धिः
समासः; सगणः ; गणैः सह सगणः= बहुव्रीहिसमासः।
रामायणम् ;रामस्य अयनम्= षष्ठीतत्पुरुषसमासः।

## ८.३.३.चातुर्वर्गफलप्रदं श्रीमद्रामायणम्

पठन् द्विजो वागृषभत्वमीयात् स्यात् क्षत्रियो भूमिपतित्वमीयात् ।
वणिग्जनः पण्यफलत्वमीयात् जनश्च शूद्रोऽपि महत्तवमीयात् ।। १०० ।।

पद्यपरिचयः;अयं श्लोकः सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।
पद्यसन्दर्भः; 'सर्वजनोद्धारकं हि श्रीमद्रामायणम्'अमुं विषयं ज्ञापयन् अयं श्लोकः श्रीरामद्रामायणस्य प्राशस्त्यकथनप्रसङ्गे विद्यते।
पदविभागः - पठन्, द्विजः, वागृषभत्वम्, ईयात्, स्यात् ,क्षत्रियः, भूमिपतित्वम्, ईयात् ।
वणिग्जनः, पण्यफलत्वम्, ईयात्, जनः, च, शूद्रः, अपि, महत्त्वम्, ईयात् ।।

अन्वयक्रमः - पठन् द्विजः (तर्हि सः) वागृषभत्वम् ईयात् । पठन् (यदि)क्षत्रियः (तर्हि सः) भूमिपतित्वम् ईयात्। पठन् (यदि)वणिग्जनः(तर्हि सः) पण्यफलत्वम् ईयात् ।पठन् (यदि)शूद्रः

(तर्हि सः जनः) अपि महत्त्वम् ईयात् ।

प्रतिपदार्थः -पठन् = अधीयानः, द्विजः = विप्रः,वागृषभत्वम् = वाक्पटुत्वम्, ईयात् = प्राप्नुयात्,। क्षत्रियः = राजा,यदि स्यात् =अधीयानः भवेत् चेत् , भूमिपतित्वम् = सार्वभौमत्वम् ईयात् = आप्नुयात्। वणिग्जनः = वैश्यः, यदि स्यात् =अधीयानः भवेत् चेत् ,पण्यफलत्वम् = धनधान्यवृद्धिम्, ईयात् = लभेत,। शूद्रः जनः = शूद्रवर्णविशिष्टः, च = च, अपि = अपि महत्त्वम् = श्रेष्ठतमत्वम्, ईयात् = प्राप्नुयात् ।

श्लोकभावः - ब्राह्मणः यदि इदं रामायणं पठति तदा सः वाग्मी भवति । यदि क्षत्रियः पठति तदा असौ साम्राज्यं प्राप्नोति। यदि वैश्यः पठति तदा सः बहुधनं लभते। यदि शूद्रः पठति तदा सर्वत्र सन्मानितो भवति । एवम् श्रीमद्रामायणं चतुर्णां वर्णानां अभ्युदयप्रदायकं भवति।

विशेषांशः; श्रीमद्रामायणम् समरसतासम्पादकम् उत्तमं काव्यम्' इत्यंशः अत्र निरूपितः।

सन्धिः; वागृषभत्वम्; वाक् + ऋषभत्वम् (क्+ ऋ=ग्) जश्त्वसन्धिः।
वणिग्जनः; वणिक् + जनः(क्+ ज् =ग्)जश्त्वसन्धिः।
ईयाज्जनः; ईयात् + जनः (त् + ज् =ज्)जश्त्व/श्चुत्वसन्धिः।
शूद्रोऽपि; शूद्रः + अपि (अः + अ = ओऽ)विसर्ग/पूर्वरूपसन्धिः।

समासः; वागृषभत्वम्; - वाचि ऋषभत्वम् = सप्तमीतत्पुरुषः।
भूमिपतित्वम्; - भूमेः पतित्वम् = षष्ठीतत्पुरुषः।
वणिग्जनः; - वणिक् चासौ जनः = कर्मधारयः।

## ८.४ उपसंहारः

एवम् अत्र श्रीरामराज्यस्य प्राशस्त्यम् वर्णितम् । रामराज्यम् सुखं शान्तिं च प्रयच्छति। भयरहितं भद्रजीवनं कल्पयति । रामराज्ये कदापि उपद्रवाः न भवन्त्येव ।रामराज्यम् प्रजाः कर्मसु प्रवर्तयति। रामराज्ये यज्ञ-यागादयः सततं अनुष्ठीयन्ते। रामराज्ये,विकेन्द्रीकरणकं पालनं प्रचलति। एवम्, श्रीमद्रामाणग्रन्थपठनम् अपि दुरालोचनं नाशयति। आदर्शप्रायं कुटुम्बजीवनविधानं ज्ञापयति। समसमाजं च स्थापयति। बाध्यतायुतं जीवनं प्रसादयति। सामाजिकजीवनम् अनुगृह्णाति। समैक्यजीवनाय संसिद्धं करोति।

## ८.५ अभ्यासः

द्वौ श्लोकौ व्याख्यात ?

१.एतदाख्यानमायुष्यं पठन् रामायणं नरः ।
सपुत्रपौत्रः सगणः प्रेत्य स्वर्गे महीयते ।।

२.न चाग्निजं भयं किञ्चिन् नाप्सु मज्जन्ति जन्तवः।
न वातजं भयं किञ्चिन् नापि ज्वरकृतं तथा।।

# अंशः- IX; संक्षेपरामायणम्-व्यासात्मकप्रश्नाः (2x10=20)

९.० परिचयः
९.१.लक्ष्याणि
९.२.श्रीमद्रामायणम्-व्यासात्मकप्रश्नाः
 ९.२.१. श्रीरामस्य गुणवैभवम्-बालकाण्डकथाभागः
 ९.२.२.पितृवाक्यपालनम्-अयोध्यकाण्डकथाभागः
 ९.२.३.सीतायाः अपहरणम्-अरण्यकाण्डकथाभागः
 ९.२.४.राम-सुग्रीवयोः अग्निसाक्षिकं सख्यम्-किष्किन्धाकाण्डकथाभागः
 ९.२.५.सीतायाः अन्वेणम्-सुन्दरकाण्डकथाभागः
 ९.२.६. रावणस्य संहरणम् -युद्धकाण्डकथाभागः
 ९.२.७.श्रीमद्रामायणम्-प्राशस्त्यम्
९.३.उपसंहारः
९.४.अभ्यासः

## ९.० परिचयः

Diploma in Sanskrit Examination मध्ये , आहत्य पञ्च पत्राणि (Papers) सन्ति।तत्र इदं द्वितीयं प्रश्नपत्रम्। अस्य च शतं १०० अङ्काः भवन्ति। अत्र च विषयद्वयं भवति।संक्षेपमायणम् इत्ययम् एको विषयः।एतस्य कृते पञ्चाशत् ५० अङ्काः भवन्ति।त्रयः प्रश्नाः वर्तन्ते।तेषु व्यासात्मकः प्रश्नः अन्यतमः। अस्य च विंशत्यिङ्काः विद्यन्ते।प्रश्नद्वयं समाधातव्यं भवति।एकैकस्य कृते १० अङ्काः भवन्ति। एतत्प्रश्नलेखनाय अपेक्षितः अभ्यासः अत्र लब्धुं शक्यते।

## ९.१.लक्ष्याणि

प्रतिपाठ्यांशस्यापि अध्ययने विद्यार्थिनां प्रयोजनद्वयं साधनीयं भवति। तत्र वैयक्तिकं जीवनलक्ष्यम् एकम्।परीक्षादृक्पथम् (Examination Point Of View) अपरम्। प्रश्नपत्रस्य पाठ्यांशं परीक्षादृष्ट्या अपि अभ्यसनीयं भवति। प्रश्नपत्रे व्यासात्मकप्रश्नलेखनाय आवश्यकम् अत्र सम्पाद्यते।एतत् पाठ्यांशस्य अध्ययनेन -

अ) संस्कृतभाषायां लेखनकौशलं वर्धितं भवति।
इ)संस्कृतभाषायां रचनाकौशलं सम्पादितं भवति।
उ)संस्कृतभाषायाम् आलोचनायै प्रेरणं दत्तं भवति।
ऋ)परीक्षादृक्पथं अभ्यसितं भवति,आर्जितं च भवति।

## ९.२.१.श्रीरामस्य गुणवैभवम्

आदर्शपुरुषस्य दर्शनेन श्रवणेन सेवनेन,तस्य चरिताध्ययनेन मननेन तद्गुणकथनेन च मानवेन आदर्शनीयतां प्रति परिचयः सम्पाद्यते।आदर्शपुरुषस्य सूचनाय वाल्मीकेः प्रश्नकरणं नारदस्य समाधानं च अत्र वर्णितं विद्यते।

**वाल्मीकेः प्रश्नकरणम्**

मानवाभ्युदयचिन्तनशीलः वाल्मीकिः, मानवाभ्युदयसाधने वेदोक्तमार्गान्वेषणतत्परश्च नारदः। अभिप्रायाविष्करणसमर्थश्च।अतः वाल्मीकिः कदाचित् नादम् — 'हे महर्षे ! इदानीम् अस्मिन् जगति विशिष्टगुणसम्पन्नः कः ? पराक्रमोपेतः कः? को नु धर्मतत्त्ववेत्ता भवति? परकृतस्य उपकारस्य स्मारकः कः? सततं सत्यवादी दृढप्रतिज्ञश्च पुरुषः कः अस्ति ?हे महर्षे ! कस्य जीवनचरितं महत्त्वपूर्णम्? कस्य प्रवर्तनं आदर्शभूतम्? सर्वेषां प्राणिनां हितं कः चिन्तयति? निखिलशास्त्रनिष्णातः को नु वर्तते वा? सर्वेषां कार्याणां सम्पादने समर्थः कः? सर्वेषां प्रियश्च कः भवति ? हे महर्षे ! पुनश्च स्वाधीनान्तःकरणः(जितेन्द्रियः)को नु वर्तते वा ?क्रोधरहितः कोऽपि विद्यते वा? तेजस्वी(कान्तिसम्पन्नः) असूयाशून्यश्च पुरुषः कः अस्ति ? युद्धभूमौ संजातक्रोधात् कस्मात् च देवाः अपि भीता भवन्ति ? कृपया सूचयतु '- इति पृच्छति।

**नारदस्य समाधानम्**

नारदः त्रिलोकज्ञः,त्रिलोकसञ्चरी, लोकत्रयस्य समाचारम् अयं जानाति।अतः अनुपदम् एव वाल्मीकिम् — 'हे वाल्मीके ! भवता ये गुणाः उक्ताः तेषु बहवः दुर्लभाः। तथापि ज्ञात्वा अहं ब्रवीमि, श्रूयताम् ' इति मानवानाम् अभ्युदयं मनसि निधाय एवं समादधति।

**महापुरुषः श्रीरामः**

स्वाधीनमनाः,महापराक्रमशाली, कान्तिमान्, धैर्यवान्, जितेन्द्रियः महापुरुषः कश्चित् अस्ति।सः इक्ष्वाकुवंशे समुत्पन्नः , जनेषु श्रीरामः इति नाम्ना प्रसिद्धः.। सः प्रशस्तबुद्धिसम्पन्नः (Intelligent) नीतिनिष्णातः,शोभावान्, शत्रुसंहारकः।

**श्रीरामस्य शारीरकाः गुणाः (physical (Structural )Qualities)**

सः शुभलक्षणः । तस्य विशालस्कन्धः,आजानुबाहुः,शंखतुल्यग्रीवः ,प्रशस्तहनुश्च अस्ति । विशालवक्षःस्थलः,मांसलतया पिहितस्कन्धास्थिः,जानुपर्यन्तं लम्बायमानबाहुयुगलः, शोभन शिरस्कः ,सुललाटः ,शोभनगतिशीलश्च । समुचिताकृतिः (नातिदीर्घः नातिक्षुद्रः) अङ्गसौष्ठवसम्पन्नः मनोहररूपः तेजस्वी अभ्युन्नतवक्षस्थलः आयतलोचनः सौन्दर्यसम्पन्नः एवम् अयं शुभलक्षणसम्पन्नः भवति ।

**श्रीरामस्य पालनागुणाः (Administrative Qualities)**

रामः न केवलं रूपवान् .किन्तु गुणवान् अपि अस्ति ! सः धर्मं जानाति। सत्यम् आश्रित्य व्यवहरति । सः प्रजापालनपरः तिष्ठति, यशः वितनुते । सः ज्ञानवान् पालनादक्षः अस्ति । तदीयं

चरितं पावनम् भवति । सः विनयं परिपालयति, योगपरः च तिष्ठति। सः मर्त्यजीवनेऽपि सः धर्मव्यवस्थायाः सर्वथा परिपालकः अस्ति । तस्माद् एकतः तु जीवलोकं रक्षति। तदर्थमेव च अपरतः शत्रुसमूहं विनाशयति । रामः स्वकीयं धर्मं रक्षितुं जानाति । अत एव स्वजनान् रक्षितुम्=गौरवास्पदान् कर्तुम् अपि पारयति ।

**श्रीरामस्य विद्वद्गुणाः (Scholastic Qualities)**

ऋग्-यजु-साम-अथर्वणाख्याः चत्वारो वेदाः।शिक्षा,व्याकरणम्,छन्दः,निरुक्तम्, ज्योतिषम् कल्पश्चेति षट् वेदाङ्गानि च। अयं श्रीरामः वेदानां वेदाङ्गानां तत्त्वं सम्यक् जानाति। शस्त्र विद्यायां धनुर्वेदेऽपि अयं निष्णातः।शास्त्राणां दर्शनानां च मौलिकं तत्त्वं जानाति।श्रुतीनां व्याख्या भूताः स्मृतिग्रन्थाः।तान् सर्वान् अपि अयम् अधीतवान्। रामः प्रतिभासम्पन्नः,अस्य समीचीनं वाक्चा तुर्यम् अपि अस्ति ।

**श्रीरामस्य उदात्तगुणाः (Decent Qualities)**

श्रीरामः सर्वेषां जनानां प्रियम् आचरति। अयं साधुचरितः,सर्वेषु अनुकूलप्रवर्तनः। अदीनात्मा, कदापि दैन्यं न प्राप्नोति।समुद्रः सर्वदा नदीभिः अभिगम्यः भवति तथैव रामः सर्वदा सत्पुरुषैः अभिगम्यः तिष्ठति।सः सर्वसुलभः ,सर्वेषु च तुल्यं व्यवहरति ।सः सर्वावस्थासु प्रियदर्शनः, प्रसन्नवदनः एव भवति, कदापि कोपोद्रिक्तं क्रोधोद्रिक्तं वा मुखं न धरति।

**श्रीरामस्य आत्मोत्कर्षधायकाः गुणाः(Self -Possessive Qualities)**

सः रामः सर्वैः श्रेष्ठपुरुषोचितैः गुणैः संयुक्तः,मातुः कौसल्यायाः सततम् आनन्दं वर्धयति। समुद्र इव गम्भीरः हिमालयवत् धैर्यशाली च वर्तते।पराक्रमविषये विष्णुतुल्यो भवति।आह्लादक रतया दर्शने चन्द्रसमानः भवति।क्रोधविषये प्रलयाग्निसदृशः भवति।सहनविषये भूदेव्या समानः। त्यागविषये कुबेरेण समानः।सत्यविषये यमेन सदृशः भवति।

एवम् श्रीरामः शारीरकगुणसम्पन्नः आत्मगुणसम्पन्नः, पालनगुमसम्पन्न, उदात्तसम्पन्नः विद्वद्गुणसम्पन्नः च सन् आदर्शपुरुषः सम्पन्नः।

## ९.२.२.पितृवाक्यपालनम्-अयोध्यकाण्डकथाभागः

श्रीमद्रामायणम् एकं कुटुम्बकथा काव्यम्। बन्धु - मित्र - पुत्र - कलत्रादीनाम् आदर्शजीवनम् अत्र वर्णितम्। भारतीयानां कुटुम्बेषु पिता प्रधानः भवति। सः कुटुम्बसभ्यानां रक्षणभारं पोषणभारम् आवासभारं च वहति। विद्याबुद्धीश्च बोधयति । हिते च नियुङ्क्ते। अतः कृतज्ञतयाऽपि वा पितरं पूजयन्ति।

किञ्च अयं जन्मदाता। पिता पुत्रस्य सौकर्यसम्पन्नं शरीरं प्रदाय एतल्लोके सुखजीवनायअव काशं कल्पयति। तादृशस्य जन्मदातुः ऋणात् पुत्रः अवश्यं मुक्तः भवेत्। तदर्थं वा पितरि पुत्रेण विनयेन भाव्यम्। "पितृदेवो भव" इति वेदवचनमपि पितरि पुत्रस्य विद्यमानां महतीं बाध्यतां बोधयति।

## सङ्क्षेपरामायणम्

**दशरथस्य सङ्कल्पः**

श्रीरामः दशरथस्य प्रियः सुतः,शौर्यवान् धैर्यवान् औदार्यवान् गम्भीर्यवान् च।किञ्च प्रजानां श्रेयस्साधने रतः।पालनदक्षः। शत्रुसूदनः।दशरथः एवम् आदर्शगुणसम्पन्नं प्रियं ज्येष्ठं पुत्रं श्रीरामं प्रजासंक्षेमं दृष्टौ निधाय युवराजं कर्तुम् अभिलषति। कैकेयी रामस्य यौवराज्याभिषेक संरम्भान् पश्यति। पूर्वं दत्तवरा कैकेयी 'रामः चतुर्दशवर्षपर्यन्तं वने निवसतु, भरतश्च युवराजो भवतु'- इति वरद्वयं राजानं दशरथं पृच्छति। राजा दशरथः सत्यवादी, सत्यप्रतिज्ञः। यथाकथञ्चित् कैकेय्याः वाग्दानं परिरक्षितुकामः ज्येष्ठं प्रियं सुतं श्रीरामं वनं विवासयितुं सिद्धः भवति।

**रामस्य अरण्यगमनम्**

श्रीरामः सततम् उत्साहशीलः। सुख-दुःखकृतं विकारं कदापि नैव भजते।एवं धैर्यवान् रामः पितुः वाक्यपालनाय संसिद्धः भवति। पितुः दशरथस्य आज्ञापालनार्थम्, विमातुश्च कैकेय्याः प्रीतिसम्पादनार्थं च वनाय गन्तुं उद्युक्तः भवति। लक्ष्मणः भ्रातरि सौजन्यं प्रदर्शयति । वनं व्रजन्तं श्रीरामम् अनुगच्छतिं । सीता श्रीरामस्य भार्या।श्रीरामस्य प्राणैः तुल्या। श्रीरामस्य श्रेयोभिलाषिणी। जनकस्य कुले उत्पन्ना ।सर्वलक्षण संयुक्ता।एषा नारीणाम् उत्तमा वधूः भवति।एषा सीता रोहिणी चन्द्रमसम् इव वनं व्रजन्तं श्रीरामम् अनुगच्छतिं ।रामः पितृवाक्यपालनधर्मपरः सन् शृङ्गवेरपुरं प्राप्नोति। तच्च गुहस्य आवासस्थानम्।गुहश्च निषादानां राजा, रामस्य प्रियं मित्रं च। रामश्च शृङ्गवेरपुरे गुहस्य समीपं गच्छति ।

**चित्रकूटस्य प्रवेशनम्**

श्रीरामः सीतया लक्ष्मणेन च गंगातीरं प्राप्नोति। तत्र गुहस्य सहायेन पूर्णजलाः अगाधनदीः तरति। गंगायाः अपरं तटं च प्राप्नुवन्ति। ततः सीतया लक्ष्मणेन च श्रीरामः भरद्वाजस्य आश्रमं सम्पश्यति =Visit करोति। स च तान् चित्रकूटं गन्तुम् आदिशति।चित्रकूटपर्वतप्रान्तः प्रकृत्या मनोहरः भवति। तत्र ते निवासाय सुन्दरं आवसथं निर्मान्ति। ते त्रयः सीतारामलक्ष्मणाः निरातङ्कं निर्बाधं च तत्र सुखेन कालं यापयन्ति ।

**दशरथस्य मरणम्**

ततः अयोध्यायां राजा दशरथः सुतस्य शोकेन भृशं सन्तप्तः भवति। तेनैव च शोकेन' हा प्रियपुत्र, हा श्रीराम' इत्येवं विलपति, प्राणान् त्यजति। राज्यपरिरक्षणाय वसिष्ठप्रमुखाः भरतं राज्याधियकारे नियोक्तुं आदिष्शन्ति।पालनाय आवश्यकं यत् बलम्, तेन सम्पन्नोपि भरतः राज्याधिकारं स्वीकर्तुं न अङ्गीकरोति। प्रत्युत यथाकथंचित् श्रीरामम् अनुनीय आनेतुम् इच्छति । राज्ये तम् एव प्रतिष्ठापयितुम् आत्मविश्वासेन वनं प्रस्थितः भवति।

**भरतस्य विज्ञापनम्**

भरतः चित्रकूटं प्राप्नोति। पितृवाक्यपालनेन,सत्यपराक्रमेण च श्रीरामः गुणाभिरामः सञ्जातः। एतादृशं च श्रीरामं भरतः चित्रकूटे मिलति। भरतः श्रीरामं पूज्यभावनया "धर्मज्ञ ! त्वमेव राज्यभार वहनयोग्यः असि। भवान् एव राज्यं पालयतु "इति च निवेदयति।

**रामस्य पितृवाक्यपालनम्**

श्रीरामः राज्यपालनसमर्थः महाबलः।तथापि केवलं पितुः दशरथस्य आज्ञापालनार्थम् , भरतेन समर्प्यमाणं राज्यं न अङ्गीकरोति। एवम् उभयोः राज्यस्वीकरणे उत्कण्ठा नास्ति। उभौ परस्परं सुहृदौ आदर्शभ्रातरौ। उभयोः मातापित्रोः भक्तिः अस्ति। तस्मिन्नेव समये उभयोः राज्यपालने बाध्यता, प्रजासंक्षेमे निबद्धता च अस्ति। राज्यम् अनाथं कर्तुं उभावपि नेष्टौ। अतः उभौ स्वस्वप्रतिज्ञां पालयन्तावेव राज्यमपि रक्षितुम् आलोचनां कुरुतः ।

श्रीरामः भरताय पादुके ददाति । भरतश्च अयोध्यां न गच्छति, पर्यन्तप्रान्ते नन्दिग्रामे पादुके अभिषिञ्चति ।रामनाम्ना राज्यं पालयति।एतदर्थं श्रीरामः भरतं बहुधा अनुनयति। पादुके दत्वा भरतं प्रेषयति च।

एवं सति, श्रीरामस्य पितृवाक्यपालनम्,राज्ये भरतस्य अनभिषेचनम्,तद्द्वारा भरतस्य सान्त्वनम्, प्रजानां पालनञ्च सम्पादितम् भवति।एवं विफलमनोरथः सन् भरतः रामस्य पादुके स्वीकरोति। नन्दिग्रामे पादुके अभिषिञ्चति ,रामस्य प्रत्यागमनं निरीक्षन् भरतः, राज्यस्य रक्षणं करोति।

भरतः पादुके स्वीकरोति।चित्रकूटात् प्रस्थितः भवति।अयोध्यावासिनां वा पार्श्ववर्तिनां ग्राम्यजनानां वा पुनः पुनरागमनम्, राज्यं स्वीकर्तुं अनुनयनम्,आश्वामनम्,इत्यादिकं श्रद्धया पितुः वाक्यं पालयतः श्रीरामस्य एकाग्रतां नाशयति।अतः सत्यप्रतिज्ञः रामः चित्रकूटम् अन्तरायं चिन्तयति। एवम् आलोच्य रामः सीतया लक्ष्मणेन च सहितः चित्रकूटात् दूरतः दण्डकारण्यं प्रविशति।

## ९.२.३. सीतायाः अपहरणम्

**दण्डकारण्यप्रवेशनम्**

भरतः पादुके स्वीकरोति । चित्रकूटात् प्रस्थितः भवति ।अनन्तरं श्रीरामः अयोध्यावासिनां वा पार्श्ववर्तिनां ग्राम्यजनानां वा पुनः पुनरागमनम्, राज्यं स्वीकर्तुं अनुनयनम्,आश्वामनम्,इत्यादिकं आतङ्कं चिन्तयति। श्रद्धया पितुः वाक्यं पालयतः श्रीरामस्य एकाग्रतां नाशयति।अतः सत्यप्रतिज्ञः रामः चित्रकूटम् अन्तरायं जनयति। एवम् आलोच्य रामः सीतया लक्ष्मणेन च सहितः चित्रकूटात् दूरतः दण्डकारण्यं गच्छति ।

**विराधहननम् -शरभङ्गदर्शनम्**

श्रीरामः कमलनयनः, आयताक्षः। सः सीतया लक्ष्मणेन च सह दण्डकारण्यं प्रविशति।दण्डकारण्यं च महत् भयङ्करम् अस्ति।तत्र विराधनामकः कश्चन निशाचरः वर्तते।सः तत्रस्थान् ऋषिपुङ्गवान् सततं बाधते।अतः श्रीरामः तं हन्ति।दण्डकारण्ये च श्रीरामेण हतः प्रथमः राक्षसः अयम् एव। अनन्तरं च शरभङ्गः कश्चन मुनिः। तस्य च दर्शनं च प्राप्नोति।

**अगस्त्यादीनाम् दर्शनम् - अस्त्राणां स्वीकरणम्**

श्रीरामः सीतया लक्ष्मणेन च सह अगस्त्यस्य आश्रमम् आगच्छति। श्रीरामस्य आगमनेन

अगस्त्यः अमितानन्दभरितः भवति। तस्य समीपे इन्द्रस्य धनुः अस्ति। अक्षयसायकौ तूणीरौ च आस्ताम्। एतौ च महत्वपूर्णौ। प्रभावपूर्णं खड्गं च अपरं किञ्चित् अस्ति।दिव्यानि तानि च अस्त्राणि सर्वाण्यपि दुष्टशिक्षणाय स्वीकर्तुं श्रीरामम् आदिशति।अगस्त्यस्य आदेशं शिरसा वहति । श्रीरामः अस्त्रसमुदायं च स्वीकरोति। दण्डकारण्ये सीतारामलक्ष्मणाः वनचरैः सह निवसन्ति। तत्र तपश्चरन्तः ऋषयश्च सन्ति। तत्रस्थाः राक्षसाः सततं तान् बाधन्ते। ऋषयश्च बाधाः अनुभवन्ति च। परम् इदानीं ते मुनयः श्रीरामं दण्डकारण्ये वासिनं जानन्ति। कदाचित् ते रामस्य समीपम् आगच्छन्ति। राक्षसैः आचरितानि दुष्कृत्यानि निवेदयन्ति,असुररक्षसां वधाय श्रीरामम् अभ्यर्थयन्ति। श्रीरामः महर्षीणां राक्षसेभ्यः अभयं ददाति।ऋषीणां समक्षे श्रीरामः 'युद्धे खरादीन् रक्षसान् अवश्यं हनिष्यामि' इति राक्षसानां वधं च प्रतिज्ञास्यति ।

**शूर्पणखायाः विरूपणम्**

श्रीरामः सीतया लक्ष्मणेन च सह दण्डकारण्य एव निवसति।दण्डकारण्यैकदेशे जनस्थाननामकं स्थानं किञ्चित् अस्ति।शूर्पणखानाम्नी राक्षसी काचन तत्र निवासं कुर्वती अस्ति।सा च रावणस्य भगिनी।कामरूपिणी,स्वेच्छया नानाविधरूपधारिणी भवति।शूर्पणखा कदाचित् रामलक्ष्मणौ पश्यति।रामं लक्ष्मणं च वृणोति। लक्ष्मणः शूर्पणखायाः नासिकां श्रोत्रे च छिनत्ति। तां विकृतरूपां करोति। तेन सा विरूपिणी भवति।

**राक्षसानां विहननम्**

शूर्पणखा स्वस्याः कर्णयोः नासिकायाश्च छेदनवृत्तान्तं राक्षसबन्धुभ्यः निवेदयति। ते च कोपेन उद्रेकिणः भवन्ति। शस्त्राणि अस्त्राणि च धरन्ति । रामम् अभिगच्छन्ति। शूर्पणखायाः अश्रुवचनैः सर्वे राक्षसाः क्रोधेन उद्रिक्ताः भवन्ति। तेषु खर-दूषण-त्रिशिरसः प्रमुखाः।तान्,तेषाम् अनुयायिनश्च श्रीरामः युद्धे संहरति।एवं जनस्थाने श्रीरामेण चतुर्दशसहस्रं राक्षासकुलं निहतं भवति ।

**रावणस्य क्रोधनम्**

खरः रावणस्य बन्धुः। दूषणः रावणस्य दायादः।त्रिशिरः रावणस्य ज्ञातिः।एवम् एते सर्वे अपि रावणस्य बान्धवाः एव भवन्ति। एते सर्वे च रामेण निहताः।खरप्रभृतीनां बन्धूनां वधं निशम्य रावणः क्रोधेन मूर्च्छितः भवति।प्रतीकारं कर्तुं च सङ्कल्पितः भवति। सीतायाः अपहरणे मारीचं सहायं याचति। मारीचश्च 'हे रावण ! बलशालिना रामेण तव कलहः नैव उचितः , यतः अहं पूर्वं कदाचित् रामबाणक्षिप्तः सन् विश्वामित्रस्य आश्रमात् सागरपारे पातितः। अत्र भवता साहसः नैव कर्तव्यः' इत्येवं भूयः भूयः रावणं वारयति। तथापि कालेन प्रेरितः सन् रावणः मारीचस्य वचनम् न स्वीकरोति। सीताम् अपहर्तुं तेन सह रामस्य निवासस्थानं गच्छति।

**सीतायाः अपहरणम्**

राक्षसाः कामरूपिणः । मायया यत् रूपम् इच्छन्ति तत् रूपम् प्राप्नुवन्ति।मारीचः कनकमृगस्य रूपं धरति। श्रीरामादीनां निवासप्रान्ते भ्रमति। तत्र च सीता कनकमृगम् अभिलषति। सीतायाः

अभिलाषं साधयितुं श्रीरामः कनकमृगम् अनुधावति। मारीचः मायया रामं दूरं नयति। अत्रान्तरे रावणः भिक्षुरूपेण आगच्छति । सीताम् अपहरति। जटायुः रावणात् सीतां मोचयितुं उद्युक्तः भवति।तस्य च पक्षौ छिनत्ति । सीतां गृह्णाति । रावणः लङ्काभिमुखं प्रस्थास्यति।

**श्रीरामस्य विलपनम्**

श्रीरामस्य सहनं हीनं भवति। बाणेन मारीचं निहन्ति। मारीचः श्रीरामस्य कण्ठध्वनिम् अनुकुर्वन्, "हे !सीते ! हे !लक्ष्मण !"इति आर्त्या आह्वयन् प्राणान् त्यजति। आर्तनादं श्रुत्वा रामः मायाम् अवगच्छति।स्वाश्रमं प्रति निवर्तते। मध्ये च लक्ष्मणं पश्यति। मनसि भयम् आवृतं भवति। रामलक्ष्मणौ पञ्चवट्यां सीताम् न पश्यथः। श्रीरामः भयेन विह्वलः भवति।इतस्ततः सीतामन्विष्यति् क्षतगात्रं जटायुषं पश्यति। निश्चेष्टं मृतम् इव अवलोक्य तन्मुखादेव सीतां रावणेन हृतां शृणोति।शोकेन विलपति। जटायुः श्रीरामाय रावणस्य सीतापहरणवृत्तान्तं निवेद्य मृतः भवति।तस्य च दहनसंस्कारान् आचरति।

**कबन्धस्य हननम् -**

अनन्तरं सीतायाः अन्वेषणाय उद्युक्तः भवति। कबन्धं पश्यति सः च कश्चन राक्षसः। अतिभयङ्कराकारः। विकृतदर्शनश्च। श्रीरामः आजानुबाहुः,सः आकर्णान्तं शरं सन्धाय प्रतापेन कबन्धं हन्ति। कबन्धश्च दिव्यदेहं प्राप्नोति।सः च कश्चन दिव्यगन्धर्वदेहधारी।श्रीरामस्य प्रहरणेन शापमुक्तः भवति।स्वर्गं गन्तुम् इच्छति।मृतं देहं अग्निना संस्कर्तुं श्रीरामं प्रार्थयति।तस्य प्रार्थनया श्रीरामश्च कबन्धस्य मृतदेहम् अग्निना संस्करोति। सः प्राणान् त्यजन् -हे राम !शबर्याः समीपं गच्छतु सा तपस्विनी, धर्मम् आचरति।श्रमणधर्मम् अनुतिष्ठति,तत्र भवन्तं द्रष्टुं निरीक्षते 'इति रामम् कथयति।

**शबर्याश्रमस्य गमनम्**

श्रीरामः कबन्धस्य वचनात् शबर्याः सकाशम् उपगच्छति। सा च तदेकमनस्कतया श्रीरामम् एव ध्यायन्ती अस्तिं पुण्यवशात् समीपम् आगतं श्रीरामं पश्यति। परवशा भवति। श्रद्धया अर्चयति।। यथाविधि अत्यादरेण सत्करोति ।

## ९.२.४.राम - सुग्रीवयोः अग्निसाक्षिकं सख्यम् -किष्किन्धकाण्डकथाभागः

**सुग्रीवेण रामलक्षणयोः सङ्गमनम्**

लक्ष्मणेन सह श्रीरामः कबन्धं हन्ति । शबरीम् अनुगृह्णाति। पम्पासरोवरं प्राप्नोति। हनुमान् कपिश्रेष्ठः,बुद्धिबलसम्पन्नः, विवेकी च। सः पम्पातटम् आगच्छति। श्रीराम लक्ष्मणयोः वृत्तान्तं जानाति।स च सोदरद्वयं प्रभावपूर्णं चिन्तयति। हनुमान् श्रीराम -लक्ष्मणाभ्याम् सुग्रीवस्य कृते श्रेयः सम्पादनाय चिन्तयति। श्रीरामं च कष्टापन्नं च जानाति।हनुमान् श्रीरामलक्ष्मणौ आश्वसिति। सुग्रीवेण सङ्गमयति च। रामः आदितः स्वीयं वृत्तान्तं सुग्रीवाय कथयति । विशिष्य सीतायाः अपहरणम् विस्तारेण च निवेदयति।

**राम - सुग्रीवयोः अग्निसाक्षिकं सख्यम्**

सुग्रीवः अग्रजेन वालिना,विरुध्यति । स्वयं कष्टानि आप्नोति। सः कष्टकालिकीं बाधां जानाति, पर कष्टाभिज्ञः अपि भवति।अतः सुग्रीवोऽपि रामस्य सकलं वृत्तान्तं श्रद्धया शृणोति। श्रीरामस्य कष्टानि ज्ञात्वा सुग्रीवः सानुभूतिपरः=आकृष्टमनस्कः भवति । अग्निं प्रज्वाल्य ,तत्समक्षे सुग्रीवः श्रीरामेण सह अग्निसाक्षिकं स्नेहं च करोति।

एवं राम-सुग्रीवयोः मध्ये मैत्री भवति । तयोश्च प्रत्येकतः स्वं स्वं कष्टम् अस्ति।अन्योन्यसहायेन कष्टानि तर्तुं सिद्धौ भवतः।श्रीरामः सुग्रीवस्य कष्टस्वरूपं पृच्छति।सुग्रीवश्च — आवाम् वालि-सुग्रीवौ सोदरौ। ताराकारणतः आवयोः वैरं जातम् । वाली बलसम्पन्नः। प्राणान् अपि हरति।प्राणभीत्या ऋष्यमूकम् आगतः।अहम्-मदीयः अल्पः परिवारश्च इदानीं अत्र (ऋष्यमूके)तिष्ठति- इति सप्रणयं सबाधं वालिनः वैरम् उद्दिश्य श्रीरामाय निवेदयति । श्रीरामः अपि स्पन्दते । अनन्तरं श्रीरामः वालिनः वधं प्रतिज्ञास्यति।

**वालिनः बलस्य प्रख्यापनम्**

परन्तु वालिनः वधस्य सम्पादने,श्रीरामस्य तादृशं सामर्थ्यम् अस्ति वा न वा सुग्रीवः नित्यं शङ्कितः भवति। अवसरं कल्पयित्वां सुग्रीवः--वालीबलसम्पन्नः।सः कुक्षौ गृहीत्वा अरिभयङ्करं रावणम् एव चतुस्समुद्रान् भ्रामयति-- इत्येवं वालिनः बलं पराक्रमं च उद्दिश्य श्रीरामाय निवेदयति।एवं सुग्रीवः परोक्षतः श्रीरामस्य बलं ज्ञातुम् उत्सुकः भवति।

पुनः अपि वालिनः पराक्रमं प्रस्तावयति। "दुन्दुभिः कश्चन राक्षसः, भयङ्कराकारः। महाकायः, पर्वतसन्निभः। सः वालिना हतः। तस्य देहः अयम्, पतितः अस्ति।पश्यतु भवान्"इति सुग्रीवः दुन्दुभेः राक्षसस्य अस्थिमात्रावशिष्टं निहतं शरीरं दर्शयति।

**श्रीरामस्य स्वीयबलप्रदर्शनाय उपक्रमणम्**

श्रीरामः अपि सुग्रीवस्य आन्तर्यं जानाति। वालिनः बलपराक्रमादिकं प्रति अवगाहनापरः भवति। सुग्रीवस्य स्वसामर्थ्यं प्रति विश्वासं जनयितुं सिद्धः भवति। सुग्रीवेण प्रदर्शितं दुन्दुभेः निहतं कायम् =अस्थिसमुदायं पश्यति।स्मितं करोति। तत् एतत् अकिञ्चित्करं चिन्तयति। तत् अस्थिपञ्जरं पादाङ्गुष्ठेनैव दशयोजनपरिमितं दूरं निक्षिपति।

श्रीरामः, स्वसामर्थ्यं प्रति सुग्रीवस्य विश्वासजननाय ,दुन्दुभेः अस्थिपञ्जरस्य दूरतः निक्षेपणेन तृप्तः न भवति।किञ्च क्रमशः सप्त तालान्,एकं महापर्वतं च एकेन एव बणेन प्रहरति ,युगपदेव पातालं प्रापयति। सुग्रीवः श्रीरामस्य भुजबलपराक्रमं जानाति।ततो सुग्रीवस्य श्रीरामे विश्वासश्च अधिकं जायते।

**किष्किन्धायाः गमनम्**

दुन्दुभेः अस्थिपञ्जरस्य प्रक्षेपेण, सप्ततालभेदनेन च श्रीरामस्य सामर्थ्यं प्रति सुग्रीवस्य विश्वासः जातः।परस्परं श्रीराम-सुग्रीवौ विश्वासपूर्णौ च जातौ। प्रीतमनस्कौ च भवतः। अनन्तरं महाकपिः सुग्रीवः अपि प्रसन्नः भवति, वालिनं योद्धुं सिद्धः भवति। श्रीरामेण सह किष्किन्धायाः गुहां गच्छति।

सः गुहाम् एत्य वालिनं युद्धाय प्रेरयन् घनं गर्जति। वाली अपि सुग्रीवस्य प्रेरकं गर्जनं श्रुत्वा युद्धाय सिद्धः भवति।

**वालिनः संहरणम्**

तारा 'सुग्रीवस्य रामेण सह मैत्री जाता। इदानीम् अयं रामस्य सहायम् आप्तः। अतः सुग्रीवः इदानीं जेतुं न शक्यः।तस्मात् त्वया न गन्तव्यम् ''इत्येवं बहुधा वालिनं निवारयति। वाली नैव शृणोति। ताराम् एव आश्वासयति, अनुनयति ।एवं स्वपत्न्याः तारायाः वचनम् अपि अगृहीत्वा वाली सुग्रीवेण सह योद्धुं सिद्धः भवति । तत्र किष्किन्धाकन्दरायां वालि-सुग्रीवौ परस्परं युध्यतः।तयोः महान् युद्धः प्रचलति। युद्धे सुग्रीवः किञ्चित् बलहीनः भवति। तदवगत्य श्रीरामः एकेनैव बाणेन वालिनं प्रहरति।तेन वाली निहतः भवति।

**राज्ये सुग्रीवस्य प्रतिष्ठापनम्**

श्रीराघवः युद्धे वालिनं हन्ति। प्रतिज्ञातं च साधयति ।वाग्दत्तम् पालयन् सुग्रीवम् एव राज्ये प्रतिष्ठापयति ।सुग्रीवः रामस्य सहायेन वालिनः पीडातः विनिर्मुक्तः भवति। वालिनः वधानन्तरं सुग्रीवः किष्किन्धाराज्ये अभिषिक्तः भवति । समनन्तरम् एव वानरश्रेष्ठो राजा सुग्रीवः निजराज्यवर्तिनः सकलान् वानरान् आह्वयति । सीतायाः अन्वेषणार्थं सर्वासु दिक्षु प्रेषयति च।

## ९.२.५.सीतायाः अन्वेषणम्-सुन्दरकाण्डकथाभागः

**हनुमतः समुद्रोल्लङ्घनम्**

हनुमान् वायुसुतः।उल्लङ्घने समर्थः महाबलसम्पन्नः।सम्पातिः जटायुषः ज्येष्ठभ्राता, दशरथस्य मित्रं च। स च लङ्काधिपेन रावणेन सीता अपहृता इति वानराणां समाचारं ददाति। तस्य वाक्यं श्रुत्वा सीतां अन्वेष्टुकामः हनुमान् शतयोजनविस्तीर्णं समुद्रं लङ्घयति।

**सीतायाः दर्शनम्**

हनुमान् सागरं तरति।लङ्कापुरीं प्राप्नोति।लङ्कापुरीं च रावणः पालयति । हनुमता सर्वा च लङ्का सीतायै शोधिता। कुत्रापि सीता न दृष्टा। सीता अशोकवने स्थिता। सा राक्षसैः परिवृता भयकम्पिता अस्ति। मनसा श्रीरामम् एव चिन्तयन्ती अस्ति । हनुमान् एवं दुःखितां रामसंसक्तमानसां सीतां अन्ततः अशोकवने पश्यति ।

**अभिज्ञानस्य प्रदानम्**

अशोकवने सीता, हनुमन्तं राक्षसमाया इति बिभेति। हनुमान् अपि विश्वासं जनयितुं परिचायकं श्रीरामस्य अङ्गुलीयकं सीतायै समर्पयति। सुग्रीवेण श्रीरामस्य सख्यं निवेदयति। सीता हनुमद्द्वारा आत्मीयं श्रीरामस्य वृत्तान्तं शृणोति। प्रकामं खिन्ना भवति। दुःखितां सीतां च आश्वासयति।स्वस्य आगमनं राक्षसानां ज्ञापयितुम् अशोकवाटिकाद्वारं भञ्जयति ।

**सेनानायकानां हननम् - लङ्कायाः दहनम्**

हनुमान् अमितबलपराक्रमसम्पन्नः।हनुमान् एकाकी एव पिङ्गलनेत्रादीन् उग्रान् पञ्च सेनापतीन्

हन्ति । जाम्बमाल्यादीन् सप्त सचिवसुतान् हन्ति। अक्षयकुमारं रावणतनयञ्च हन्ति। ब्राह्मणः प्रतिष्ठारक्षणाय मेघनादेन प्रयुक्तस्य ब्रह्मास्त्रस्य तु बन्धितः भवति। तद्व्याजेन रावणस्य सभां प्रविशति। रावणेन विवदते। रावणश्च हनुमतः लाङ्गूलं वह्निना योजितं कर्तुं आदिशति । हनूमतः लाङ्गूलं च वह्निना योजितं भवति । सीतानिवासस्थानं अशोकवनम्,विभीषणनिवासस्थानं च विहाय,सर्वां लङ्कां प्रदहति। अनन्तरं रामाय सीता दर्शनप्राप्तिरूपां शुभवार्तां् निवेदयितुं प्रतिनिवृत्तः भवति। हनुमान् लङ्कातः किष्किन्धां प्रति आगच्छति । रामं सम्मिलति। तम् नमस्करोति। वस्तुतः 'सीता दृष्टा'इति सीतादर्शनवृत्तान्तं श्रीरामाय निवेदयति।

## ९.२.६.रावणस्य संहरणम्-युद्धकाण्डकथाभागः (७९-८९)

### समुद्रस्य क्षोभणम् - सेतुबन्धनम्

श्रीरामः हनुमद्द्वारा सीतासमाचारं जानाति । अनुपदमेव सुग्रीवेण रावणस्य वधं प्रति चर्चां निर्वहति । सुग्रीवश्च वानरासेनां सन्नद्धीकरोति। एवं श्रीरामः सुग्रीवसहितः सन् सागरतीरम् ससैन्यम् उपस्थितः भवति। सेतुबन्धनाय च उद्यमितः भवति। चिराय अपि समुद्रः न सहकुरुते। तेन क्रुद्धः श्रीरामः तीक्ष्णैः बाणैः तम् आपातालम् आकुलीकरोति। श्रीरामः एकेनैव तीक्ष्णेन बाणेन समुद्रं व्यथितं करोति ।समुद्रः श्रीरामस्य कोपेन भीतः भवति ।अनुपदमेव सः शरीरं धरति ।विनयेन आत्मानं रामाय दर्शयति। सेतुबन्धनाय सहकारं प्रतिजानाति। समुद्रस्य सहकारवचनेन वानरसैन्यं सन्तुष्यति। नलश्च कपिश्रेष्ठः । महान् आरचकः( Engineer) श्रीरामस्य समक्षे नलः सेतुं च निर्माति।

### रावणस्य संहरणम्

श्रीरामः ससैन्यं तेन सेतुना लङ्काम् गच्छति। रावणसैन्यं मथ्नाति ।युद्धे सामात्यपुत्रबान्धवं रावणं हन्ति। परसदनं प्राप्तां सीतां पश्यति। दशाननस्य भवने स्थितायाः सीतायाः स्वीकारे लोकापवादभीत्या लज्जावशः= अवमानभरितः, भवति । सर्वसमक्षं सीतां परुषं भाषते ।आत्मनः पवित्रतां प्रकटयितुं च पृच्छति। सीता च महासाध्वी। रामादन्यं न चिन्तयति । सीता श्रीरामस्य निष्ठुरवचनं शृणोति ।परम् असहमाना भवति ।आत्मनः पवित्रातां प्रकटयितुं संसिद्धा भवति। अग्निं प्रविशतुम् इच्छति । अग्निं प्रविशति च। एवं सीता आत्मनः पवित्रतां पातिव्रत्यं च निरूपयति। अग्निशिखाः सीतां किमपि कर्तुं न पारयन्ति। अग्निः स्वयं पावनीं सीतां हस्ताभ्यम् आददाति ।शिखाभ्यः बहिः आगच्छति। श्रीरामं प्रति 'हे राघव !इमां विशुद्धां जानीहि । निष्पापाम् इमां सीतां गृह्णातु' इति वदति। सीतायाः अग्नौ परीक्षणं पवित्रम् आदर्शभूतं च कर्म भवति। सीतारामौ उभौ अपि तदनुष्ठाय लोकस्य आदर्शदम्पती भवतः। आदर्शदम्पत्योः सीतारामयोः अनेन महत्कर्मणा चराचरजगत्सर्वं सन्तुष्यति। सकलाश्च ऋषिगणाः देवगणाश्च प्रीताः भवन्ति ।सीतां श्रीरामं च अभिनन्दन्ति।

### लङ्काराज्ये विभीषणस्य प्रतिष्ठापनम्

सीतायाः अग्निप्रवेशाय, सीतायाः विगतकल्मषताज्ञापनाय, अग्निवचनात् सीतायाः स्वीकरणाय

च सकलाः देवताः श्रीरामम् अभिनन्दन्ति। श्रीरामश्च सीतां प्राप्नोति। परमानन्दभरितः भवति। तस्मिन् एव आनन्दसमये श्रीरामः लङ्काराज्ये रावणस्य अनुजम् विभीषणम् अभिषेचति। श्रीरामः विभीषणस्य अभिषेचनाय, प्रतिज्ञापालनाय च आत्मानं चरितार्थं भावयति। विगतज्वरश्च (TENSION FREE MINDED )भवति। श्रीरामः सन्तुष्टान्तरङ्गश्च भवति।

**श्रीरामस्य अयोध्याप्रस्थानम्;**

श्रीरामः कण्टकिनं रावणं हन्ति,लोककल्याणं च आचरति।देवगणास्सर्वे श्रीरामं अभिनन्दन्ति, पूजयन्ति च। देवाश्च शिष्टरक्षकाय श्रीरामाय वराञ्च प्रयच्छन्ति। श्रीरामः तैः वरैः युद्धे निहतान् वानरान् सजीवान् करोति। अनन्तरं च सुग्रीव-अङ्गद जाम्बवत्-विभीषणादीन् अयोध्याम् आह्वयति। ते च अङ्गीकुर्वन्ति। पूर्वं कुबेरं विजित्य रवणेन प्राप्तं पुष्पकं विमानं किञ्चित् अस्ति।सुहृद्भिः परिवृतः सन् श्रीरामः तेन विमानेन अयोध्यां प्रस्थितः भवति।पूज्यपूजाव्यतिक्रमणं मास्तु इति ,मध्ये मार्गे भरद्वाजस्य महर्षेः आश्रमं अवतरति।

**श्रीरामस्य नन्दिग्रामस्य प्रयाणम्**

श्रीरामः आश्रमे भरद्वाजस्य महर्षेः दर्शनम् आचरति।योगक्षेमादिकम् पृच्छति । भरद्वाजाय स्वीयवृत्तान्तं निवेदयति । आशीश्च गृह्णाति। समयाभावकारणतः भवति । अनुपदम् एव पुनः श्रीरामः सुग्रीव-विभीषणादिभिः परिवृतः सन्, पूर्वारूढमेव पुष्पकं समारोहति ।अत्रान्तरे भरतः नन्दिग्रामे अनागमनं विशङ्क्य प्राणत्यगाय सिद्धो भवतीति विचिन्त्य, स्वप्रत्यागमनस्य निवेदनाय वेगवन्तं हनुमन्तं भरतस्य सकाशं प्रेषयति च। अनन्तरं ते सर्वे सविनोदं परस्परं युद्धविषयान् सल्लपन्ति। एवं श्रीरामः हनुमतः गमनानन्तरमेव,भरतस्य प्रतिज्ञातं पालयन् , तात्कालिकं भरतस्य निवासस्थानं नन्दिग्रामं प्राप्नोति ।

**भरतात् राज्यस्वीकरणम्**

पितुः आज्ञां पालयति। अरण्यं गच्छति । तत्र ऋषीणाम् अभ्यर्थनया दुष्टशिक्षणं करोति।एवं स्वधर्मानुष्ठनेन, प्रतिज्ञातस्य पालनेन च श्रीरामः परिशुद्धस्वभावः सम्पन्नःभवति।श्रीरामः नन्दिग्रामं प्राप्नोति।जटाः विसृजति।सुवस्त्रादिभिरलङ्कृतः भवति। वामभागे सीताम् उपवेशयति। भरतलक्ष्मणशत्रुघ्नैः परिवृतः भवति। एवम् आप्तानां, पुरोहितानां, मन्त्रीणां मित्राणां च समक्षे जीवनदीनां जलसेचनपुरस्सरं वेदमन्त्रोच्चारणमध्ये श्रीरामः भरतात् राज्यभारं स्वीकरोति।

## ९.२.७.श्रीरामराज्यप्राशस्त्यम्

**सुखमयं शान्तिपूर्णं च रामराज्यम्**

श्रीरामः रावणस्य वधानन्तरं सुग्रीवादिभिः साकम् अयोध्याम् आगच्छति। भरतात् राज्यभारं स्वीकरोति । राज्ये च अभिषिक्तः भवति। तस्य राज्यपालनाकाले सर्वे च सुखिनः भवन्ति। सन्तोषिणश्च भवन्ति । क्रमशिक्षणयुताश्च भवन्ति। बलवर्धिताः सन्तः निरामयाःजीव न्ति। अतिवृष्टिः न भवति अनावृष्टिः अपि न भवति।

**भद्रजीवनं रामराज्यम्**

## सङ्क्षेपरामायणम्

श्रीरामस्य राज्यपालनकाले पुरुषाः, स्त्रियश्च स्वस्वधर्मेषु रताः सन्ति। क्रमशिक्षणयुताः च भवन्ति। अतः सर्वे पुण्यशलिनः जायन्ते। अत एव पुण्यफलं भद्रम् एव प्राप्नुवन्ति। कदाचित् अपि, कुत्रचिदपि पितरः अशुभं पुत्रमरणं न पश्यन्ति। नार्यश्च पति सेवापराणास्सत्यः निरन्तरं सौभाग्यवत्यो जीवन्ति। भर्तुः मरणं नैव पश्यन्ति। कदाचिदपि वैधव्यं न प्राप्नुवन्ति।

**उपद्रवरहितं रामराज्यम्**

यथा राजा आदर्शो भवति तथा प्रजाः अपि नीतिसम्पन्नाः भवन्ति।यदि राजा दुष्टः तदा प्रजाः अपि दुरालोचनपराः ,पापकार्याचरणशीलाः च भवन्ति। प्रजानां पापकार्याचरणं प्रकृतेः भारजनकं भवति। दुरालोचनं नाम मनः कालुष्यं भवति। पापकार्याचरणं नाम कर्म कालुष्यं भवति। तच्च उपद्रवावान् कल्पयति। तदा भूकम्पः,जलप्रलयः, वायुगुण्डम् इत्यादिकं भवति। प्रकृते श्रीरामस्य राज्यपालनाकाले प्रजानां मनस्सु कर्मसु वा कालुष्यं नास्ति। प्रकृतेः समतोलनं नष्टं न भवति।उपद्रवाश्च न भवन्ति।अत एव अग्नेः वा, जलात् वा, वायोः वा उपद्रवा न भवन्ति। भीतिश्च नास्ति।

**कर्मशीलं रामराज्यम्**

रामराज्ये क्षुधादिबाधा कापि नास्ति। क्षुत्पीडानिवारणार्थं कुत्रापि पौराः पथिकान् न ताडयन्ति। धन-कनक-वस्तु-वाहनादिकं न चोरयन्ति। पत्तनानि,पुरः, नगराणि सततं सस्य श्यामलानि वर्तन्ते। धनसमृद्धानि धान्यसमृद्धानि च भवन्ति। एवं तत्र चौर्याय अवसरो नास्ति। चोराणां च प्रसक्तिरेव नास्ति।

**यज्ञ-यागाद्यनुष्ठापकं रामराज्यम्**

श्रीरामः अश्वमेधयज्ञान् शतशः आचरति। ते बहु आयाससाध्याः, अधिकधनव्ययेन आचरणीयाश्च भवन्ति। तस्मिन् एव सन्दर्भे प्रतिभायुत्पन्नानां ब्राह्मणानां कोटिशः गावः दानरूपेण समर्पयति। विप्रेभ्यः धन-कनक-वस्तु- वाहनादिरूपं द्रव्यं च बहुशः ददाति।

**विकेन्द्रीकरणकं रामराज्यम्**

श्रीरामः परिपालनदक्षः। प्रजानां सौख्यं तस्य प्रधानम्।तदर्थं अधिकारं च विकेन्द्रीकरोति्। यथावसरं बहूनि राजकुलानि स्थापयति । तैः प्रजानां संक्षेमकार्यक्रमान् अनुतिष्ठति। चातुर्वर्ण्यं च स्व स्व कार्येषु नियमयति।सामाजिकजीवनं समरसं च करोति। श्रीरामः दशशतानि =1000 + दशसहस्राणि =10,000 वर्षाणि, आहत्य एकादशसहस्रवर्षाणि यावत् राज्यं पालयति। अनन्तरं परब्रम्हणः लोकं= विष्णुसायुज्यं वैकुण्ठ च गच्छति। अवतारं च समापयति।

**श्रीमद्रामाणप्राशस्त्यम्**

**दुरालोचननाशकं श्रीमद्रामायणम्**

श्रीमद्रामाणम् दुरालोचनं अपनुदति। साधु चिन्तनं वर्धयति। अतएव यः कोऽपि नरः श्रद्धया श्रीमद्रामाणम् पठति तस्य बुद्धिः वर्धते। विवेकश्च जायते। परिशुद्धश्च भवति।अपि च अत्र वेदवेद्यस्य श्रीरामस्य सुचरितं वर्ण्यते। तत् च सर्वदुःखहरं भवति। एवम् इदं वेदार्थप्रतिपादकस्य

मूलरामायणस्य पठनम् सर्वपापविमोचकं भवति।

**कुटुम्बजीवनविधानज्ञापकं श्रीमद्रामायणम्**

रामायणस्य पठनम्, श्रवणं च बुद्धिप्रदं विवेकवर्धकं च। विवेकेन जीवनसाफल्यं आनन्दश्च जायते। आनन्देन आरोग्यम्, तेन च आयुष्यं सम्पद्यते। एवम् रामायणं आयुःकारकं भवति। बन्धु-मित्र-पुत्र-कलत्रैः साकं अस्याः कथायाः सल्लापनेन , इह उत्तमजीवनम् मरणानंतरम् स्वर्गवासः च लभ्यते।

**चतुर्वर्गफलप्रदं श्रीमद्रामायणम्**

ब्राह्मणः यदि इदं रामायणं पठति तदा सः वाग्मी भवति । यदि क्षत्रियः पठति तदा असौ साम्राज्यं प्राप्नोति। यदि वैश्यः पठति तदा स बहुधनं लभते। यदि शूद्रः पठति तदा सर्वत्र सन्मानितो भवति ।एवम् श्रीमद्रामायणं चतुर्णां वर्णानां अभ्युदयप्रदायकं भवति।

## ९.३ .उपसंहारः

एवं पाठ्यांशस्य सङ्क्षेपरामायणस्य सर्वे व्यासात्मकाः प्रश्नाः अवगताः भवन्ति। प्रत्येकतःएकैकस्य काण्डस्य कथांशोपि ज्ञातः भवति।वाक्यरचनाविधानम् अधिगतं भवति। संस्कृतभाषायां चिन्तनम् अभ्यस्यति।आत्मविश्वासपूर्वकं विंशति अङ्कान् अधिगच्छति च।

## ९.४ .अभ्यासः

अ) संक्षेपरामाणस्य सारांशं लिखत ?

इ)श्रीरामगुणानां वैभवं कीदृशम्- लिखत ?

# अंशः-X; संक्षेपरामयणम् - सन्दर्भवाक्यानि

१०.०.परिचयः

१०.१.लक्ष्याणि

१०.२.सन्दर्भवाक्यानि

१०.२.१.महर्षे त्वं समर्थोऽसि ज्ञातुमेवंविधं नरम्।

१०.२.२.मुने वक्ष्याम्यहं बुद्ध्वा, तैर्युक्तः श्रूयतां नरः।

१०.२.३.वेदवेदाङ्गतत्त्वज्ञो धनुर्वेदे च निष्ठितः ।

१०.२.४.विवासनं च रामस्य भरतस्याभिषेचनम् ।

१०.२.५.राजा दशरथः स्वर्गं जगाम विलपन् सुतम् ।

१०.२.६.त्वमेव राजा धर्मज्ञ इति रामं वचोऽब्रवीत् ।

१०.२.७.अगस्त्यवचनाच्चैव जग्राहैन्द्रं शरासनम् ।

१०.२.८.प्रतिज्ञातश्च रामेण वधः संयति रक्षसाम् ।

१०.२.९.न विरोधो बलवता क्षमो रावण तेन ते ।

१०.२.१०.चकार सख्यं रामेण प्रीतश्चैवाग्निसाक्षिकम् ।

१०.२.११.निजघान च तत्रैनं शरेणैकेन राघवः ।

१०.२.१२.ददर्श सीतां ध्यायन्तीम् अशोकवनिकां गताम् ।

१०.२.१३.रामाय प्रियमाख्यातुं पुनरायान्महाकपिः।

१०.२.१४.रामः सीतामनुप्राप्य परां व्रीडामुपागमत् ।

१०.२.१५.कृतकृत्यस्तदा रामो विज्वरः प्रमुमोद ह ।

१०.२.१६.न चाग्निजं भयं किञ्चिन् नाप्सु मज्जन्ति जन्तवः।

१०.३ उपसंहारः.

१०.४ अभ्यासः

## १०.०.परिचयः

Diploma in Sanskrit Examination मध्ये , आहत्य पञ्च पत्राणि सन्ति। तत्र इदं द्वितीयं परीक्षापत्रम्। अस्य च शतं १०० अङ्काः भवन्ति। अत्र च विषयद्वयं भवति। सङ्क्षेपरामायणम् एको विषयः, रघुवंशः-द्वितीयसर्गः अपरः। उभयत्रापि सन्दर्भव्याख्यानात्मकः कश्चन प्रश्नः भवति। प्रकृते सङ्क्षेपरामायणम् इति पाठ्यांशे चतुर्णां मध्ये द्वयोः सन्दर्भव्यख्यानं समाधातव्यम् अस्ति। एकैकस्य कृते पञ्च इति कृत्वा शतं 2x5=10 अङ्काः वर्तन्ते। एतत्प्रश्नस्य समाधानलेखनाय कृते अपेक्षितः अभ्यासः अत्र भवति।

## १०.१लक्ष्याणि

विद्यर्थिनः सामान्यतः आमूलाग्रं पाठ्यांशस्य अध्ययनं कुर्वन्ति। यत्र कुत्रापि भवतु, यत्किमपि वा भवतु ,सर्वं प्रश्नार्हम् एव,सर्वम् अपि अवश्यं समाधेयं च भवति। तत्र अधीते विषये कुत्रचित् स्थितस्य कस्यचन वाक्यस्य संक्षिप्तविवरणं दातुं पृच्छन्ति।तदेव सूक्ष्मतया सन्दर्भव्याख्यनं भवति।तस्य च विवरणं वाक्यस्य परिचयः,वाक्यस्य सन्दर्भः,वाक्यस्य अर्थः,वाक्यस्य भावः इत्येवं चतुर्भिः उपशीर्षकैः लिख्यते।तत्र - वाक्यस्य परिचयः;अत्र ,वाक्यं कस्मिन् पाठ्यांशे वर्तते,तस्य मूलग्रन्थस्य नाम किम् , मूलग्रन्थरचयितुः नाम किम्, तेन कृतं साहित्यस्यसेवनम् कीदृशम्,.संस्कृतसाहित्ये तस्य प्रसिद्धिः का ,इत्येवमादिकं लिख्यते।

वाक्यस्य सन्दर्भः; केन एतत् (वाक्यम्)उक्तम्, कम् प्रति एतत् उक्तम् ,कस्मिन् सन्दर्भे एतत् उक्तम् इत्यादिकं समाचारम् अत्र दीयते।

वाक्यस्य सन्दर्भः; सन्दर्भव्यख्यानाय प्रत्येकं दत्तस्य वाक्यस्य प्रतिपदार्थः दीयते। वाक्यस्य भावः; दत्तस्य वाक्यस्य सम्पूर्णः भावः सन्निवेशविवरणपूर्वकं दीयते। एतत् पाठ्यांशस्य अध्ययनेन -

अ) संस्कृतभाषायां लेखनकौशलं वर्धितं भवति।
इ) संस्कृतभाषायां रचनाकौशलं सम्पादितं भवति।
उ) संस्कृतभाषायाम् आलोचनायै प्रेरणं दत्तं भवति।
ऋ) परीक्षादृक्पथं अभ्यसितं भवति,आर्जितं च भवति।
ए) सङ्क्षिप्तविवरणदानाय कौशलं साधितं भवति।

## १०.२.सन्दर्भवाक्यानि

### १०.२.१.महर्षे त्वं समर्थोऽसि ज्ञातुमेवंविधं नरम्।

वाक्यपरिचयः; इदं वाक्यं सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

वाक्यसन्दर्भः; इदं वाक्यं'श्रीरामस्य गुणवैभवम्' इत्येतन्नामके बालकाण्डकथाभागे वर्तते। श्रीमद्रामायणस्य रचनारम्भे वाल्मीकिः स्वस्य जिज्ञासां नारदाय निवेदयति । वाल्मीकिः नारदं सम्बोध्य इदं वदति ।

वाक्यस्य अर्थः -महर्षे ! =नारदमुने !; त्वम् च = भवान् नारदः ;एवंविधम् =एदृशगुणसम्पन्नम्; नरम् = आदर्शपुरुषविशेषम्; ज्ञातुम् = अवगन्तुम्; समर्थः = दक्षः ; असि = भवसि;

वाक्यस्य भावः -' हे महर्षे नारद! सकलसद्गुणसम्पन्नं व्यक्तिविशेषं ज्ञातुं मे मनसि महती उत्कण्ठा विद्यते, त्वं च त्रिलोकज्ञः,मम जिज्ञासितं गुणसम्पन्नं तं पुरुषविशेषं ज्ञातुं सर्वथा समर्थः । अतः त्वत्तः इमं श्रोतुमिच्छामि 'इति वाल्मीकिः नारदं विज्ञापयति।

### १०.२.२.मुने वक्ष्याम्यहं बुद्ध्वा, तैर्युक्तः श्रूयतां नरः।

वाक्यपरिचयः; ; इदं वाक्यं सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

वाक्यसन्दर्भः;'नारदः वाल्मीकेः जिज्ञासायाः पूरणाय उद्युक्तः 'इतेयेतदंशं निरूपयत् इदं वाक्यं 'श्रीरामस्य गुणवैभवम्' इत्येतत्- नामके बालकाण्डकथाभागे वर्तते।

वाक्यस्य अर्थः - मुने ! = हे महर्षे ! हे वाल्मीके! ; तैः = भवता यादृशाः बहवः दुर्लभाः आदर्शगुणाः कीर्तिताः तादृशैः गुणैः; युक्तः = सम्पन्नः; नरः = पुरुषविषेषः; श्रूयताम् = आकर्ण्यताम्; अहम् = नारदः अहम्; बुद्ध्वा = अवगत्य; वक्ष्यामि = कथयिष्यामि।

वाक्यस्य भावः महर्षिः नारदः वाल्मीकिं — ' हे वाल्मीके ! भवता बहवः गुणाः उक्ताः।तेषु अनेके गुणाः दुःखेनापि लब्धुम् अशक्याः। तथापि ये च स्मारिताः अस्मारिताः तैः गुणैः सम्पन्नंव्यक्तिविशेषं जानामि। तुभ्यं विज्ञापयामि ( त्वं ) शृणोतु ' इति नारदः वाल्मीकिम् उन्मुखीकरोति।

### १०.२.३.वेदवेदाङ्गतत्त्वज्ञो धनुर्वेदे च निष्ठितः ।

वाक्यपरिचयः; इदं वाक्यं सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

वाक्यसन्दर्भः;'श्रीरामः प्रतिभासम्पन्नः महापण्डितः,अयं शस्त्रम्, शास्त्रं च समानंम् अभ्यस्तवान्' इतेयेतदंशं निरूपयत् इदं वाक्यं 'श्रीरामस्य गुणवैभवम्' इत्येतत्- नामके बालकाण्डकथाभागे वर्तते।

वाक्यस्य अर्थः; -(मुने ! = महर्षे ! हे वाल्मीके! सः = श्रीरामः )वेदवेदाङ्गतत्त्वज्ञः, वेद=चतुर्णां वेदानाम्; वेदाङ्ग = षण्णाम् वेदाङ्गानां च; तत्त्वज्ञः = रहस्यज्ञाता; धनुर्वेदे = धनुर्विद्यायाम्; निष्ठितः = निष्णातः;

वाक्यस्य भावः; ऋग्-यजु-साम-अथर्वणाख्याः चत्वारो वेदाः।शिक्षा,व्याकरणम्,छन्दः,निरुक्तम्, ज्योतिषम् कल्पश्चेति षट् वेदाङ्गानि च। अयं श्रीरामः वेदानां वेदाङ्गानां तत्त्वं सम्यक् जानाति। शस्त्रविद्यायां धनुर्वेदेऽपि अयं निष्णातः।शास्त्राणां दर्शनानां च मौलिकं तत्त्वं जानाति।श्रुतीनां व्याख्याभूताः स्मृतिग्रन्थाः । तान् सर्वान् अपि अयं जानाति । रामः प्रतिभा- सम्पन्नः,अस्य समीचीनं वाक्चातुर्यम् अस्ति ।एवं श्रीरामः शस्त्रविद्यासु शास्त्रविद्यासु उभयत्र अयं निष्णातः इति नारदः श्रीरामम् उद्दिश्य वाल्मीकिमहर्षये निवेदयति।

### १०.२.४.विवासनं च रामस्य भरतस्याभिषेचनम् ।

वाक्यपरिचयः; इदं वाक्यं सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके

वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

वाक्यसन्दर्भः;कैकेयी पूर्वं दत्तं वरद्वयं याचितवती इतेयेतदंशं निरूपयत् इदं वाक्यं पितृवाक्यपालनम् इत्येतत् नामके अयोध्यकाण्डकथाभागे वर्तते।

वाक्यस्य अर्थः; (कैकयी ) रामस्य= श्रीरामस्य; विवासनम् = निर्वासनम्; भरतस्य =स्व(कैकयी)पुत्रस्य; अभिषेचनम् = राज्याभिषेकम्; (इति वरद्वयं दशरथम् अर्थितवती)

वाक्यस्य भावः; -कैकेयी केकयराजस्य पुत्री।दशरथस्य कनीयसी महिषी(राज्ञी)।सा कदाचित् देवासुरसङ्ग्रामे दशरथस्य सहायम् आचरति। तेन च सहायेन तृप्तः तस्यै वरद्वयं ददाति। सा च तद्वरद्वयं कालान्तरे स्वीकर्तु राजानं विज्ञापयति। राजा च अङ्गीकरोति। प्रकृते कैकेयी रामस्य यौवराज्याभिषेकार्थम् आहृतान् द्रव्यसमूहान् पश्यति ।असूयाम् आवहति। वरद्वयं स्मरति।वाग्दानपालनाय राजानं निर्बध्नाति। कैकेयी 'रामश्चतुर्दशवर्षपर्यन्तं वने निवसतु, भरतश्च युवराजो भवतु'- इति वरद्वयं दशरथं प्रार्थयति ।

**१० .२ .५ .राजा दशरथः स्वर्गं जगाम विलपन् सुतम् ।**

वाक्यपरिचयः; इदं वाक्यं सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

वाक्यसन्दर्भः;दशरथः श्रीरीमम् एव विलपन् मरणं प्राप्नोति इतेयेतदंशं निरूपयत् इदं वाक्यं पितृवाक्यपालनम् इत्येतत् नामके अयोध्यकाण्डकथाभागे वर्तते।

वाक्यस्य अर्थः;राजा = भूपः; दशरथः =अयोध्याधिपतिः;सुतम् = पुत्रम्; विलपन् = प्ररुदन्; स्वर्गम्= स्वर्गलोकम्; जगाम = गतवान् ।

वाक्यस्य भावः; श्रीरामः पितुः वाक्यं पालयति।पितरं सत्यप्रतिज्ञं करोति। अयोध्यां विसृजति।वनवासाय गच्छति। चित्रकूटं प्रविशति। श्रीरामः दशरथस्य प्रियः सुतः। तस्य वनवासाय भृशं दुःखितः भवति।तेनैव दुःखेन ' हा प्रियपुत्र, हा श्रीराम' इत्येवं श्रीरामम् एव विलपति।.प्राणान् त्यजति।

**१० .२ .६ .त्वमेव राजा धर्मज्ञ इति रामं वचोऽब्रवीत् ।**

वाक्यपरिचयः; इदं वाक्यं सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः।

साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

पद्यसन्दर्भः;भरतः श्रीरामं राज्यस्वीकरणाय प्रार्थयति इतेयेतदंशं निरूपयत् इदं वाक्यं पितृवाक्यपालनम् इत्येतत् नामके अयोध्यकाण्डकथाभागे वर्तते।

वाक्स्य अर्थः; (भरतः श्रीरामस्य समीपं गत्वा )धर्मज्ञ != धर्मानुष्ठानपर !; त्वम् = भवान्; एव = केवलम्; राजा = नृपः; इति = एवम् ; वचः = वचनम्, रामम् = श्रीराघवम्, अब्रवीत् = अकथयत्।

वाक्यस्य भावः; भरतः चित्रकूटं प्राप्नोति। पितृवाक्यपालनेन,सत्यपराक्रमेण च श्रीरामः गुणाभिरामः सञ्जातः। एतादृशं च श्रीरामं भरतः चित्रकूटे मिलति। भरतः श्रीरामं पूज्यभावनया "धर्मज्ञ ! त्वमेव राज्यभारवहनयोग्यः असि। भवान् एव राज्यं पालयतु "इति च प्रार्थयति।

**१०.२.७.अगस्त्यवचनाच्चैव जग्राहैन्द्रं शरासनम् ।**

वाक्यपरिचयः; इदं वाक्यं सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

वाक्यसन्दर्भः;श्रीरामः दण्डकारण्यं गतवान् । तत्र अगस्त्यमहर्षेः अस्त्राणि च प्राप्नोति् इतेयेतदंशं निरूपयत् इदं वाक्यं सीतायाः अपहरणम् इत्येतत् नामके अरण्यकाण्डकथाभागे वर्तते।

वाक्स्य अर्थः; (श्रीरामः) अगस्त्यवचनात् = अगस्त्यस्य आदेशात्; ऐन्द्रम् = इन्द्रेण प्रदत्तम्; शरासनम् = धनुः; खड्गम् = कृपाणम्; अक्षयसायकौ = नाशरहितबाणौ; तूणी = निषङ्गौ; जग्राह = अग्रहीत्;

वाक्स्य भावः; श्रीरामः सीतया लक्ष्मणेन च सह अगस्त्यस्य आश्रमम् आगच्छति ।श्रीरामस्य आगमनेन अगस्त्यः अमितानन्दभरितः भवति ।तस्य समीपे इन्द्रस्य धनुः अस्ति ।अक्षयसायकौ तूणीरौ च आस्ताम्। एतौ च महत्वपूर्णौ। प्रभावपूर्णं खड्गं च अपरं किञ्चित् अस्ति ।दिव्यानि तानि च अस्त्राणि सर्वाण्यपि दुष्टशिक्षणाय स्वीकर्तुं श्रीरामम् आदिशति ।अगस्त्यस्य आदेशं शिरसा वहति । श्रीरामः अस्त्रसमुदायं च स्वीकरोति।

**१०.२.८.प्रतिज्ञातश्च रामेण वधः संयति रक्षसाम् ।**

वाक्यपरिचयः; इदं वाक्यं सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

वाक्यसन्दर्भः;श्रीरामः दण्डकारण्यवासिनाम् महर्षीणां ,राक्षसेभ्यः अभयं प्रतिज्ञातवान् इतेयेतदंशं निरूपयत् इदं वाक्यं सीतायाः अपहरणम् इत्येतत् नामके अरण्यकाण्डकथाभागे वर्तते।

वाक्यस्य अर्थः; रामेण = दशरथपुत्रेण; संयति = युद्धे; रक्षसाम् = राक्षसानाम्; वधः = संहारः; प्रतिज्ञातः च = प्रतिश्रुतश्च;

वाक्यस्य भावः; दण्डकारण्ये सीतारामलक्ष्मणाः वनचरैः सह निवसन्ति। तत्र तपश्चरन्तः ऋषयश्च सन्ति। तत्रस्थाः राक्षसाः सततं तान् बाधन्ते। ऋषयश्च बाधाः अनुभवन्ति च। परम् इदानीं ते मुनयः श्रीरामं दण्डकारण्ये वासिनं जानन्ति। कदाचित् ते रामस्य समीपम् आगच्छन्ति। राक्षसैः आचरितानि दुष्कृत्यानि निवेदयन्ति,असुररक्षसां वधाय श्रीरामम् अभ्यर्थयन्ति। श्रीरामः महर्षीणां राक्षसेभ्यः अभयं ददाति ।ऋषीणां समक्षे श्रीरामः 'युद्धे खरादीन् रक्षसान् अवश्यं हनिष्यामि' इति राक्षसानां वधं च प्रतिज्ञास्यति ।

## १०.२.९.न विरोधो बलवता क्षमो रावण तेन ते ।

वाक्यपरिचयः; इदं वाक्यं सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

वाक्यसन्दर्भः;रावणः शूर्पणखायाः विरूपणं ज्ञातवान् ।क्रोधं च आप्तवान्। श्रीरामलक्ष्मणयोः प्रतीकारं कर्तुं च चिन्तितवान्। मारीचं सहायम् अभ्यर्थितवान् इतेयेतदंशं निरूपयत् इदं वाक्यं सीतायाः अपहरणम् इत्येतत् नामके अरण्यकाण्डकथाभागे वर्तते।

वाक्यस्य अर्थः रावण ! = हे रावण !;बलवता = शक्तिमता ; तेन = रामेण; ते = तव रावणस्य; विरोधः = वैरम्; न क्षमः = न उचितम्;

वाक्यस्य भावः; -खरः रावस्य बन्धुः। दूषणः रावणस्य दायादः।त्रिशिरः रावणस्य ज्ञातिः।एवम् एते सर्वे अपि रावणस्य बान्धवाः एव भवन्ति। एते सर्वे च रामेण निहताः।खरप्रभृतीनां बन्धूनां वधं निशम्य रावणः क्रोधेन मूर्च्छितः भवति।प्रतीकारं कर्तुं च सङ्कल्पितः भवति। सीतायाः अपहरणे मारीचं सहायं याचति। मारीचश्च 'हे रावण ! बलशालिना रामेण तव कलहः नैव उचितः , यतः अहं पूर्वं कदाचित् रामबाणक्षिप्तः सन् विश्वामित्रस्य आश्रमात् सागरपारे पातितः। अत्र भवता साहसः नैव कर्तव्यः' इत्येवं भूयः भूयः रावणं वारयति। तथापि कालेन प्रेरितः सन् रावणः मारीचस्य वचनम् न स्वीकरोति।सीताम् अपहर्तुं रावणेन सह रामस्य निवासस्थानं गच्छति।

## १०.२.१०.चकार सख्यं रामेण प्रीतश्चैवाग्निसाक्षिकम् ।

वाक्यपरिचयः;इदं वाक्यं सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

वाक्यसन्दर्भ; ' श्रीराम - सुग्रीवौ अग्निसाक्षिकं सख्यम् अकुरुताम् ' इत्यमुमंशं ज्ञापयत् इदं वाक्यं 'राम-सुग्रीवयोः अग्निसाक्षिकं सख्यम्' इत्येतत् नामके किष्किन्धकाण्डकथा भागे वर्तते।

वाक्यस्य अर्थः;प्रीतः(सन्) = सन्तोषम् आप्तः(सन्)सुग्रीवः;रामेण = राघवेण; अग्निसाक्षिकम् = अग्निसमक्षम् यथा स्यात् तदृशम्; सख्यं = स्नेहम् ; चकार = कृतवान्।

वाक्यस्य भावः; सुग्रीवः अग्रजेन वालिना,विरुध्यति । स्वयं कष्टानि आप्नोति। सः कष्टकालिकीं बाधां जानाति, पर कष्टाभिज्ञः अपि भवति।अतः सुग्रीवोऽपि रामस्य सकलं वृत्तान्तं श्रद्धया शृणोति। श्रीरामस्य कष्टानि ज्ञात्वा सुग्रीवः सानुभूतिपरः = आकृष्टमनस्कः भवति। अग्निं प्रज्वाल्य ,तत्समक्षे सुग्रीवः श्रीरामेण सह अग्निसाक्षिकं स्नेहं च करोति।

विशेषांशः;कष्टापन्नेषु प्रतिस्पन्दनशीलं सुग्रीवस्य दयार्द्रहृदयत्वम् अत्र वर्णितं भवति।

### १०.२.११.निजघान च तत्रैनं शरेणैकेन राघवः ।

वाक्यपरिचयः;इदं वाक्यं सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

वाक्यसन्दर्भः; 'श्रीरामः वालिनं हतवान् ' इत्यमुमंशं ज्ञापयत् इदं वाक्यं 'राम-सुग्रीवयोः अग्निसाक्षिकं सख्यम्' इत्येतन्नामके किष्किन्धकाण्डकथा भागे वर्तते।

वाक्यस्य अर्थः; राघवः = श्रीरामः; च = तु; तत्र = वालि-सुग्रीवयोः युद्धे; एकेन = केवलम् एकेनैव; शरेण = बाणेन; एनम् = वालिनम्; निजघान =हतवान्।

वाक्यस्य भावः; तारा 'सुग्रीवस्य रामेण सह मैत्री जाता। इदानीम् अयं रामस्य सहायम् आप्तः। अतः सुग्रीवः इदानीं जेतुं न शक्यः।तस्मात् त्वया न गन्तव्यम् ''इत्येवं बहुधा वालिनं निवारयति। वाली नैव शृणोति। ताराम् एव आश्वासयति, अनुनयति ।एवं स्वपत्न्याः तारायाः वचनम् अपि अगृहीत्वा वाली सुग्रीवेण सह योद्धुं सिद्धः भवति । तत्र किष्किन्धाकन्दरायां वालि-सुग्रीवौ परस्परं युध्यतः।तयोः महान् युद्धः प्रचलति। युद्धे सुग्रीवः किञ्चित् बलहीनः भवति। तदवगत्य श्रीरामः एकेनैव बाणेन वालिनं प्रहरति।तेन वाली निहतः भवति।

### १०.२.१२.ददर्श सीतां ध्यायन्तीम् अशोकवनिकां गताम् ।

वाक्यपरिचयः;इदं वाक्यं सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

वाक्यसन्दर्भः; ' हनुमान् लङ्कां गतवान्,अशोकवने सीतां च दृष्टवान् ' इत्येतदंशस्य निरूपण-सन्दर्भे,इदं वाक्यं सीतायाः अन्वेषणम् इति नामके सुन्दरकाण्डकथाभागे वर्तते।

वाक्यस्य अर्थः ; (हनुमान् =आञ्जनेयः;) तत्र = लङ्कायाम्; अशोकवनिकाम् = अशेक वाटिकायाम्; गताम् = स्थिताम्;सीताम् = जानकीम्, ध्यायन्तीम् =रामम् अनुस्मरन्तीम्; ददर्श = दृष्टवान् ।

वाक्यस्य भावः; हनुमान् सागरं तरति।लङ्कापुरीं प्राप्नोति।लङ्कापुरीं च रावणः पालयति । हनुमतासर्वा च लङ्का सीतायै शोधिता। कुत्रापि सीता न दृष्टा। सीता अशोकवने स्थिता। सा राक्षसैः परिवृता भयकम्पिता अस्ति। मनसा श्रीरामम् एव चिन्तयन्ती अस्ति । हनुमान् एवं दुःखितां रामसंसक्तमानसां सीतां अन्ततः अशोकवने पश्यति ।

### १०.२.१३.रामाय प्रियमाख्यातुं पुनरायान्महाकपिः।

वाक्यपरिचयः;इदं वाक्यं सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

वाक्यसन्दर्भः ; 'हनुमान्, सीतायाः दर्शनवृत्तान्तं निवेदितुं लङ्कातः निवर्तते ' इत्येतदंशस्य निरूपणसन्दर्भे, इदं वाक्यं सीतायाः अन्वेषणम्, नामके सुन्दरकाण्ड-कथाभागे वर्तते।

वाक्यस्य अर्थः;रामाय = श्रीरामाय; प्रियम् = सुखकरम्;(शुभवार्ताम्) आख्यातुम् = कथयितुम्; पुनः=भूयः; आयात् = प्रत्यागच्छत् ।

श्लोकभावः - हनुमान् अमितबलपराक्रमसम्पन्नः।हनुमान् एकाकी एव पिङ्गलनेत्रादीन् उग्रान् पञ्च सेनापतीन् हन्ति । जाम्बमाल्यादीन् सप्त सचिवसुतान् हन्ति। अक्षयकुमारं रावणतनयञ्च हन्ति। ब्राह्मणः प्रतिष्ठारक्षणाय मेघनादेन प्रयुक्तस्य ब्रह्मास्त्रस्य तु बन्धितः भवति।तद्व्याजेन रावणस्य सभां प्रविशति। रावणेन विवदते। रावणश्च हनुमतः लाङ्गूलं वह्निना योजितं कर्तुं आदिशति । हनूमतः लाङ्गूलं च वह्निना योजितं भवति । सीतानिवासस्थानं अशोकवनम्,विभीषणनिवासस्थानं च विहाय,सर्वां लङ्कां प्रदहति। अनन्तरं रामाय सीता दर्शनप्राप्तिरूपां शुभवार्तां निवेदयितुं प्रतिनिवृत्तः भवति। हनुमान् लङ्कातः किष्किन्धां प्रति आगच्छति । रामं सम्मिलति। तम् नमस्करोति। वस्तुतः 'सीता दृष्टा'इति सीतादर्शनवृत्तान्तं श्रीरामाय निवेदयति।

### १०.२.१४.रामः सीतामनुप्राप्य परां व्रीडामुपागमत् ।

वाक्यपरिचयः;इदं वाक्यं सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

वाक्यसन्दर्भः; श्रीरामः लङ्कां प्राप्तवान् , रावणं च हतवान्, अवमानभारेण सीतायाः पुरतः उपस्थितवान् इत्यशं निरूपयत् इदं वाक्यं रावणसंहारात्मके युद्धकाण्डकथाभागे वर्तते।

वाक्यस्य अर्थः; - रामः = राघवः ;(रावणं हत्वा) सीताम् = जानकीम् ; अनुप्राप्य = लब्ध्वा ; पराम् = महतीम् ; व्रीडाम् = लज्जाम्(अवमानम्) ; उपागमत् = अधिगतवान्

वाक्यस्य भावः;- श्रीरामः ससैन्यं तेन सेतुना लङ्काम् गच्छति। रावणसैन्यं मथ्नाति।युद्धे सामात्यपुत्रबान्धवं रावणं हन्ति। परसदनं प्राप्तां सीतां पश्यति। दशाननस्य भवने स्थितायाः सीतायाः स्वीकारे लोकापवादभीत्या लज्जावशः= अवमानभरितः, भवति । सर्वसमक्षं सीतां परुषं भाषते।आत्मनः पवित्रतां प्रकटयितुं च पृच्छति। सीता च महासाध्वी। रामादन्यं न चिन्तयति । सीता श्रीरामस्य निष्ठुरवचनं शृणोति।परम् असहमाना भवति ।आत्मनः पवित्रातां प्रकटयितुं संसिद्धा भवति। अग्निं प्रविशतुम् इच्छति । अग्निं प्रविशति च। एवं सीता आत्मनः पवित्रतां पातिव्रत्यं च निरूपयति। अग्निशिखाः सीतां किमपि कर्तुं न पारयन्ति। अग्निः स्वयं पावनीं सीतां हस्ताभ्यम् आददाति।शिखाभ्यः बहिः आगच्छति। श्रीरामं प्रति 'हे राघव !इमां विशुद्धां जानीहि । निष्पापाम् इमां सीतां गृह्णातु' इति वदति। सीतायाः अग्नौ परीक्षणं पवित्रम् आदर्शभूतं च कर्म भवति। सीतारामौ उभौ अपि तदनुष्ठाय लोकस्य आदर्शदम्पती भवतः। आदर्शदम्पत्योः सीतारामयोः अनेन महत्कर्मणा चराचरजगत्सर्वं सन्तुष्यति। सकलाश्च ऋषिगणाः देवगणाश्च प्रीताः भवन्ति।सीतां श्रीरामं च अभिनन्दन्ति।

**१०.२.१५.कृतकृत्यस्तदा रामो विज्वरः प्रमुमोद ह ।**

वाक्यपरिचयः;इदं वाक्यं सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

वाक्यसन्दर्भः;श्रीरामः लङ्कायां विभीषणं अभिषिक्तवान् इत्यशं ज्ञापयत् इदं वाक्यं रावणस्य संहारणम् नामके युद्धकाण्डकथाभागे वर्तते।

वाक्यस्य अर्थः;तदा = तस्मिन् आनन्दसमये; (विभीषणाख्यं रावणानुजम्;लङ्कायाम् प्रतिष्ठाप्य) कृतकृत्यः = कृतार्थः; (जातः। ततश्च) विज्वरः = वाग्दानपालनेन विगतबाधस्सन्;रामः = श्रीरामः; प्रमुमोद= प्रकामं हर्षम् आप।

वाक्यस्य भावः; सीतायाः अग्निप्रवेशाय, सीतायाः विगतकल्मषताज्ञापनाय, अग्निवचनात् सीतायाः स्वीकरणाय च सकलाः देवताः श्रीरामम् अभिनन्दन्ति। श्रीरामश्च सीतां प्राप्नोति। परमानन्दभरितः भवति। तस्मिन् एव आनन्दसमये श्रीरामः लङ्काराज्ये रावणस्य अनुजम् विभीषणम् अभिषेचति। श्रीरामः विभीषणस्य अभिषेचनाय, प्रतिज्ञापालनाय च आत्मानं चरितार्थं भावयति। विगतज्वरश्च (TENSION FREE MINDED )भवति। श्रीरामः सन्तुष्टान्तरङ्गश्च भवति।

**१०.२.१६.न चाग्निजं भयं किञ्चिन्, नाप्सु मज्जन्ति जन्तवः।**

वाक्यपरिचयः;इदं वाक्यं सङ्क्षेपरामायणे वर्तते। सङ्क्षेपरामायणं च श्रीमद्रामायणस्य बालकाण्डे प्रथमसर्गः। सङ्क्षेपतः रामायणस्य कथा अत्र लभ्यते। अस्य रचयिता वाल्मीकिः। साहित्यलोके वाल्मीकेः आदिकविः इति, श्रीमद्रामायणस्य आदिकाव्यम् इति च प्रसिद्धिः अस्ति।

वाक्यसन्दर्भः; 'श्रीरामस्य राज्यपालनकाले प्राकृतिकाः उपद्रवाः न सन्ति' इत्यमुं अंशं ज्ञापयत् इदं वाक्यं श्रीरामराज्यस्य प्राशस्त्यकथनप्रसङ्गे विद्यते।

वाक्यस्य अर्थः ;- अग्निजम् = अग्निहेतुकम्; किञ्चिद् च= यत्किञ्चन अपि; भयम् = भीतिः;न= न वर्तते; जन्तवः = प्राणिनः; अप्सु = जले; न मज्जन्ति = न निमग्नाः भवन्ति;

वाक्यस्य भावः; -यथा राजा आदर्शो भवति तथा प्रजाः अपि नीतिसम्पन्नाः भवन्ति।यदि राजा दुष्टः तदा प्रजाः अपि दुरालोचनपराः ,पापकार्याचरणशीलाः च भवन्ति। प्रजानां पापकार्याचरणं प्रकृतेः भारजनकं भवति। दुरालोचनं नाम मनः कालुष्यं भवति। पापकार्याचरणं नाम कर्म कालुष्यं भवति। तच्च उपद्रवावान् कल्पयति। तदा भूकम्पः,जलप्रलयः, वायुगुण्डम् इत्यादिकं भवति। प्रकृते श्रीरामस्य राज्यपालनाकाले प्रजानां मनस्सु कर्मसु वा कालुष्यं नास्ति। प्रकृतेः समतोलनं नष्टं न भवति।उपद्रवाश्च न भवन्ति।अत एव अग्नेः वा, जलात् वा, वायोः वा उपद्रवा न भवन्ति। भीतिश्च नास्ति।

## १०.३ उपसंहारः.

एवम् अमुं पाठ्यांशविषयं(Study- Material)पठित्वा विद्यार्थिनः सूचितैः चतुर्भिः उपशीर्षकैः सन्दर्भवाक्यानां लघुविवरणाय संसिद्धाः भवन्ति। अभ्यासं च कुर्वन्ति। लेखनकौशलम्,(वाक्य) रचनाकौशलम्, अवधारणाकौशलं च प्राप्नोति।

## १०.४ अभ्यासः

द्वयोः सन्दर्भव्याख्यानं कुरुत ?

अ) न पुत्रमरणं केचिद् द्रक्ष्यन्ति पुरुषाः क्वचित् ।

इ) क्षत्रियो भूमिपतित्वमीयात्